श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वाल्मीकीयरामायणस्य

॥ अरण्यकाण्डम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1	प्रथमः सर्गः	5
2	द्वितीयः सर्गः	8
3	तृतीयः सर्गः	11
4	चतुर्थः सर्गः	14
5	पञ्चमः सर्गः	18
6	षष्ठः सर्गः	23
7	सप्तमः सर्गः	26
8	अष्टमः सर्गः	29
9	नवमः सर्गः	32
10	दशमः सर्गः	36
11	एकादशः सर्गः	39
12	द्वादशः सर्गः	49
13	त्रयोदशः सर्गः	53
14	चतुर्दशः सर्गः	56
15	पञ्चदशः सर्गः	60
16	षोडशः सर्गः	64
17	सप्तदशः सर्गः	69
18	अष्टादशः सर्गः	73
19	एकोनविंशः सर्गः	76

20 विंशः सर्गः 79

21 एकविंशः सर्गः 82

22 द्वाविंशः सर्गः 85

23 त्रयोविंशः सर्गः 88

24 चतुर्विंशः सर्गः 92

25 पञ्चविंशः सर्गः 96

26 षड्विंशः सर्गः 101

27 सप्तविंशः सर्गः 105

28 अष्टाविंशः सर्गः 108

29 एकोनत्रिंशः सर्गः 112

30 त्रिंशः सर्गः 115

31 एकत्रिंशः सर्गः 120

32 द्वात्रिंशः सर्गः 126

33 त्रयस्त्रिंशः सर्गः 129

34 चतुस्त्रिंशः सर्गः 132

35 पञ्चत्रिंशः सर्गः 135

36 षट्त्रिंशः सर्गः 140

37 सप्तत्रिंशः सर्गः 143

38 अष्टात्रिंशः सर्गः 146

39 एकोनचत्वारिंशः सर्गः 150

40 चत्वारिंशः सर्गः 153
41 एकचत्वारिंशः सर्गः 156
42 द्विचत्वारिंशः सर्गः 159
43 त्रिचत्वारिंशः सर्गः 163
44 चतुश्चत्वारिंशः सर्गः 169
45 पञ्चचत्वारिंशः सर्गः 172
46 षट्चत्वारिंशः सर्गः 177
47 सप्तचत्वारिंशः सर्गः 182
48 अष्टचत्वारिंशः सर्गः 188
49 एकोनपञ्चाशः सर्गः 191
50 पञ्चाशः सर्गः 196
51 एकपञ्चाशः सर्गः 199
52 द्विपञ्चाशः सर्गः 204
53 त्रिपञ्चाशः सर्गः 209
54 चतुःपञ्चाशः सर्गः 212
55 पञ्चपञ्चाशः सर्गः 216
56 षट्पञ्चाशः सर्गः 220
57 सप्तपञ्चाशः सर्गः 224
58 अष्टपञ्चाशः सर्गः 227
59 एकोनषष्टितमः सर्गः 230

60 षष्टितमः सर्गः 233
61 एकषष्टितमः सर्गः 237
62 द्विषष्टितमः सर्गः 241
63 त्रिषष्टितमः सर्गः 245
64 चतुःषष्टितमः सर्गः 248
65 पञ्चषष्टितमः सर्गः 252
66 षट्षष्टितमः सर्गः 260
67 सप्तषष्टितमः सर्गः 262
68 अष्टषष्टितमः सर्गः 265
69 एकोनसप्ततितमः सर्गः 269
70 सप्ततितमः सर्गः 274
71 एकसप्ततितमः सर्गः 280
72 द्विसप्ततितमः सर्गः 283
73 त्रिसप्ततितमः सर्गः 287
74 चतुःसप्ततितमः सर्गः 290
75 पञ्चसप्ततितमः सर्गः 295
76 299

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रथमः सर्गः ॥

सीतालक्ष्मणसहितस्य श्रीरामस्य तापसाश्रममण्डले सत्कारः

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान्।
रामो ददर्श दुर्धर्षस्तापसाश्रममण्डलम्॥ **3.1.1**॥ 1

कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम्।
यथा प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम्॥ **3.1.2**॥ 2

शरण्यं सर्वभूतानां सुसम्मृष्टाजिरं सदा।
मृगैर्बहुभिराकीर्णं पक्षिसङ्घैः समावृतम्॥ **3.1.3**॥ 3

पूजितं चोपनृत्तं च नित्यमप्सरसां गणैः।
विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः॥ **3.1.4**॥ 4

समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम्।
आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतम्॥ **3.1.5**॥ 5

बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम्।
पुष्पैश्चान्यैः परिक्षिप्तं पद्मिन्या च सपद्मया॥ **3.1.6**॥ 6

फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः।
सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्युतम्॥ **3.1.7**॥ 7

पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः।
तद् ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम्॥ **3.1.8**॥ 8

ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम्।
तद् दृष्ट्वा राघवः श्रीमांस्तापसाश्रममण्डलम्॥ **3.1.9**॥ 9

अभ्यगच्छन्महातेजा विज्यं कृत्वा महद् धनुः।
दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः॥ **3.1.10**॥ 10

अभिजग्मुस्तदा प्रीता वैदेहीं च यशस्विनीम्।
ते तु सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणम्॥ **3.1.11**॥ 11

लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम्।
मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः॥ **3.1.12**॥ 12

रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम्।
ददृशुर्विस्मिताकारा रामस्य वनवासिनः॥ **3.1.13**॥ 13

वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव।
आश्चर्यभूतान् ददृशुः सर्वे ते वनवासिनः॥ **3.1.14**॥ 14

अत्रैनं हि महाभागाः सर्वभूतहिते रताः।
अतिथिं पर्णशालायां राघवं सन्न्यवेशयन्॥ **3.1.15**॥ 15

ततो रामस्य सत्कृत्य विधिना पावकोपमाः।
आजह्रुस्ते महाभागाः सलिलं धर्मचारिणः॥ **3.1.16**॥ 16

मङ्गलानि प्रयुञ्जाना मुदा परमया युताः।
मूलं पुष्पं फलं सर्वमाश्रमं च महात्मनः॥ **3.1.17**॥ 17

निवेदयित्वा धर्मज्ञास्ते तु प्राञ्जलयोऽब्रुवन्।
धर्मपालो जनस्यास्य शरण्यश्च महायशाः॥ **3.1.18**॥ 18

पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः।
इन्द्रस्यैव चतुर्भागः प्रजा रक्षति राघव॥ **3.1.19**॥ 19

राजा तस्माद् वरान् भोगान् रम्यान् भुङ्क्ते नमस्कृतः।
ते वयं भवता रक्ष्या भवद्विषयवासिनः।
नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः॥ **3.1.20**॥ 20

न्यस्तदण्डा वयं राजञ्जितक्रोधा जितेन्द्रियाः।
रक्षणीयास्त्वया शश्वद् गर्भभूतास्तपोधनाः॥ **3.1.21**॥ 21

एवमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च राघवम्।
वन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन्॥ **3.1.22**॥ 22

तथान्ये तापसाः सिद्धा रामं वैश्वानरोपमाः।
न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम्॥ **3.1.23**॥ 23

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे प्रथमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वितीयः सर्गः ॥

वने श्रीरामादीन् प्रति विराधस्याक्रमणम्

कृतातिथ्योऽथ रामस्तु सूर्यस्योदयनं प्रति।
आमन्त्र्य स मुनीन् सर्वान् वनमेवान्वगाहत ॥ **3.2.1** ॥ 24

नानामृगगणाकीर्णमृक्षशार्दूलसेवितम्।
ध्वस्तवृक्षलतागुल्मं दुर्दर्शसलिलाशयम् ॥ **3.2.2** ॥ 25

निष्कूजमानशकुनिं झिल्लिकागणनादितम्।
लक्ष्मणानुचरो रामो वनमध्यं ददर्श ह ॥ **3.2.3** ॥ 26

सीतया सह काकुत्स्थस्तस्मिन् घोरमृगायुते।
ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ **3.2.4** ॥ 27

गभीराक्षं महावक्त्रं विकटं विकटोदरम्।
बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ **3.2.5** ॥ 28

वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम्।
त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ **3.2.6** ॥ 29

त्रीन् सिंहांश्चतुरो व्याघ्रान् द्वौ वृकौ पृषतान् दश।
सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥ **3.2.7** ॥ 30

अवसज्यायसे शूले विनदन्तं महास्वनम्।
स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम्॥ **3.2.8**॥ 31

अभ्यधावत् सुसङ्क्रुद्धः प्रजाः काल इवान्तकः।
स कृत्वा भैरवं नादं चालयन्निव मेदिनीम्॥ **3.2.9**॥ 32

अङ्केनादाय वैदेहीमपक्रम्य तदाब्रवीत्।
युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ॥ **3.2.10**॥ 33

प्रविष्टौ दण्डकारण्यं शरचापासिपाणिनौ।
कथं तापसयोर्वां च वासः प्रमदया सह॥ **3.2.11**॥ 34

अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ।
अहं वनमिदं दुर्गं विराधो नाम राक्षसः॥ **3.2.12**॥ 35

चरामि सायुधो नित्यमृषिमांसानि भक्षयन्।
इयं नारी वरारोहा मम भार्या भविष्यति॥ **3.2.13**॥ 36

युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे।
तस्यैवं ब्रुवतो दुष्टं विराधस्य दुरात्मनः॥ **3.2.14**॥ 37

श्रुत्वा सगर्वितं वाक्यं सभ्भ्रान्ता जनकात्मजा।
सीता प्रवेपितोद्वेगात् प्रवाते कदली यथा॥ **3.2.15**॥ 38

तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभाम्।
अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता॥ **3.2.16**॥ 39

पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसम्भवाम्।
मम भार्यां शुभाचारां विराधाङ्के प्रवेशिताम्॥ **3.2.17**॥ 40

अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम्।
यदभिप्रेतमस्मासु प्रियं वरवृतं च यत्॥ **3.2.18**॥ 41

कैकेय्यास्तु सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण।
या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी॥ **3.2.19**॥ 42

ययाहं सर्वभूतानां प्रियः प्रस्थापितो वनम्।
अद्येदानीं सकामा सा या माता मध्यमा मम॥ **3.2.20**॥ 43

परस्पर्शात् तु वैदेह्या न दुःखतरमस्ति मे।
पितुर्विनाशात् सौमित्रे स्वराज्यहरणात् तथा॥ **3.2.21**॥ 44

इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुतः।
अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन्॥ **3.2.22**॥ 45

अनाथ इव भूतानां नाथस्त्वं वासवोपमः।
मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे॥ **3.2.23**॥ 46

शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः।
विराधस्य गतासोर्हि मही पास्यति शोणितम्॥ **3.2.24**॥ 47

राज्यकामे मम क्रोधो भरते यो बभूव ह।
तं विराधे विमोक्ष्यामि वज्री वज्रमिवाचले॥ **3.2.25**॥ 48

मम भुजबलवेगवेगितः
पततु शरोऽस्य महान् महोरसि।
व्यपनयतु तनोश्च जीवितं
पततु ततश्च महीं विघूर्णितः॥ **3.2.26**॥ 49

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्वितीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ तृतीयः सर्गः ॥

विराधश्रीरामसंवादः श्रीरामेण सलक्ष्मणेन विराधस्योपरि प्रहरणं विराधस्य तौ द्वावपि भ्रातरौ गृहीत्वा वनान्तरे गमनम्

अथोवाच पुनर्वाक्यं विराधः पूरयन् वनम्।
पृच्छतो मम हि ब्रूतं कौ युवां क्व गमिष्यथः॥ **3.3.1** ॥ 50

तमुवाच ततो रामो राक्षसं ज्वलिताननम्।
पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः॥ **3.3.2** ॥ 51

क्षत्रियौ वृत्तसम्पन्नौ विद्धि नौ वनगोचरौ।
त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान्॥ **3.3.3** ॥ 52

तमुवाच विराधस्तु रामं सत्यपराक्रमम्।
हन्त वक्ष्यामि ते राजन् निबोध मम राघव॥ **3.3.4** ॥ 53

पुत्रः किल जवस्याहं माता मम शतह्रदा।
विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः॥ **3.3.5** ॥ 54

तपसा चाभिसम्प्राप्ता ब्रह्मणो हि प्रसादजा।
शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च॥ **3.3.6** ॥ 55

उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम्।
त्वरमाणौ पलायेथां न वां जीवितमाददे॥ **3.3.7** ॥ 56

तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः।
राक्षसं विकृताकारं विराधं पापचेतसम्॥ **3.3.8**॥ 57

क्षुद्र धिक् त्वां तु हीनार्थं मृत्युमन्वेषसे ध्रुवम्।
रणे प्राप्स्यसि सन्तिष्ठ न मे जीवन् विमोक्ष्यसे॥ **3.3.9**॥ 58

ततः सज्यं धनुः कृत्वा रामः सुनिशिताञ्शरान्।
सुशीघ्रमभिसन्धाय राक्षसं निजघान ह॥ **3.3.10**॥ 59

धनुषा ज्यागुणवता सप्त बाणान् मुमोच ह।
रुक्मपुङ्खान् महावेगान् सुपर्णानिलतुल्यगान्॥ **3.3.11**॥ 60

ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः।
निपेतुः शोणितादिग्धा धरण्यां पावकोपमाः॥ **3.3.12**॥ 61

स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः।
अभ्यद्रवत् सुसङ्क्रुद्धस्तदा रामं सलक्ष्मणम्॥ **3.3.13**॥ 62

स विनद्य महानादं शूलं शक्रध्वजोपमम्।
प्रगृह्याशोभत तदा व्यात्तानन इवान्तकः॥ **3.3.14**॥ 63

अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः।
विराधे राक्षसे तस्मिन् कालान्तकयमोपमे॥ **3.3.15**॥ 64

स प्रहस्य महारौद्रः स्थित्वाजृम्भत राक्षसः।
जृम्भमाणस्य ते बाणाः कायान्निष्पेतुराशुगाः॥ **3.3.16**॥ 65

स्पर्शात् तु वरदानेन प्राणान् संरोध्य राक्षसः।
विराधः शूलमुद्यम्य राघवावभ्यधावत॥ **3.3.17**॥ 66

तच्छूलं वज्रसङ्काशं गगने ज्वलनोपमम्।
द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः॥ **3.3.18**॥ 67

तद् रामविशिखैश्छिन्नं शूलं तस्यापतद् भुवि।
पपाताशनिना छिन्नं मेरोरिव शिलातलम्॥ **3.3.19**॥ 68

तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पाविवोद्यतौ।
तूर्णमापेततुस्तस्य तदा प्रहरतां बलात्॥ **3.3.20**॥ 69

स वध्यमानः सुभृशं भुजाभ्यां परिगृह्य तौ।
अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत॥ **3.3.21**॥ 70

तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत्।
वहत्वयमलं तावत् पथानेन तु राक्षसः॥ **3.3.22**॥ 71

यथा चेच्छति सौमित्रे तथा वहतु राक्षसः।
अयमेव हि नः पन्था येन याति निशाचरः॥ **3.3.23**॥ 72

स तु स्वबलवीर्येण समुत्क्षिप्य निशाचरः।
बालाविव स्कन्धगतौ चकारातिबलोद्धतः॥ **3.3.24**॥ 73

तावारोप्य ततः स्कन्धं राघवौ रजनीचरः।
विराधो विनदन् घोरं जगामाभिमुखो वनम्॥ **3.3.25**॥ 74

वनं महामेघनिभं प्रविष्टो
द्रुमैर्महद्भिर्विविधैरुपेतम्।
नानाविधैः पक्षिकुलैर्विचित्रं
शिवायुतं व्यालमृगैर्विकीर्णम्॥ **3.3.26**॥ 75

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे तृतीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्थः सर्गः ॥

श्रीरामलक्ष्मणकर्तृको विराधस्य वधः

ह्रियमाणौ तु काकुत्स्थौ दृष्ट्वा सीता रघूत्तमौ।
उच्चैः स्वरेण चुक्रोश प्रगृह्य सुमहाभुजौ ॥ **3.4.1** ॥ 76

एष दाशरथी रामः सत्यवाञ्छीलवाञ्शुचिः।
रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ **3.4.2** ॥ 77

मामृक्षा भक्षयिष्यन्ति शार्दूलद्वीपिनस्तथा।
मां हरोत्सृज काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ **3.4.3** ॥ 78

तस्यास्तद् वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ।
वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ **3.4.4** ॥ 79

तस्य रौद्रस्य सौमित्रिः सव्यं बाहुं बभञ्ज ह।
रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ **3.4.5** ॥ 80

स भग्नबाहुः संविग्नः पपाताशु विमूर्च्छितः।
धरण्यां मेघसङ्काशो वज्रभिन्न इवाचलः ॥ **3.4.6** ॥ 81

मुष्टिभिर्बाहुभिः पद्भिः सूदयन्तौ तु राक्षसम्।
उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥ **3.4.7** ॥ 82

स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः।
निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः॥ **3.4.8**॥ 83

तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमम्।
भयेष्वभयदः श्रीमानिदं वचनमब्रवीत्॥ **3.4.9**॥ 84

तपसा पुरुषव्याघ्र राक्षसोऽयं न शक्यते।
शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे॥ **3.4.10**॥ 85

कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण।
वनेऽस्मिन् सुमहच्छ्वभ्रं खन्यतां रौद्रवर्चसः॥ **3.4.11**॥ 86

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान्॥ **3.4.12**॥ 87

तच्छ्रुत्वा राघवेणोक्तं राक्षसः प्रश्रितं वचः।
इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम्॥ **3.4.13**॥ 88

हतोऽहं पुरुषव्याघ्र शक्रतुल्यबलेन वै।
मया तु पूर्वं त्वं मोहान्न ज्ञातः पुरुषर्षभ॥ **3.4.14**॥ 89

कौसल्या सुप्रजास्तात रामस्त्वं विदितो मया।
वैदेही च महाभागा लक्ष्मणश्च महायशाः॥ **3.4.15**॥ 90

अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुम्।
तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन हि॥ **3.4.16**॥ 91

प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः।
यदा दाशरथी रामस्त्वां वधिष्यति संयुगे॥ **3.4.17**॥ 92

तदा प्रकृतिमापन्नो भवान् स्वर्गं गमिष्यति।
अनुपस्थीयमानो मां स क्रुद्धो व्याजहार ह॥ **3.4.18**॥ 93

इति वैश्रवणो राजा रम्भासक्तमुवाच ह।
तव प्रसादान्मुक्तोऽहमभिशापात् सुदारुणात्॥ **3.4.19**॥ 94

भुवनं स्वं गमिष्यामि स्वस्ति वोऽस्तु परन्तप।
इतो वसति धर्मात्मा शरभङ्गः प्रतापवान्॥ **3.4.20**॥ 95

अध्यर्धयोजने तात महर्षिः सूर्यसन्निभः।
तं क्षिप्रमभिगच्छ त्वं स ते श्रेयोऽभिधास्यति॥ **3.4.21**॥ 96

अवटे चापि मां राम निक्षिप्य कुशली व्रज।
रक्षसां गतसत्त्वानामेष धर्मः सनातनः॥ **3.4.22**॥ 97

अवटे ये निधीयन्ते तेषां लोकाः सनातनाः।
एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः॥ **3.4.23**॥ 98

बभूव स्वर्गसम्प्राप्तो न्यस्तदेहो महाबलः।
तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह॥ **3.4.24**॥ 99

कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण।
वनेऽस्मिन्सुमहाञ्श्वभ्रः खन्यतां रौद्रकर्मणः॥ **3.4.25**॥ 100

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान्॥ **3.4.26**॥ 101

ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम्।
अखनत् पार्श्वतस्तस्य विराधस्य महात्मनः॥ **3.4.27**॥ 102

तं मुक्तकण्ठमुत्क्षिप्य शङ्कुकर्णं महास्वनम्।
विराधं प्राक्षिपच्छ्वभ्रे नदन्तं भैरवस्वनम्॥ **3.4.28**॥ 103

तमाहवे दारुणमाशुविक्रमौ
स्थिरावुभौ संयति रामलक्ष्मणौ।

मुदान्वितौ चिक्षिपतुर्भयावहं
नदन्तमुत्क्षिप्य बलेन राक्षसम्॥ **3.4.29**॥ 104

अवध्यतां प्रेक्ष्य महासुरस्य तौ
शितेन शस्त्रेण तदा नरर्षभौ।
समर्थ्य चात्यर्थविशारदावुभौ
बिले विराधस्य वधं प्रचक्रतुः॥ **3.4.30**॥ 105

स्वयं विराधेन हि मृत्युमात्मनः
प्रसह्य रामेण यथार्थमीप्सितः।
निवेदितः काननचारिणा स्वयं
न मे वधः शस्त्रकृतो भवेदिति॥ **3.4.31**॥ 106

तदेव रामेण निशम्य भाषितं
कृता मतिस्तस्य बिलप्रवेशने।
बिलं च तेनातिबलेन रक्षसा
प्रवेश्यमानेन वनं विनादितम्॥ **3.4.32**॥ 107

प्रहृष्टरूपाविव रामलक्ष्मणौ
विराधमुर्व्यां प्रदरे निपात्य तम्।
ननन्दतुर्वीतभयौ महावने
शिलाभिरन्तर्दधतुश्च राक्षसम्॥ **3.4.33**॥ 108

ततस्तु तौ काञ्चनचित्रकार्मुकौ
निहत्य रक्षः परिगृह्य मैथिलीम्।
विजह्रतुस्तौ मुदितौ महावने
दिवि स्थितौ चन्द्रदिवाकराविव॥ **3.4.34**॥ 109

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुर्थः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चमः सर्गः ॥

लक्ष्मणसीतासहितस्य श्रीरामस्य शरभङ्गमुनेराश्रमे गमनं तत्र देवान् दृष्ट्वा तस्य मुनिना सम्मानं शरभङ्गस्य ब्रह्मलोके गमनं च

हत्वा तु तं भीमबलं विराधं राक्षसं वने।
ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान्॥ **3.5.1** ॥ 110

अब्रवीद् भ्रातरं रामो लक्ष्मणं दीप्ततेजसम्।
कष्टं वनमिदं दुर्गं न च स्मो वनगोचराः॥ **3.5.2** ॥ 111

अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम्।
आश्रमं शरभङ्गस्य राघवोऽभिजगाम ह॥ **3.5.3** ॥ 112

तस्य देवप्रभावस्य तपसा भावितात्मनः।
समीपे शरभङ्गस्य ददर्श महदद्भुतम्॥ **3.5.4** ॥ 113

विभ्राजमानं वपुषा सूर्यवैश्वानरप्रभम्।
रथप्रवरमारूढमाकाशे विबुधानुगम्॥ **3.5.5** ॥ 114

असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम्।
सम्प्रभाभरणं देवं विरजोऽम्बरधारिणम्॥ **3.5.6** ॥ 115

तद्विधैरेव बहुभिः पूज्यमानं महात्मभिः।
हरितैर्वाजिभिर्युक्तमन्तरिक्षगतं रथम्॥ **3.5.7** ॥ 116

ददर्शादूरतस्तस्य तरुणादित्यसन्निभम्।
पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसन्निभम्॥ **3.5.8**॥ 117

अपश्यद् विमलं छत्रं चित्रमाल्योपशोभितम्।
चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने॥ **3.5.9**॥ 118

गृहीते वरनारीभ्यां धूयमाने च मूर्धनि।
गन्धर्वामरसिद्धाश्च बहवः परमर्षयः॥ **3.5.10**॥ 119

अन्तरिक्षगतं देवं गीर्भिरग्र्याभिरैडयन्।
सह सम्भाषमाणे तु शरभङ्गेन वासवे॥ **3.5.11**॥ 120

दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत्।
रामोऽथ रथमुद्दिश्य भ्रातुर्दर्शयताद्भुतम्॥ **3.5.12**॥ 121

अर्चिष्मन्तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण।
प्रतपन्तमिवादित्यमन्तरिक्षगतं रथम्॥ **3.5.13**॥ 122

ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः।
अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम्॥ **3.5.14**॥ 123

इमे च पुरुषव्याघ्र ये तिष्ठन्त्यभितो दिशम्।
शतं शतं कुण्डलिनो युवानः खड्गपाणयः॥ **3.5.15**॥ 124

विस्तीर्णविपुलोरस्काः परिघायतबाहवः।
शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः॥ **3.5.16**॥ 125

उरोदेशेषु सर्वेषां हारा ज्वलनसन्निभाः।
रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम्॥ **3.5.17**॥ 126

एतद्धि किल देवानां वयो भवति नित्यदा।
यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः॥ **3.5.18**॥ 127

इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण।
यावज्जानाम्यहं व्यक्तं क एष द्युतिमान् रथे॥ **3.5.19**॥ 128

तमेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति।
अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति॥ **3.5.20**॥ 129

ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः।
शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत्॥ **3.5.21**॥ 130

इहोपयात्यसौ रामो यावन्मां नाभिभाषते।
निष्ठां नयत तावत् तु ततो मां द्रष्टुमर्हति॥ **3.5.22**॥ 131

जितवन्तं कृतार्थं हि तदाहमचिरादिमम्।
कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करम्॥ **3.5.23**॥ 132

अथ वज्री तमामन्त्र्य मानयित्वा च तापसम्।
रथेन हययुक्तेन ययौ दिवमरिन्दमः॥ **3.5.24**॥ 133

प्रयाते तु सहस्राक्षे राघवः सपरिच्छदः।
अग्निहोत्रमुपासीनं शरभङ्गमुपागमत्॥ **3.5.25**॥ 134

तस्य पादौ च सङ्गृह्य रामः सीता च लक्ष्मणः।
निषेदुस्तदनुज्ञाता लब्धवासा निमन्त्रिताः॥ **3.5.26**॥ 135

ततः शक्रोपयानं तु पर्यपृच्छत राघवः।
शरभङ्गश्च तत् सर्वं राघवाय न्यवेदयत्॥ **3.5.27**॥ 136

मामेष वरदो राम ब्रह्मलोकं निनीषति।
जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः॥ **3.5.28**॥ 137

अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः।
ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम्॥ **3.5.29**॥ 138

त्वयाहं पुरुषव्याघ्र धार्मिकेण महात्मना।
समागम्य गमिष्यामि त्रिदिवं चावरं परम्॥ **3.5.30**॥ 139

अक्षया नरशार्दूल जिता लोका मया शुभाः।
ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान्॥ **3.5.31**॥ 140

एवमुक्तो नरव्याघ्रः सर्वशास्त्रविशारदः।
ऋषिणा शरभङ्गेन राघवो वाक्यमब्रवीत्॥ **3.5.32**॥ 141

अहमेवाहरिष्यामि सर्वान् लोकान् महामुने।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने॥ **3.5.33**॥ 142

राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै।
शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद् वचः॥ **3.5.34**॥ 143

इह राम महातेजाः सुतीक्ष्णो नाम धार्मिकः।
वसत्यरण्ये नियतः स ते श्रेयो विधास्यति॥ **3.5.35**॥ 144

सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनम्।
रमणीये वनोद्देशे स ते वासं विधास्यति॥ **3.5.36**॥ 145

इमां मन्दाकिनीं राम प्रतिस्रोतामनुव्रज।
नदीं पुष्पोडुपवहां ततस्तत्र गमिष्यसि॥ **3.5.37**॥ 146

एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम्।
यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः॥ **3.5.38**॥ 147

ततोऽग्निं स समाधाय हुत्वा चाज्येन मन्त्रवत्।
शरभङ्गो महातेजाः प्रविवेश हुताशनम्॥ **3.5.39**॥ 148

तस्य रोमाणि केशांश्च तदा वह्निर्महात्मनः।
जीर्णां त्वचं तदस्थीनि यच्च मांसं च शोणितम्॥ **3.5.40**॥ 149

स च पावकसङ्काशः कुमारः समपद्यत।
उत्थायाग्निचयात् तस्माच्छरभङ्गो व्यरोचत॥ **3.5.41**॥ 150

स लोकानाहिताग्नीनामृषीणां च महात्मनाम्।
देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत॥ **3.5.42**॥ 151

स पुण्यकर्मा भुवने द्विजर्षभः
पितामहं सानुचरं ददर्श ह।
पितामहश्चापि समीक्ष्य तं द्विजं
ननन्द सुस्वागतमित्युवाच ह॥ **3.5.43**॥ 152

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्ठः सर्गः ॥

वानप्रस्थमुनीनां राक्षसात्याचारतः स्वरक्षणार्थं श्रीरामं प्रति प्रार्थना, श्रीरामकर्तृकं तेषामाश्वासनम्

शरभङ्गे दिवं प्राप्ते मुनिसङ्घाः समागताः।
अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ **3.6.1** ॥ 153

वैखानसा वालखिल्याः सम्प्रक्षाला मरीचिपाः।
अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः ॥ **3.6.2** ॥ 154

दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे।
गात्रशय्या अशय्याश्च तथैवानवकाशिकाः ॥ **3.6.3** ॥ 155

मुनयः सलिलाहारा वायुभक्षास्तथापरे।
आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ **3.6.4** ॥ 156

तथोर्ध्ववासिनो दान्तास्तथाऽऽर्द्रपटवाससः।
सजपाश्च तपोनिष्ठास्तथा पञ्चतपोऽन्विताः ॥ **3.6.5** ॥ 157

सर्वे ब्राह्म्या श्रिया युक्ता दृढयोगसमाहिताः।
शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ **3.6.6** ॥ 158

अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम्।
ऊचुः परमधर्मज्ञमृषिसङ्घाः समागताः ॥ **3.6.7** ॥ 159

त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथः।
प्रधानश्चापि नाथश्च देवानां मघवानिव॥ **3.6.8**॥ 160

विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च।
पितृव्रतत्वं सत्यं च त्वयि धर्मश्च पुष्कलः॥ **3.6.9**॥ 161

त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम्।
अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि॥ **3.6.10**॥ 162

अधर्मः सुमहान् नाथ भवेत् तस्य तु भूपतेः।
यो हरेद् बलिषड्भागं न च रक्षति पुत्रवत्॥ **3.6.11**॥ 163

युञ्जानः स्वानिव प्राणान् प्राणैरिष्टान् सुतानिव।
नित्ययुक्तः सदा रक्षन् सर्वान् विषयवासिनः॥ **3.6.12**॥ 164

प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम्।
ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते॥ **3.6.13**॥ 165

यत् करोति परं धर्मं मुनिर्मूलफलाशनः।
तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षतः॥ **3.6.14**॥ 166

सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान्।
त्वन्नाथोऽनाथवद् राम राक्षसैर्हन्यते भृशम्॥ **3.6.15**॥ 167

एहि पश्य शरीराणि मुनीनां भावितात्मनाम्।
हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने॥ **3.6.16**॥ 168

पम्पानदीनिवासानामनुमन्दाकिनीमपि।
चित्रकूटालयानां च क्रियते कदनं महत्॥ **3.6.17**॥ 169

एवं वयं न मृष्यामो विप्रकारं तपस्विनाम्।
क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः॥ **3.6.18**॥ 170

ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः।
परिपालय नो राम वध्यमानान् निशाचरैः॥ **3.6.19**॥ 171

परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते।
परिपालय नः सर्वान् राक्षसेभ्यो नृपात्मज॥ **3.6.20**॥ 172

एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम्।
इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः॥ **3.6.21**॥ 173

नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनाम्।
केवलेन स्वकार्येण प्रवेष्टव्यं वनं मया॥ **3.6.22**॥ 174

विप्रकारमपाक्रष्टुं राक्षसैर्भवतामिमम्।
पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम्॥ **3.6.23**॥ 175

भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया।
तस्य मेऽयं वने वासो भविष्यति महाफलः॥ **3.6.24**॥ 176

तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान्।
पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः॥ **3.6.25**॥ 177

दत्त्वा वरं चापि तपोधनानां
धर्मे धृतात्मा सह लक्ष्मणेन।
तपोधनैश्चापि सहार्यदत्तः
सुतीक्ष्णमेवाभिजगाम वीरः॥ **3.6.26**॥ 178

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षष्ठः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तमः सर्गः ॥

सीतालक्ष्मणसहितस्य श्रीरामस्य सुतीक्ष्णस्याश्रमं गत्वा तेन सह वार्तालापस्तेन च सत्कृतस्य तस्य तत्रैव रात्रौ निवासः

रामस्तु सहितो भ्रात्रा सीतया च परन्तपः।
सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः॥ **3.7.1** ॥ 179

स गत्वा दूरमध्वानं नदीस्तीर्त्वा बहूदकाः।
ददर्श विमलं शैलं महामेरुमिवोन्नतम्॥ **3.7.2** ॥ 180

ततस्तदिक्ष्वाकुवरौ सततं विविधैर्द्रुमैः।
काननं तौ विविशतुः सीतया सह राघवौ॥ **3.7.3** ॥ 181

प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम्।
ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम्॥ **3.7.4** ॥ 182

तत्र तापसमासीनं मलपङ्कजधारिणम्।
रामः सुतीक्ष्णं विधिवत् तपोधनमभाषत॥ **3.7.5** ॥ 183

रामोऽहमस्मि भगवन् भवन्तं द्रष्टुमागतः।
तन्माभिवद धर्मज्ञ महर्षे सत्यविक्रम॥ **3.7.6** ॥ 184

स निरीक्ष्य ततो धीरो रामं धर्मभृतां वरम्।
समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत्॥ **3.7.7** ॥ 185

स्वागतं ते रघुश्रेष्ठ राम सत्यभृतां वर।
आश्रमोऽयं त्वयाऽऽक्रान्तः सनाथ इव साम्प्रतम्॥ **3.7.8**॥ 186

प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः।
देवलोकमितो वीर देहं त्यक्त्वा महीतले॥ **3.7.9**॥ 187

चित्रकूटमुपादाय राज्यभ्रष्टोऽसि मे श्रुतः।
इहोपयातः काकुत्स्थ देवराजः शतक्रतुः॥ **3.7.10**॥ 188

उपागम्य च मे देवो महादेवः सुरेश्वरः।
सर्वान् लोकाञ्जितानाह मम पुण्येन कर्मणा॥ **3.7.11**॥ 189

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया।
मत्प्रसादात् सभार्यस्त्वं विहरस्व सलक्ष्मणः॥ **3.7.12**॥ 190

तमुग्रतपसं दीप्तं महर्षिं सत्यवादिनम्।
प्रत्युवाचात्मवान् रामो ब्रह्माणमिव वासवः॥ **3.7.13**॥ 191

अहमेवाहरिष्यामि स्वयं लोकान् महामुने।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने॥ **3.7.14**॥ 192

भवान् सर्वत्र कुशलः सर्वभूतहिते रतः।
आख्यातं शरभङ्गेन गौतमेन महात्मना॥ **3.7.15**॥ 193

एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः।
अब्रवीन्मधुरं वाक्यं हर्षेण महता युतः॥ **3.7.16**॥ 194

अयमेवाश्रमो राम गुणवान् रम्यतामिति।
ऋषिसङ्घानुचरितः सदा मूलफलैर्युतः॥ **3.7.17**॥ 195

इममाश्रममागम्य मृगसङ्घा महीयसः।
अहत्वा प्रतिगच्छन्ति लोभयित्वाकुतोभयाः॥ **3.7.18**॥ 196

नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै।
तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः॥ **3.7.19**॥ 197

उवाच वचनं धीरो विगृह्य सशरं धनुः।
तानहं सुमहाभाग मृगसङ्घान् समागतान्॥ **3.7.20**॥ 198

हन्यां निशितधारेण शरेणानतपर्वणा।
भवांस्तत्राभिषज्येत किं स्यात् कृच्छ्रतरं ततः॥ **3.7.21**॥ 199

एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये।
तमेवमुक्त्वोपरमं रामः सन्ध्यामुपागमत्॥ **3.7.22**॥ 200

अन्वास्य पश्चिमां सन्ध्यां तत्र वासमकल्पयत्।
सुतीक्ष्णस्याश्रमे रम्ये सीतया लक्ष्मणेन च॥ **3.7.23**॥ 201

ततः शुभं तापसयोग्यमन्नं
स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम्।
ताभ्यां सुसत्कृत्य ददौ महात्मा
सन्ध्यानिवृत्तौ रजनीं समीक्ष्य॥ **3.7.24**॥ 202

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टमः सर्गः ॥

प्रातः सुतीक्ष्णेनानुज्ञातस्य लक्ष्मणसीतासहितस्य श्रीरामस्य ततः प्रस्थानम्

रामस्तु सहसौमित्रिः सुतीक्ष्णेनाभिपूजितः।
परिणाम्य निशां तत्र प्रभाते प्रत्यबुध्यत ॥ **3.8.1** ॥ 203

उत्थाय च यथाकालं राघवः सह सीतया।
उपस्पृश्य सुशीतेन तोयेनोत्पलगन्धिना ॥ **3.8.2** ॥ 204

अथ तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ।
काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ **3.8.3** ॥ 205

उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः।
सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ **3.8.4** ॥ 206

सुखोषिताः स्म भगवंस्त्वया पूज्येन पूजिताः।
आपृच्छामः प्रयास्यामो मुनयस्त्वरयन्ति नः ॥ **3.8.5** ॥ 207

त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम्।
ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ **3.8.6** ॥ 208

अभ्यनुज्ञातुमिच्छामः सहैभिर्मुनिपुङ्गवैः।
धर्मनित्यैस्तपोदान्तैर्विशिखैरिव पावकैः ॥ **3.8.7** ॥ 209

अविषह्यातपो यावत् सूर्यो नातिविराजते।
अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः॥ **3.8.8**॥ 210

तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः।
ववन्दे सहसौमित्रिः सीतया सह राघवः॥ **3.8.9**॥ 211

तौ संस्पृशन्तौ चरणावुत्थाप्य मुनिपुङ्गवः।
गाढमाश्लिष्य सस्नेहमिदं वचनमब्रवीत्॥ **3.8.10**॥ 212

अरिष्टं गच्छ पन्थानं राम सौमित्रिणा सह।
सीतया चानया सार्धं छाययेवानुवृत्तया॥ **3.8.11**॥ 213

पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम्।
एषां तपस्विनां वीर तपसा भावितात्मनाम्॥ **3.8.12**॥ 214

सुप्राज्यफलमूलानि पुष्पितानि वनानि च।
प्रशस्तमृगयूथानि शान्तपक्षिगणानि च॥ **3.8.13**॥ 215

फुल्लपङ्कजखण्डानि प्रसन्नसलिलानि च।
कारण्डवविकीर्णानि तटाकानि सरांसि च॥ **3.8.14**॥ 216

द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च।
रमणीयान्यरण्यानि मयूराभिरुतानि च॥ **3.8.15**॥ 217

गम्यतां वत्स सौमित्रे भवानपि च गच्छतु।
आगन्तव्यं च ते दृष्ट्वा पुनरेवाश्रमं प्रति॥ **3.8.16**॥ 218

एवमुक्तस्तथेत्युक्त्वा काकुत्स्थः सहलक्ष्मणः।
प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे॥ **3.8.17**॥ 219

ततः शुभतरे तूणी धनुषी चायतेक्षणा।
ददौ सीता तयोर्भ्रात्रोः खड्गौ च विमलौ ततः॥ **3.8.18**॥ 220

आबध्य च शुभे तूणी चापे चादाय सस्वने।
निष्क्रान्तावाश्रमाद् गन्तुमुभौ तौ रामलक्ष्मणौ॥ **3.8.19**॥ 221

शीघ्रं तौ रूपसम्पन्नावनुज्ञातौ महर्षिणा।
प्रस्थितौ धृतचापासी सीतया सह राघवौ॥ **3.8.20**॥ 222

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवमः सर्गः ॥

अनागसां देहिनामहिंसनायाहिंसाधर्मस्य पालनाय च सीतायाः श्रीरामं प्रति प्रार्थनम्

सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनम्।
हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत्॥ **3.9.1** ॥ 223

अधर्मं तु सुसूक्ष्मेण विधिना प्राप्यते महान्।
निवृत्तेन च शक्योऽयं व्यसनात् कामजादिह॥ **3.9.2** ॥ 224

त्रीण्येव व्यसनान्यत्र कामजानि भवन्त्युत।
मिथ्यावाक्यं तु परमं तस्माद् गुरुतरावुभौ॥ **3.9.3** ॥ 225

परदाराभिगमनं विना वैरं च रौद्रता।
मिथ्यावाक्यं न ते भूतं न भविष्यति राघव॥ **3.9.4** ॥ 226

कुतोऽभिलषणं स्त्रीणां परेषां धर्मनाशनम्।
तव नास्ति मनुष्येन्द्र न चाभूत् ते कदाचन॥ **3.9.5** ॥ 227

मनस्यपि तथा राम न चैतद् विद्यते क्वचित्।
स्वदारनिरतश्चैव नित्यमेव नृपात्मज॥ **3.9.6** ॥ 228

धर्मिष्ठः सत्यसन्धश्च पितुर्निर्देशकारकः।
त्वयि धर्मश्च सत्यं च त्वयि सर्वं प्रतिष्ठितम्॥ **3.9.7** ॥ 229

तच्च सर्वं महाबाहो शक्यं वोढुं जितेन्द्रियैः।
तव वश्येन्द्रियत्वं च जानामि शुभदर्शन॥ **3.9.8**॥ 230

तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम्।
निर्वैरं क्रियते मोहात् तच्च ते समुपस्थितम्॥ **3.9.9**॥ 231

प्रतिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम्।
ऋषीणां रक्षणार्थाय वधः संयति रक्षसाम्॥ **3.9.10**॥ 232

एतन्निमित्तं च वनं दण्डका इति विश्रुतम्।
प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः॥ **3.9.11**॥ 233

ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः।
त्वद्वृत्तं चिन्तयन्त्या वै भवेन्निःश्रेयसं हितम्॥ **3.9.12**॥ 234

नहि मे रोचते वीर गमनं दण्डकान् प्रति।
कारणं तत्र वक्ष्यामि वदन्त्याः श्रूयतां मम॥ **3.9.13**॥ 235

त्वं हि बाणधनुष्पाणिर्भ्रात्रा सह वनं गतः।
दृष्ट्वा वनचरान् सर्वान् कच्चित् कुर्याः शरव्ययम्॥ **3.9.14**॥ 236

क्षत्रियाणामिह धनुर्हुताशस्येन्धनानि च।
समीपतः स्थितं तेजोबलमुच्छ्रयते भृशम्॥ **3.9.15**॥ 237

पुरा किल महाबाहो तपस्वी सत्यवाञ्शुचिः।
कस्मिंश्चिदभवत् पुण्ये वने रतमृगद्विजे॥ **3.9.16**॥ 238

तस्यैव तपसो विघ्नं कर्तुमिन्द्रः शचीपतिः।
खड्गपाणिरथागच्छदाश्रमं भटरूपधृक्॥ **3.9.17**॥ 239

तस्मिंस्तदाश्रमपदे निहितः खड्ग उत्तमः।
स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः॥ **3.9.18**॥ 240

स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः।
वने तु विचरत्येव रक्षन् प्रत्ययमात्मनः॥ **3.9.19**॥ 241

यत्र गच्छत्युपादातुं मूलानि च फलानि च।
न विना याति तं खड्गं न्यासरक्षणतत्परः॥ **3.9.20**॥ 242

नित्यं शस्त्रं परिवहन् क्रमेण स तपोधनः।
चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम्॥ **3.9.21**॥ 243

ततः स रौद्राभिरतः प्रमत्तोऽधर्मकर्षितः।
तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः॥ **3.9.22**॥ 244

एवमेतत् पुरावृत्तं शस्त्रसंयोगकारणम्।
अग्निसंयोगवद्धेतुः शस्त्रसंयोग उच्यते॥ **3.9.23**॥ 245

स्नेहाच्च बहुमानाच्च स्मारये त्वां तु शिक्षये।
न कथञ्चन सा कार्या गृहीतधनुषा त्वया॥ **3.9.24**॥ 246

बुद्धिर्वैरं विना हन्तुं राक्षसान् दण्डकाश्रितान्।
अपराधं विना हन्तुं लोको वीर न मंस्यते॥ **3.9.25**॥ 247

क्षत्रियाणां तु वीराणां वनेषु नियतात्मनाम्।
धनुषा कार्यमेतावदार्तानामभिरक्षणम्॥ **3.9.26**॥ 248

क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च।
व्याविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम्॥ **3.9.27**॥ 249

कदर्यकलुषा बुद्धिर्जायते शस्त्रसेवनात्।
पुनर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि॥ **3.9.28**॥ 250

अक्षया तु भवेत् प्रीतिः श्वश्रूश्वशुरयोर्मम।
यदि राज्यं हि सन्न्यस्य भवेस्त्वं निरतो मुनिः॥ **3.9.29**॥ 251

धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।
धर्मेण लभते सर्वं धर्मसारमिदं जगत्॥ **3.9.30**॥ 252

आत्मानं नियमैस्तैस्तैः कर्षयित्वा प्रयत्नतः।
प्राप्तये निपुणैर्धर्मो न सुखाल्लभते सुखम्॥ **3.9.31**॥ 253

नित्यं शुचिमतिः सौम्य चर धर्मं तपोवने।
सर्वं तु विदितं तुभ्यं त्रैलोक्यामपि तत्त्वतः॥ **3.9.32**॥ 254

स्त्रीचापलादेतदुपाहृतं मे
धर्मं च वक्तुं तव कः समर्थः।
विचार्य बुद्ध्या तु सहानुजेन
यद् रोचते तत् कुरु माचिरेण॥ **3.9.33**॥ 255

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे नवमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशमः सर्गः ॥

श्रीरामेण मुनीनां संरक्षणाय रक्षसां वधाय कृतायाः प्रतिज्ञायाः पालने दृढमवस्थानाय स्वविचारस्य प्रकटनम्

वाक्यमेतत् तु वैदेह्या व्याहृतं भर्तृभक्तया।
श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ जानकीम्॥ **3.10.1** ॥ 256

हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः।
कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे॥ **3.10.2** ॥ 257

किं नु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः।
क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति॥ **3.10.3** ॥ 258

ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः।
मां सीते स्वयमागम्य शरण्यं शरणं गताः॥ **3.10.4** ॥ 259

वसन्तः कालकालेषु वने मूलफलाशनाः।
न लभन्ते सुखं भीरु राक्षसैः क्रूरकर्मभिः॥ **3.10.5** ॥ 260

भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः।
ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः॥ **3.10.6** ॥ 261

अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः।
मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतम्॥ **3.10.7** ॥ 262

कृत्वा वचनशुश्रूषां वाक्यमेतदुदाहृतम्।
प्रसीदन्तु भवन्तो मे ह्रीरेषा तु ममातुला॥ **3.10.8**॥ 263

यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः।
किं करोमीति च मया व्याहृतं द्विजसन्निधौ॥ **3.10.9**॥ 264

सर्वैरेव समागम्य वागियं समुदाहृता।
राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः॥ **3.10.10**॥ 265

अर्दिताः स्म भृशं राम भवान् नस्तत्र रक्षतु।
होमकाले तु सम्प्राप्ते पर्वकालेषु चानघ॥ **3.10.11**॥ 266

धर्षयन्ति सुदुर्धर्षा राक्षसाः पिशिताशनाः।
राक्षसैर्धर्षितानां च तापसानां तपस्विनाम्॥ **3.10.12**॥ 267

गतिं मृगयमाणानां भवान् नः परमा गतिः।
कामं तपःप्रभावेण शक्ता हन्तुं निशाचरान्॥ **3.10.13**॥ 268

चिरार्जितं न चेच्छामस्तपः खण्डयितुं वयम्।
बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव॥ **3.10.14**॥ 269

तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः।
तदर्द्यमानान् रक्षोभिर्दण्डकारण्यवासिभिः॥ **3.10.15**॥ 270

रक्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने।
मया चैतद्वचः श्रुत्वा कात्स्न्र्येन परिपालनम्॥ **3.10.16**॥ 271

ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे।
संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम्॥ **3.10.17**॥ 272

मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा।
अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्॥ **3.10.18**॥ 273

न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः।
तदवश्यं मया कार्यमृषीणां परिपालनम्॥ **3.10.19**॥ 274

अनुक्तेनापि वैदहि प्रतिज्ञाय कथं पुनः।
मम स्नेहाच्च सौहार्दादिदमुक्तं त्वया वचः॥ **3.10.20**॥ 275

परितुष्टोऽस्म्यहं सीते न ह्यनिष्टोऽनुशास्यते।
सदृशं चानुरूपं च कुलस्य तव शोभने।
सधर्मचारिणी मे त्वं प्राणेभ्योऽपि गरीयसी॥ **3.10.21**॥ 276

इत्येवमुक्त्वा वचनं महात्मा
सीतां प्रियां मैथिलराजपुत्रीम्।
रामो धनुष्मान् सह लक्ष्मणेन
जगाम रम्याणि तपोवनानि॥ **3.10.22**॥ 277

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे दशमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशः सर्गः ॥

पञ्चाप्सरस्तीर्थस्य माण्डकर्णिमुनेश्च कथा नानाश्रमेषु विहृत्य श्रीरामप्रभृतीनां सुतीक्ष्णस्याश्रमे समागमनं तत्र किञ्चित् कालं स्थित्वा मुनेराज्ञयागस्त्यभ्रातुरगस्त्यस्य चाश्रमयोर्गमनमगस्त्य प्रभावस्य च वर्णनम्

अग्रतः प्रययौ रामः सीता मध्ये सुशोभना।
पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह॥ **3.11.1** ॥ 278

तौ पश्यमानौ विविधाञ्शैलप्रस्थान् वनानि च।
नदीश्च विविधा रम्या जग्मतुः सह सीतया॥ **3.11.2** ॥ 279

सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः।
सरांसि च सपद्मानि युतानि जलजैः खगैः॥ **3.11.3** ॥ 280

यूथबद्धांश्च पृषतान् मदोन्मत्तान् विषाणिनः।
महिषांश्च वराहांश्च गजांश्च द्रुमवैरिणः॥ **3.11.4** ॥ 281

ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे।
ददृशुः सहिता रम्यं तटाकं योजनायुतम्॥ **3.11.5** ॥ 282

पद्मपुष्करसम्बाधं गजयूथैरलङ्कृतम्।
सारसैर्हंसकादम्बैः सङ्कुलं जलजातिभिः॥ **3.11.6** ॥ 283

प्रसन्नसलिले रम्ये तस्मिन् सरसि शुश्रुवे।
गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते॥ **3.11.7**॥ 284

ततः कौतूहलाद् रामो लक्ष्मणश्च महारथः।
मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे॥ **3.11.8**॥ 285

इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने।
कौतूहलं महज्जातं किमिदं साधु कथ्यताम्॥ **3.11.9**॥ 286

तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा।
प्रभावं सरसः क्षिप्रमाख्यातुमुपचक्रमे॥ **3.11.10**॥ 287

इदं पञ्चाप्सरो नाम तटाकं सार्वकालिकम्।
निर्मितं तपसा राम मुनिना माण्डकर्णिना॥ **3.11.11**॥ 288

स हि तेपे तपस्तीव्रं माण्डकर्णिर्महामुनिः।
दशवर्षसहस्राणि वायुभक्षो जलाशये॥ **3.11.12**॥ 289

ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः।
अब्रुवन् वचनं सर्वे परस्परसमागताः॥ **3.11.13**॥ 290

अस्माकं कस्यचित् स्थानमेष प्रार्थयते मुनिः।
इति संविग्नमनसः सर्वे तत्र दिवौकसः॥ **3.11.14**॥ 291

ततः कर्तुं तपोविघ्नं सर्वदेवैर्नियोजिताः।
प्रधानाप्सरसः पञ्च विद्युच्चलितवर्चसः॥ **3.11.15**॥ 292

अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः।
नीतो मदनवश्यत्वं देवानां कार्यसिद्धये॥ **3.11.16**॥ 293

ताश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः।
तटाके निर्मितं तासां तस्मिन्नन्तर्हितं गृहम्॥ **3.11.17**॥ 294

तत्रैवाप्सरसः पञ्च निवसन्त्यो यथासुखम्।
रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम्॥ **3.11.18**॥ 295

तासां सङ्क्रीडमानानामेष वादित्रनिःस्वनः।
श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः॥ **3.11.19**॥ 296

आश्चर्यमिति तस्यैतद् वचनं भावितात्मनः।
राघवः प्रतिजग्राह सह भ्रात्रा महायशाः॥ **3.11.20**॥ 297

एवं कथयमानः स ददर्शाश्रममण्डलम्।
कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम्॥ **3.11.21**॥ 298

प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः।
तदा तस्मिन् स काकुत्स्थः श्रीमत्याश्रममण्डले॥ **3.11.22**॥ 299

उषित्वा स सुखं तत्र पूज्यमानो महर्षिभिः।
जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम्॥ **3.11.23**॥ 300

येषामुषितवान् पूर्वं सकाशे स महास्त्रवित्।
क्वचित् परिदशान् मासानेकसंवत्सरं क्वचित्॥ **3.11.24**॥ 301

क्वचिच्च चतुरो मासान् पञ्च षट् च परान् क्वचित्।
अपरत्राधिकान् मासानध्यर्धमधिकं क्वचित्॥ **3.11.25**॥ 302

त्रीन् मासानष्टमासांश्च राघवो न्यवसत् सुखम्।
तत्र संवसतस्तस्य मुनीनामाश्रमेषु वै॥ **3.11.26**॥ 303

रमतश्चानुकूल्येन ययुः संवत्सरा दश।
परिसृत्य च धर्मज्ञो राघवः सह सीतया॥ **3.11.27**॥ 304

सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह।
स तमाश्रममागम्य मुनिभिः परिपूजितः॥ **3.11.28**॥ 305

तत्रापि न्यवसद् रामः किञ्चित् कालमरिंदमः।
अथाश्रमस्थो विनयात् कदाचित् तं महामुनिम्॥ **3.11.29**॥ 306

उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत्।
अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः॥ **3.11.30**॥ 307

वसतीति मया नित्यं कथाः कथयतां श्रुतम्।
न तु जानामि तं देशं वनस्यास्य महत्तया॥ **3.11.31**॥ 308

कुत्राश्रमपदं रम्यं महर्षेस्तस्य धीमतः।
प्रसादार्थं भगवतः सानुजः सह सीतया॥ **3.11.32**॥ 309

अगस्त्यमधिगच्छेयमभिवादयितुं मुनिम्।
मनोरथो महानेष हृदि सम्परिवर्तते॥ **3.11.33**॥ 310

यदहं तं मुनिवरं शुश्रूषेयमपि स्वयम्।
इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः॥ **3.11.34**॥ 311

सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम्।
अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम्॥ **3.11.35**॥ 312

अगस्त्यमभिगच्छेति सीतया सह राघव।
दिष्ट्या त्विदानीमर्थेऽस्मिन् स्वयमेव ब्रवीषि माम्॥ **3.11.36**॥ 313

अयमाख्यामि ते राम यत्रागस्त्यो महामुनिः।
योजनान्याश्रमात् तात याहि चत्वारि वै ततः।
दक्षिणेन महाञ्छ्रीमानगस्त्य भ्रातुराश्रमः॥ **3.11.37**॥ 314

स्थलीप्रायवनोद्देशे पिप्पलीवनशोभिते।
बहुपुष्पफले रम्ये नानाविहगनादिते॥ **3.11.38**॥ 315

पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः॥ **3.11.39**॥ 316

तत्रैकां रजनीं व्युष्य प्रभाते राम गम्यताम्।
दक्षिणां दिशमास्थाय वनखण्डस्य पार्श्वतः॥ **3.11.40**॥ 317

तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम्।
रमणीये वनोद्देशे बहुपादपशोभिते॥ **3.11.41**॥ 318

रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह।
स हि रम्यो वनोद्देशो बहुपादपसंयुतः॥ **3.11.42**॥ 319

यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम्।
अद्यैव गमने बुद्धिं रोचयस्व महामते॥ **3.11.43**॥ 320

इति रामो मुनेः श्रुत्वा सह भ्रात्राभिवाद्य च।
प्रतस्थेऽगस्त्यमुद्दिश्य सानुगः सह सीतया॥ **3.11.44**॥ 321

पश्यन् वनानि चित्राणि पर्वतांश्चाभ्रसन्निभान्।
सरांसि सरितश्चैव पथि मार्गवशानुगान्॥ **3.11.45**॥ 322

सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम्।
इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत्॥ **3.11.46**॥ 323

एतदेवाश्रमपदं नूनं तस्य महात्मनः।
अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः॥ **3.11.47**॥ 324

यथा हीमे वनस्यास्य ज्ञाताः पथि सहस्रशः।
सन्नताः फलभारेण पुष्पभारेण च द्रुमाः॥ **3.11.48**॥ 325

पिप्पलीनां च पक्वानां वनादस्मादुपागतः।
गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः॥ **3.11.49**॥ 326

तत्र तत्र च दृश्यन्ते सङ्क्षिप्ताः काष्ठसञ्चयाः।
लूनाश्च परिदृश्यन्ते दर्भा वैदूर्यवर्चसः॥ **3.11.50**॥ 327

एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम्।
पावकस्याश्रमस्थस्य धूमाग्रं सम्प्रदृश्यते॥ **3.11.51**॥ 328

विविक्तेषु च तीर्थेषु कृतस्नाना द्विजातयः।
पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः॥ **3.11.52**॥ 329

ततः सुतीक्ष्णवचनं यथा सौम्य मया श्रुतम्।
अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति॥ **3.11.53**॥ 330

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया।
यस्य भ्रात्रा कृतेयं दिक्शरण्या पुण्यकर्मणा॥ **3.11.54**॥ 331

इहैकदा किल क्रूरो वातापिरपि चेल्वलः।
भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ॥ **3.11.55**॥ 332

धारयन् ब्राह्मणं रूपमिल्वलः संस्कृतं वदन्।
आमन्त्रयति विप्रान् स श्राद्धमुद्दिश्य निर्घृणः॥ **3.11.56**॥ 333

भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम्।
तान् द्विजान् भोजयामास श्राद्धदृष्टेन कर्मणा॥ **3.11.57**॥ 334

ततो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत्।
वातापे निष्क्रमस्वेति स्वरेण महता वदन्॥ **3.11.58**॥ 335

ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन्।
भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत्॥ **3.11.59**॥ 336

ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः।
विनाशितानि संहत्य नित्यशः पिशिताशनैः॥ **3.11.60**॥ 337

अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा।
अनुभूय किल श्राद्धे भक्षितः स महासुरः॥ **3.11.61**॥ 338

ततः सम्पन्नमित्युक्त्वा दत्त्वा हस्तेऽवनेजनम्।
भ्रातरं निष्क्रमस्वेति चेल्वलः समभाषत॥ **3.11.62**॥ 339

स तदा भाषमाणं तु भ्रातरं विप्रघातिनम्।
अब्रवीत् प्रहसन् धीमानगस्त्यो मुनिसत्तमः॥ **3.11.63**॥ 340

कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः।
भ्रातुस्तु मेषरूपस्य गतस्य यमसादनम्॥ **3.11.64**॥ 341

अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितम्।
प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः॥ **3.11.65**॥ 342

सोऽभ्यद्रवद् द्विजेन्द्रं तं मुनिना दीप्ततेजसा।
चक्षुषानलकल्पेन निर्दग्धो निधनं गतः॥ **3.11.66**॥ 343

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः।
विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम्॥ **3.11.67**॥ 344

एवं कथयमानस्य तस्य सौमित्रिणा सह।
रामस्यास्तं गतः सूर्यः सन्ध्याकालोऽभ्यवर्तत॥ **3.11.68**॥ 345

उपास्य पश्चिमां सन्ध्यां सह भ्रात्रा यथाविधि।
प्रविवेशाश्रमपदं तमृषिं चाभ्यवादयत्॥ **3.11.69**॥ 346

सम्यक्प्रतिगृहीतस्तु मुनिना तेन राघवः।
न्यवसत् तां निशामेकां प्राश्य मूलफलानि च॥ **3.11.70**॥ 347

तस्यां रात्र्यां व्यतीतायामुदिते रविमण्डले।
भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः॥ **3.11.71**॥ 348

अभिवादये त्वां भगवन् सुखमस्म्युषितो निशाम्।
आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम्॥ **3.11.72**॥ 349

गम्यतामिति तेनोक्तो जगाम रघुनन्दनः।
यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन्॥ **3.11.73**॥ 350

नीवारान् पनसान् सालान् वञ्जुलांस्तिनिशांस्तथा।
चिरिबिल्वान् मधूकांश्च बिल्वानथ च तिन्दुकान्॥ **3.11.74**॥ 351

पुष्पितान् पुष्पिताग्राभिर्लताभिरुपशोभितान्।
ददर्श रामः शतशस्तत्र कान्तारपादपान्॥ **3.11.75**॥ 352

हस्तिहस्तैर्विमृदितान् वानरैरुपशोभितान्।
मत्तैः शकुनिसङ्घैश्च शतशः प्रतिनादितान्॥ **3.11.76**॥ 353

ततोऽब्रवीत् समीपस्थं रामो राजीवलोचनः।
पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम्॥ **3.11.77**॥ 354

स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः।
आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः॥ **3.11.78**॥ 355

अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा।
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः॥ **3.11.79**॥ 356

प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः॥ **3.11.80**॥ 357

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया।
दक्षिणा दिक् कृता येन शरण्या पुण्यकर्मणा॥ **3.11.81**॥ 358

तस्येदमाश्रमपदं प्रभावाद् यस्य राक्षसैः।
दिगियं दक्षिणा त्रासाद् दृश्यते नोपभुज्यते॥ **3.11.82**॥ 359

यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा।
तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः॥ **3.11.83**॥ 360

नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा।
प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः॥ **3.11.84**॥ 361

मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः।
सन्देशं पालयंस्तस्य विन्ध्यशैलो न वर्धते॥ **3.11.85**॥ 362

अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः।
अगस्त्यस्याश्रमः श्रीमान् विनीतमृगसेवितः॥ **3.11.86**॥ 363

एष लोकार्चितः साधुर्हिते नित्यं रतः सताम्।
अस्मानधिगतानेष श्रेयसा योजयिष्यति॥ **3.11.87**॥ 364

आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम्।
शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो॥ **3.11.88**॥ 365

अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
अगस्त्यं नियताहाराः सततं पर्युपासते॥ **3.11.89**॥ 366

नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः।
नृशंसः पापवृत्तो वा मुनिरेष तथाविधः॥ **3.11.90**॥ 367

अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह।
वसन्ति नियताहारा धर्ममाराधयिष्णवः॥ **3.11.91**॥ 368

अत्र सिद्धा महात्मानो विमानैः सूर्यसन्निभैः।
त्यक्त्वा देहान् नवैर्देहैः स्वर्याताः परमर्षयः॥ **3.11.92**॥ 369

यक्षत्वममरत्वं च राज्यानि विविधानि च।
अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः॥ **3.11.93**॥ 370

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः।
निवेदयेह मां प्राप्तमृषये सीतया सह॥ **3.11.94**॥ 371

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वादशः सर्गः ॥

श्रीरामप्रभृतीनामगस्त्यस्याश्रमे प्रवेशस्तत्र तेषामातिथ्यं मुनेः सकाशाच्च तेभ्यो दिव्यास्त्रशस्त्राणां प्राप्तिः

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः।
अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ **3.12.1** ॥ 372

राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली।
रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ **3.12.2** ॥ 373

लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः।
अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ **3.12.3** ॥ 374

ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात्।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ **3.12.4** ॥ 375

तस्य तद् वचनं श्रुत्वा लक्ष्मणस्य तपोधनः।
तथेत्युक्त्वाग्निशरणं प्रविवेश निवेदितुम् ॥ **3.12.5** ॥ 376

स प्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणम्।
कृताञ्जलिरुवाचेदं रामागमनमञ्जसा ॥ **3.12.6** ॥ 377

यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य सम्मतः।
पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ॥ **3.12.7** ॥ 378

प्रविष्टावाश्रमपदं सीतया सह भार्यया।
द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिन्दमौ॥ **3.12.8**॥ 379

यदत्रानन्तरं तत् त्वमाज्ञापयितुमर्हसि।
ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम्॥ **3.12.9**॥ 380

वैदेहीं च महाभागामिदं वचनमब्रवीत्।
दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः॥ **3.12.10**॥ 381

मनसा काङ्क्षितं ह्यस्य मयाप्यागमनं प्रति।
गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः॥ **3.12.11**॥ 382

प्रवेश्यतां समीपं मे किमसौ न प्रवेशितः।
एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना॥ **3.12.12**॥ 383

अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः।
तदा निष्क्रम्य सम्भ्रान्तः शिष्यो लक्ष्मणमब्रवीत्॥ **3.12.13**॥ 384

कोऽसौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम्।
ततो गत्वाऽऽश्रमपदं शिष्येण सह लक्ष्मणः॥ **3.12.14**॥ 385

दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम्।
तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन्॥ **3.12.15**॥ 386

प्रावेशयद् यथान्यायं सत्कारार्हं सुसत्कृतम्।
प्रविवेश ततो रामः सीतया सह लक्ष्मणः॥ **3.12.16**॥ 387

प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन्।
स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च॥ **3.12.17**॥ 388

विष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः।
सोमस्थानं भगस्थानं स्थानं कौबेरमेव च॥ **3.12.18**॥ 389

धातुर्विधातुः स्थानं च वायोः स्थानं तथैव च।
स्थानं च पाशहस्तस्य वरुणस्य महात्मनः॥ **3.12.19**॥ 390

स्थानं तथैव गायत्र्या वसूनां स्थानमेव च।
स्थानं च नागराजस्य गरुडस्थानमेव च॥ **3.12.20**॥ 391

कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति।
ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत्॥ **3.12.21**॥ 392

तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसाम्।
अब्रवीद् वचनं वीरो लक्ष्मणं लक्ष्मिवर्धनम्॥ **3.12.22**॥ 393

बहिर्लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः।
औदार्येणावगच्छामि निधानं तपसामिमम्॥ **3.12.23**॥ 394

एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम्।
जग्राहापततस्तस्य पादौ च रघुनन्दनः॥ **3.12.24**॥ 395

अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः।
सीतया सह वैदेह्या तदा रामः सलक्ष्मणः॥ **3.12.25**॥ 396

प्रतिगृह्य च काकुत्स्थमर्चयित्वाऽऽसनोदकैः।
कुशलप्रश्नमुक्त्वा च आस्यतामिति सोऽब्रवीत्॥ **3.12.26**॥ 397

अग्निं हुत्वा प्रदायार्घ्यमतिथीन् प्रतिपूज्य च।
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ॥ **3.12.27**॥ 398

प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः।
उवाच राममासीनं प्राञ्जलिं धर्मकोविदम्॥ **3.12.28**॥ 399

अग्निं हुत्वा प्रदायार्घ्यमतिथिं प्रतिपूजयेत्।
अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन्।
दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत्॥ **3.12.29**॥ 400

राजा सर्वस्य लोकस्य धर्मचारी महारथः।
पूजनीयश्च मान्यश्च भवान् प्राप्तः प्रियातिथिः॥ **3.12.30**॥ 401

एवमुक्त्वा फलैर्मूलैः पुष्पैश्चान्यैश्च राघवम्।
पूजयित्वा यथाकामं ततोऽगस्त्यस्तमब्रवीत्॥ **3.12.31**॥ 402

इदं दिव्यं महच्चापं हेमवज्रविभूषितम्।
वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा॥ **3.12.32**॥ 403

अमोघः सूर्यसङ्काशो ब्रह्मदत्तः शरोत्तमः।
दत्तौ मम महेन्द्रेण तूणी चाक्षय्यसायकौ॥ **3.12.33**॥ 404

सम्पूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः।
महाराजतकोशोऽयमसिर्हेमविभूषितः॥ **3.12.34**॥ 405

अनेन धनुषा राम हत्वा सङ्ख्ये महासुरान्।
आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम्॥ **3.12.35**॥ 406

तद्धनुस्तौ च तूणी च शरं खड्गं च मानद।
जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा॥ **3.12.36**॥ 407

एवमुक्त्वा महातेजाः समस्तं तद्धरायुधम्।
दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत्॥ **3.12.37**॥ 408

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्वादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोदशः सर्गः ॥

महर्षिणागस्त्येन श्रीरामं प्रति परितोषं प्रकट्य सीतायाः प्रशंसनं श्रीरामेण पृष्टेन तेन पञ्चवट्यामाश्रमं निर्माय तत्रावस्थातुमाज्ञाप्रदानं श्रीरामप्रभृतीनां ततः प्रस्थानं च

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण।
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ **3.13.1** ॥ 409

अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः।
व्यक्तमुत्कण्ठते वापि मैथिली जनकात्मजा ॥ **3.13.2** ॥ 410

एषा च सुकुमारी च खेदैश्च न विमानिता।
प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ **3.13.3** ॥ 411

यथैषा रमते राम इह सीता तथा कुरु।
दुष्करं कृतवत्येषा वने त्वामभिगच्छती ॥ **3.13.4** ॥ 412

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन।
समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च ॥ **3.13.5** ॥ 413

शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ **3.13.6** ॥ 414

इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता।
श्लाघ्या च व्यपदेश्या च यथा देवीष्वरुन्धती ॥ **3.13.7** ॥ 415

अलङ्कृतोऽयं देशश्च यत्र सौमित्रिणा सह।
वैदेह्या चानया राम वत्स्यसि त्वमरिन्दम॥ **3.13.8**॥ 416

एवमुक्तस्तु मुनिना राघवः संयताञ्जलिः।
उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम्॥ **3.13.9**॥ 417

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गवः।
गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति॥ **3.13.10**॥ 418

किं तु व्यादिश मे देशं सोदकं बहुकाननम्।
यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम्॥ **3.13.11**॥ 419

ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितम्।
ध्यात्वा मुहूर्तं धर्मात्मा ततोवाच वचः शुभम्॥ **3.13.12**॥ 420

इतो द्वियोजने तात बहुमूलफलोदकः।
देशो बहुमृगः श्रीमान् पञ्चवट्यभिविश्रुतः॥ **3.13.13**॥ 421

तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह।
रमस्व त्वं पितुर्वाक्यं यथोक्तमनुपालयन्॥ **3.13.14**॥ 422

विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ।
तपसश्च प्रभावेण स्नेहाद् दशरथस्य च॥ **3.13.15**॥ 423

हृदयस्थं च ते च्छन्दो विज्ञातं तपसा मया।
इह वासं प्रतिज्ञाय मया सह तपोवने॥ **3.13.16**॥ 424

अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति।
स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते॥ **3.13.17**॥ 425

स देशः श्लाघनीयश्च नातिदूरे च राघव।
गोदावर्याः समीपे च मैथिली तत्र रंस्यते॥ **3.13.18**॥ 426

प्राज्यमूलफलैश्चैव नानाद्विजगणैर्युतः।
विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च॥ **3.13.19**॥ 427

भवानपि सदाचारः शक्तश्च परिरक्षणे।
अपि चात्र वसन् राम तापसान् पालयिष्यसि॥ **3.13.20**॥ 428

एतदालक्ष्यते वीर मधूकानां महावनम्।
उत्तरेणास्य गन्तव्यं न्यग्रोधमपि गच्छता॥ **3.13.21**॥ 429

ततः स्थलमुपारुह्य पर्वतस्याविदूरतः।
ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः॥ **3.13.22**॥ 430

अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह।
सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम्॥ **3.13.23**॥ 431

तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ।
तमाश्रमं पञ्चवटीं जग्मतुः सह सीतया॥ **3.13.24**॥ 432

गृहीतचापौ तु नराधिपात्मजौ
विषक्ततूणी समरेष्वकातरौ।
यथोपदिष्टेन पथा महर्षिणा
प्रजग्मतुः पञ्चवटीं समाहितौ॥ **3.13.25**॥ 433

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रयोदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्दशः सर्गः ॥

पञ्चवटीमार्गे जटायुषो दर्शनं तस्य श्रीरामं प्रति स्वस्य विस्तरेण परिचयदानम्

अथ पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः।
आससाद महाकायं गृध्रं भीमपराक्रमम्॥ **3.14.1** ॥ 434

तं दृष्ट्वा तौ महाभागौ वनस्थं रामलक्ष्मणौ।
मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति॥ **3.14.2** ॥ 435

ततो मधुरया वाचा सौम्यया प्रीणयन्निव।
उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः॥ **3.14.3** ॥ 436

स तं पितृसखं मत्वा पूजयामास राघवः।
स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च॥ **3.14.4** ॥ 437

रामस्य वचनं श्रुत्वा कुलमात्मानमेव च।
आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवम्॥ **3.14.5** ॥ 438

पूर्वकाले महाबाहो ये प्रजापतयोऽभवन्।
तान् मे निगदतः सर्वानादितः शृणु राघव॥ **3.14.6** ॥ 439

कर्दमः प्रथमस्तेषां विकृतस्तदनन्तरम्।
शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान्॥ **3.14.7** ॥ 440

स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः।
पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा॥ **3.14.8**॥ 441

दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव।
कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः॥ **3.14.9**॥ 442

प्रजापतेस्तु दक्षस्य बभूवुरिति विश्रुताः।
षष्टिर्दुहितरो राम यशस्विन्यो महायशः॥ **3.14.10**॥ 443

कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः।
अदितिं च दितिं चैव दनूमपि च कालकाम्॥ **3.14.11**॥ 444

ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि।
तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत्॥ **3.14.12**॥ 445

पुत्रांस्त्रैलोक्यभर्तॄन् वै जनयिष्यथ मत्समान्।
अदितिस्तन्मना राम दितिश्च दनुरेव च॥ **3.14.13**॥ 446

कालका च महाबाहो शेषास्त्वमनसोऽभवन्।
अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिन्दम॥ **3.14.14**॥ 447

आदित्या वसवो रुद्रा अश्विनौ च परन्तप।
दितिस्त्वजनयत् पुत्रान् दैत्यांस्तात यशस्विनः॥ **3.14.15**॥ 448

तेषामियं वसुमती पुराऽऽसीत् सवनार्णवा।
दनुस्त्वजनयत् पुत्रमश्वग्रीवमरिंदम॥ **3.14.16**॥ 449

नरकं कालकं चैव कालकापि व्यजायत।
क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम्॥ **3.14.17**॥ 450

ताम्रा तु सुषुवे कन्याः पञ्चैता लोकविश्रुताः।
उलूकाञ्जनयत् क्रौञ्ची भासी भासान् व्यजायत॥ **3.14.18**॥ 451

श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः।
धृतराष्ट्री तु हंसांश्च कलहंसाश्च सर्वशः॥ **3.14.19**॥ 452

चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी।
शुकी नतां विजज्ञे तु नतायां विनता सुता॥ **3.14.20**॥ 453

दश क्रोधवशा राम विजज्ञेऽप्यात्मसम्भवाः।
मृगीं च मृगमन्दां च हरीं भद्रमदामपि॥ **3.14.21**॥ 454

मातङ्गीमथ शार्दूलीं श्वेतां च सुरभीं तथा।
सर्वलक्षणसम्पन्नां सुरसां कद्रुकामपि॥ **3.14.22**॥ 455

अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम।
ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा॥ **3.14.23**॥ 456

ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम्।
तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः॥ **3.14.24**॥ 457

हर्याश्च हरयोऽपत्यं वानराश्च तपस्विनः।
गोलाङ्गूलाश्च शार्दूली व्याघ्रांश्चाजनयत् सुतान्॥ **3.14.25**॥ 458

मातङ्ग्यास्त्वथ मातङ्गा अपत्यं मनुजर्षभ।
दिशागजं तु काकुत्स्थ श्वेता व्यजनयत् सुतम्॥ **3.14.26**॥ 459

ततो दुहितरौ राम सुरभिर्द्वे व्यजायत।
रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीम्॥ **3.14.27**॥ 460

रोहिण्यजनयद् गावो गन्धर्वी वाजिनः सुतान्।
सुरसाजनयन्नागान् राम कद्रूश्च पन्नगान्॥ **3.14.28**॥ 461

मनुर्मनुष्याञ्जनयत् कश्यपस्य महात्मनः।
ब्राह्मणान् क्षत्रियान् वैश्याञ्शूद्रांश्च मनुजर्षभ॥ **3.14.29**॥ 462

मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा।
ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः॥ **3.14.30**॥ 463

सर्वान् पुण्यफलान् वृक्षाननलापि व्यजायत।
विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा॥ **3.14.31**॥ 464

कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरान्।
द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च॥ **3.14.32**॥ 465

तस्माज्जातोऽहमरुणात् सम्पातिश्च ममाग्रजः।
जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम॥ **3.14.33**॥ 466

सोऽहं वाससहायस्ते भविष्यामि यदीच्छसि।
इदं दुर्गं हि कान्तारं मृगराक्षससेवितम्।
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे॥ **3.14.34**॥ 467

जटायुषं तु प्रतिपूज्य राघवो
मुदा परिष्वज्य च सन्ननोऽभवत्।
पितुर्हि शुश्राव सखित्वमात्मवान्
जटायुषा सङ्कथितं पुनः पुनः॥ **3.14.35**॥ 468

स तत्र सीतां परिदाय मैथिलीं
सहैव तेनातिबलेन पक्षिणा।
जगाम तां पञ्चवटीं सलक्ष्मणो
रिपून् दिधक्षञ्शलभानिवानलः॥ **3.14.36**॥ 469

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुर्दशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चदशः सर्गः ॥

पञ्चवट्यां रम्ये प्रदेशे श्रीरामस्याज्ञया लक्ष्मणेन सुन्दरपर्णशालाया निर्माणं तत्र सीतालक्ष्मणसहितस्य श्रीरामस्य निवासश्च

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम्।
उवाच लक्ष्मणं रामो भ्रातरं दीप्ततेजसम्॥ **3.15.1**॥ 470

आगताः स्म यथोद्दिष्टं यं देशं मुनिरब्रवीत्।
अयं पञ्चवटीदेशः सौम्य पुष्पितकाननः॥ **3.15.2**॥ 471

सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि।
आश्रमः कतरस्मिन् नो देशे भवति सम्मतः॥ **3.15.3**॥ 472

रमते यत्र वैदेही त्वमहं चैव लक्ष्मण।
तादृशो दृश्यतां देशः सन्निकृष्टजलाशयः॥ **3.15.4**॥ 473

वनरामण्यकं यत्र जलरामण्यकं तथा।
सन्निकृष्टं च यस्मिंस्तु समित्पुष्पकुशोदकम्॥ **3.15.5**॥ 474

एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः।
सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत्॥ **3.15.6**॥ 475

परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद॥ **3.15.7**॥ 476

सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः।
विमृशन् रोचयामास देशं सर्वगुणान्वितम्॥ **3.15.8**॥ 477

स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि।
हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत्॥ **3.15.9**॥ 478

अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः।
इहाश्रमपदं रम्यं यथावत् कर्तुमर्हसि॥ **3.15.10**॥ 479

इयमादित्यसङ्काशैः पद्मैः सुरभिगन्धिभिः।
अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता॥ **3.15.11**॥ 480

यथाख्यातमगस्त्येन मुनिना भावितात्मना।
इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता॥ **3.15.12**॥ 481

हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता।
नातिदूरे न चासन्ने मृगयूथनिपीडिता॥ **3.15.13**॥ 482

मयूरनादिता रम्याः प्रांशवो बहुकन्दराः।
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृताः॥ **3.15.14**॥ 483

सौवर्णै राजतैस्तानैर्देशे देशे तथा शुभैः।
गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः॥ **3.15.15**॥ 484

सालैस्तालैस्तमालैश्च खर्जूरैः पनसैर्द्रुमैः।
नीवारैस्तिनिशैश्चैव पुन्नागैश्चोपशोभिताः॥ **3.15.16**॥ 485

चूतैरशोकैस्तिलकैः केतकैरपि चम्पकैः।
पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः॥ **3.15.17**॥ 486

स्यन्दनैश्चन्दनैर्नीपैः पर्णासैर्लकुचैरपि।
धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः॥ **3.15.18**॥ 487

इदं पुण्यमिदं रम्यमिदं बहुमृगद्विजम्।
इह वत्स्याम सौमित्रे सार्धमेतेन पक्षिणा॥ **3.15.19**॥ 488

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः॥ **3.15.20**॥ 489

पर्णशालां सुविपुलां तत्र सञ्जातमृत्तिकाम्।
सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम्॥ **3.15.21**॥ 490

शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम्।
कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा॥ **3.15.22**॥ 491

समीकृततलां रम्यां चकार सुमहाबलः।
निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम्॥ **3.15.23**॥ 492

स गत्वा लक्ष्मणः श्रीमान् नदीं गोदावरीं तदा।
स्नात्वा पद्मानि चादाय सफलः पुनरागतः॥ **3.15.24**॥ 493

ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि।
दर्शयामास रामाय तदाश्रमपदं कृतम्॥ **3.15.25**॥ 494

स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया।
राघवः पर्णशालायां हर्षमाहारयत् परम्॥ **3.15.26**॥ 495

सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा।
अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत्॥ **3.15.27**॥ 496

प्रीतोऽस्मि ते महत् कर्म त्वया कृतमिदं प्रभो।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः॥ **3.15.28**॥ 497

भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण।
त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम॥ **3.15.29**॥ 498

एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः।
तस्मिन् देशे बहुफले न्यवसत् स सुखं सुखी॥ **3.15.30**॥ 499

कञ्चित् कालं स धर्मात्मा सीतया लक्ष्मणेन च।
अन्वास्यमानो न्यवसत् स्वर्गलोके यथामरः॥ **3.15.31**॥ 500

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षोडशः सर्गः ॥

लक्ष्मणेन हेमन्तर्तोवर्णनं भरतस्य प्रशंसनं श्रीरामस्य लक्ष्मणेन सीतया च सह गोदावर्यां स्नानम्

वसतस्तस्य तु सुखं राघवस्य महात्मनः।
शरद्व्यपाये हेमन्तऋतुरिष्टः प्रवर्तत ॥ **3.16.1** ॥ 501

स कदाचित् प्रभातायां शर्वर्यां रघुनन्दनः।
प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ **3.16.2** ॥ 502

प्रह्वः कलशहस्तस्तु सीतया सह वीर्यवान्।
पृष्ठतोऽनुव्रजन् भ्राता सौमित्रिरिदमब्रवीत् ॥ **3.16.3** ॥ 503

अयं स कालः सम्प्राप्तः प्रियो यस्ते प्रियंवद।
अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ **3.16.4** ॥ 504

नीहारपरुषो लोकः पृथिवी सस्यमालिनी।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ **3.16.5** ॥ 505

नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ **3.16.6** ॥ 506

प्राज्यकामा जनपदाः सम्पन्नतरगोरसाः।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥ **3.16.7** ॥ 507

सेवमाने दृढं सूर्ये दिशमन्तकसेविताम्।
विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते॥ **3.16.8**॥ 508

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम्।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः॥ **3.16.9**॥ 509

अत्यन्तसुखसञ्चारा मध्याह्ने स्पर्शतः सुखाः।
दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः॥ **3.16.10**॥ 510

मृदुसूर्याः सुनीहाराः पटुशीताः समारुताः।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति साम्प्रतम्॥ **3.16.11**॥ 511

निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः।
शीतवृद्धतरायामास्त्रियामा यान्ति साम्प्रतम्॥ **3.16.12**॥ 512

रविसङ्क्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥ **3.16.13**॥ 513

ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते।
सीतेव चातपश्यामा लक्ष्यते न च शोभते॥ **3.16.14**॥ 514

प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम्।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः॥ **3.16.15**॥ 515

बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः॥ **3.16.16**॥ 516

खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः।
शोभन्ते किञ्चिदालम्बाः शालयः कनकप्रभाः॥ **3.16.17**॥ 517

मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः।
दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते॥ **3.16.18**॥ 518

आग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः।
संरक्तः किञ्चिदापाण्डुरातपः शोभते क्षितौ॥ **3.16.19**॥ 519

अवश्यायनिपातेन किञ्चित्प्रक्लिन्नशाद्वला।
वनानां शोभते भूमिर्निविष्टतरुणातपा॥ **3.16.20**॥ 520

स्पृशन् सुविपुलं शीतमुदकं द्विरदः सुखम्।
अत्यन्ततृषितो वन्यः प्रतिसंहरते करम्॥ **3.16.21**॥ 521

एते हि समुपासीना विहगा जलचारिणः।
नावगाहन्ति सलिलमप्रगल्भा इवाहवम्॥ **3.16.22**॥ 522

अवश्यायतमोनद्धा नीहारतमसावृताः।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः॥ **3.16.23**॥ 523

बाष्पसञ्छन्नसलिला रुतविज्ञेयसारसाः।
हिमार्द्रवालुकैस्तीरैः सरितो भान्ति साम्प्रतम्॥ **3.16.24**॥ 524

तुषारपतनाच्चैव मृदुत्वाद् भास्करस्य च।
शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम्॥ **3.16.25**॥ 525

जराजर्जरितैः पत्रैः शीर्णकेसरकर्णिकैः।
नालशेषा हिमध्वस्ता न भान्ति कमलाकराः॥ **3.16.26**॥ 526

अस्मिंस्तु पुरुषव्याघ्र काले दुःखसमन्वितः।
तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे॥ **3.16.27**॥ 527

त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान् बहून्।
तपस्वी नियताहारः शेते शीते महीतले॥ **3.16.28**॥ 528

सोऽपि वेलामिमां नूनमभिषेकार्थमुद्यतः।
वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीम्॥ **3.16.29**॥ 529

अत्यन्तसुखसंवृद्धः सुकुमारो हिमार्दितः।
कथं त्वपररात्रेषु सरयूमवगाहते॥ **3.16.30**॥ 530

पद्मपत्रेक्षणः श्यामः श्रीमान् निरुदरो महान्।
धर्मज्ञः सत्यवादी च ह्रीनिषेवो जितेन्द्रियः॥ **3.16.31**॥ 531

प्रियाभिभाषी मधुरो दीर्घबाहुररिन्दमः।
सन्त्यज्य विविधान् सौख्यानार्यं सर्वात्मनाश्रितः॥ **3.16.32**॥ 532

जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना।
वनस्थमपि तापस्ये यस्त्वामनुविधीयते॥ **3.16.33**॥ 533

न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति।
ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः॥ **3.16.34**॥ 534

भर्ता दशरथो यस्याः साधुश्च भरतः सुतः।
कथं नु साम्बा कैकेयी तादृशी क्रूरदर्शिनी॥ **3.16.35**॥ 535

इत्येवं लक्ष्मणे वाक्यं स्नेहाद् वदति धार्मिके।
परिवादं जनन्यास्तमसहन् राघवोऽब्रवीत्॥ **3.16.36**॥ 536

न तेऽम्बा मध्यमा तात गर्हितव्या कदाचन।
तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु॥ **3.16.37**॥ 537

निश्चितैव हि मे बुद्धिर्वनवासे दृढव्रता।
भरतस्नेहसन्तप्ता बालिशीक्रियते पुनः॥ **3.16.38**॥ 538

संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च।
हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च॥ **3.16.39**॥ 539

कदा ह्यहं समेष्यामि भरतेन महात्मना।
शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन॥ **3.16.40**॥ 540

इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम्।
चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया॥ **3.16.41**॥ 541

तर्पयित्वाथ सलिलैस्तैः पितॄन् दैवतानपि।
स्तुवन्ति स्मोदितं सूर्य देवताश्च तथानघाः॥ **3.16.42**॥ 542

कृताभिषेकः स रराज रामः
सीताद्वितीयः सह लक्ष्मणेन।
कृताभिषेकस्त्वगराजपुत्र्या
रुद्रः सनन्दिर्भगवानिवेशः॥ **3.16.43**॥ 543

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षोडशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तदशः सर्गः ॥

श्रीरामस्याश्रमे शूर्पणखाया आगमनं तस्य परिचयं ज्ञात्वा स्वात्मनः परिचयं दत्त्वाऽऽत्मानं भार्यारूपतया ग्रहीतुं तं प्रति तस्या अनुरोधः

कृताभिषेको रामस्तु सीता सौमित्रिरेव च।
तस्माद् गोदावरीतीरात् ततो जग्मुः स्वमाश्रमम्॥ **3.17.1**॥ 544

आश्रमं तमुपागम्य राघवः सहलक्ष्मणः।
कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत्॥ **3.17.2**॥ 545

उवास सुखितस्तत्र पूज्यमानो महर्षिभिः।
स रामः पर्णशालायामासीनः सह सीतया॥ **3.17.3**॥ 546

विरराज महाबाहुश्चित्रया चन्द्रमा इव।
लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः॥ **3.17.4**॥ 547

तदासीनस्य रामस्य कथासंसक्तचेतसः।
तं देशं राक्षसी काचिदाजगाम यदृच्छया॥ **3.17.5**॥ 548

सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः।
भगिनी राममासाद्य ददर्श त्रिदशोपमम्॥ **3.17.6**॥ 549

दीप्तास्यं च महाबाहुं पद्मपत्रायतेक्षणम्।
गजविक्रान्तगमनं जटामण्डलधारिणम्॥ **3.17.7**॥ 550

सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम्।
राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम्॥ **3.17.8**॥ 551

बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता।
सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी॥ **3.17.9**॥ 552

विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा।
प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना॥ **3.17.10**॥ 553

तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी।
न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना॥ **3.17.11**॥ 554

शरीरजसमाविष्टा राक्षसी राममब्रवीत्।
जटी तापसवेषेण सभार्यः शरचापधृक्॥ **3.17.12**॥ 555

आगतस्त्वमिमं देशं कथं राक्षससेवितम्।
किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि॥ **3.17.13**॥ 556

एवमुक्तस्तु राक्षस्या शूर्पणख्या परन्तपः।
ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे॥ **3.17.14**॥ 557

आसीद् दशरथो नाम राजा त्रिदशविक्रमः।
तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः॥ **3.17.15**॥ 558

भ्रातायं लक्ष्मणो नाम यवीयान् मामनुव्रतः।
इयं भार्या च वैदेही मम सीतेति विश्रुता॥ **3.17.16**॥ 559

नियोगात् तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः।
धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः॥ **3.17.17**॥ 560

त्वां तु वेदितुमिच्छामि कस्य त्वं कासि कस्य वा।
त्वं हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे॥ **3.17.18**॥ 561

इह वा किन्निमित्तं त्वमागता ब्रूहि तत्त्वतः।
साब्रवीद् वचनं श्रुत्वा राक्षसी मदनार्दिता॥ **3.17.19**॥ 562

श्रूयतां राम तत्त्वार्थं वक्ष्यामि वचनं मम।
अहं शूर्पणखा नाम राक्षसी कामरूपिणी॥ **3.17.20**॥ 563

अरण्यं विचरामीदमेका सर्वभयङ्करा।
रावणो नाम मे भ्राता यदि ते श्रोत्रमागतः॥ **3.17.21**॥ 564

वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः।
प्रवृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः॥ **3.17.22**॥ 565

विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः।
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ॥ **3.17.23**॥ 566

तानहं समतिक्रान्ता राम त्वा पूर्वदर्शनात्।
समुपेतास्मि भावेन भर्तारं पुरुषोत्तमम्॥ **3.17.24**॥ 567

अहं प्रभावसम्पन्ना स्वच्छन्दबलगामिनी।
चिराय भव भर्ता मे सीतया किं करिष्यसि॥ **3.17.25**॥ 568

विकृता च विरूपा च न सेयं सदृशी तव।
अहमेवानुरूपा ते भार्यारूपेण पश्य माम्॥ **3.17.26**॥ 569

इमां विरूपामसतीं करालां निर्णतोदरीम्।
अनेन सह ते भ्रात्रा भक्षयिष्यामि मानुषीम्॥ **3.17.27**॥ 570

ततः पर्वतशृङ्गाणि
वनानि विविधानि च।
पश्यन् सह मया कामी
दण्डकान् विचरिष्यसि॥ **3.17.28**॥ 571

इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम्।
इदं वचनमारेभे वक्तुं वाक्यविशारदः॥ 3.17.29॥ 572

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टादशः सर्गः ॥

श्रीरामेण तदनुरोधस्यानङ्गीकारे कृते शूर्पणखाया लक्ष्मणं प्रति प्रणययाचना तेनापि प्रत्याख्यातायास्तस्याः सीतां प्रत्याक्रमणं लक्ष्मणेन तस्या नासिकाकर्णयोश्छेदश्च

तां तु शूर्पणखां रामः कामपाशावपाशिताम्।
स्वेच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत्॥ **3.18.1** ॥ 573

कृतदारोऽस्मि भवति भार्येयं दयिता मम।
त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता॥ **3.18.2** ॥ 574

अनुजस्त्वेष मे भ्राता शीलवान् प्रियदर्शनः।
श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान्॥ **3.18.3** ॥ 575

अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः।
अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति॥ **3.18.4** ॥ 576

एनं भज विशालाक्षि भर्तारं भ्रातरं मम।
असपत्ना वरारोहे मेरुमर्कप्रभा यथा॥ **3.18.5** ॥ 577

इति रामेण सा प्रोक्ता राक्षसी काममोहिता।
विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत्॥ **3.18.6** ॥ 578

अस्य रूपस्य ते युक्ता भार्याहं वरवर्णिनी।
मया सह सुखं सर्वान् दण्डकान् विचरिष्यसि॥ **3.18.7** ॥ 579

एवमुक्तस्तु सौमित्री राक्षस्या वाक्यकोविदः।
ततः शूर्पणखीं स्मित्वा लक्ष्मणो युक्तमब्रवीत्॥ **3.18.8**॥ 580

कथं दासस्य मे दासी भार्या भवितुमिच्छसि।
सोऽहमार्येण परवान् भ्रात्रा कमलवर्णिनि॥ **3.18.9**॥ 581

समृद्धार्थस्य सिद्धार्था मुदितामलवर्णिनी।
आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी॥ **3.18.10**॥ 582

एतां विरूपामसतीं करालां निर्णतोदरीम्।
भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति॥ **3.18.11**॥ 583

को हि रूपमिदं श्रेष्ठं सन्त्यज्य वरवर्णिनि।
मानुषीषु वरारोहे कुर्याद् भावं विचक्षणः॥ **3.18.12**॥ 584

इति सा लक्ष्मणेनोक्ता कराला निर्णतोदरी।
मन्यते तद्वचः सत्यं परिहासाविचक्षणा॥ **3.18.13**॥ 585

सा रामं पर्णशालायामुपविष्टं परन्तपम्।
सीतया सह दुर्धर्षमब्रवीत् काममोहिता॥ **3.18.14**॥ 586

इमां विरूपामसतीं करालां निर्णतोदरीम्।
वृद्धां भार्यामवष्टभ्य न मां त्वं बहु मन्यसे॥ **3.18.15**॥ 587

अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीम्।
त्वया सह चरिष्यामि निःसपत्ना यथासुखम्॥ **3.18.16**॥ 588

इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा।
अभ्यगच्छत् सुसङ्क्रुद्धा महोल्का रोहिणीमिव॥ **3.18.17**॥ 589

तां मृत्युपाशप्रतिमामापतन्तीं महाबलः।
विगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत्॥ **3.18.18**॥ 590

क्रूरैरनार्यैः सौमित्रे परिहासः कथञ्चन।
न कार्यः पश्य वैदेहीं कथञ्चित् सौम्य जीवतीम्॥ **3.18.19**॥ 591

इमां विरूपामसतीमतिमत्तां महोदरीम्।
राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि॥ **3.18.20**॥ 592

इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पश्यतः।
उद्धृत्य खड्गं चिच्छेद कर्णनासे महाबलः॥ **3.18.21**॥ 593

निकृत्तकर्णनासा तु विस्वरं सा विनद्य च।
यथागतं प्रदुद्राव घोरा शूर्पणखा वनम्॥ **3.18.22**॥ 594

सा विरूपा महाघोरा राक्षसी शोणितोक्षिता।
ननाद विविधान् नादान् यथा प्रावृषि तोयदः॥ **3.18.23**॥ 595

सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना।
प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम्॥ **3.18.24**॥ 596

ततस्तु सा राक्षससङ्घसंवृतं
खरं जनस्थानगतं विरूपिता।
उपेत्य तं भ्रातरमुग्रतेजसं
पपात भूमौ गगनाद् यथाशनिः॥ **3.18.25**॥ 597

ततः सभार्यं भयमोहमूर्छिता
सलक्ष्मणं राघवमागतं वनम्।
विरूपणं चात्मनि शोणितोक्षिता
शशंस सर्वं भगिनी खरस्य सा॥ **3.18.26**॥ 598

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनविंशः सर्गः ॥

शूर्पणखातस्तदीयदुर्दशावृत्तान्तमाकर्ण्य कुपितेन खरेण रामादीनां वधाय चतुर्दशसहस्रराक्षसानां प्रेषणम्

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम्।
भगिनीं क्रोधसन्तप्तः खरः पप्रच्छ राक्षसः॥ **3.19.1**॥ 599

उत्तिष्ठ तावदाख्याहि प्रमोहं जहि सम्भ्रमम्।
व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता॥ **3.19.2**॥ 600

कः कृष्णसर्पमासीनमाशीविषमनागसम्।
तुदत्यभिसमापन्नमङ्गुल्यग्रेण लीलया॥ **3.19.3**॥ 601

कालपाशं समासज्य कण्ठे मोहान्न बुध्यते।
यस्त्वामद्य समासाद्य पीतवान् विषमुत्तमम्॥ **3.19.4**॥ 602

बलविक्रमसम्पन्ना कामगा कामरूपिणी।
इमामवस्थां नीता त्वं केनान्तकसमागता॥ **3.19.5**॥ 603

देवगन्धर्वभूतानामृषीणां च महात्मनाम्।
कोऽयमेवं महावीर्यस्त्वां विरूपां चकार ह॥ **3.19.6**॥ 604

नहि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम्।
अमरेषु सहस्राक्षं महेन्द्रं पाकशासनम्॥ **3.19.7**॥ 605

अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तगैः।
सलिले क्षीरमासक्तं निष्पिबन्निव सारसः॥ **3.19.8**॥ 606

निहतस्य मया सङ्ख्ये शरसङ्कृत्तमर्मणः।
सफेनं रुधिरं कस्य मेदिनी पातुमिच्छति॥ **3.19.9**॥ 607

कस्य पत्ररथाः कायान्मांसमुत्कृत्य सङ्गताः।
प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे॥ **3.19.10**॥ 608

तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः।
मयापकृष्टं कृपणं शक्तास्त्रातुं महाहवे॥ **3.19.11**॥ 609

उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि।
येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता॥ **3.19.12**॥ 610

इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः।
ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत्॥ **3.19.13**॥ 611

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ॥ **3.19.14**॥ 612

फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ॥ **3.19.15**॥ 613

गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ।
देवौ वा दानवावेतौ न तर्कयितुमुत्सहे॥ **3.19.16**॥ 614

तरुणी रूपसम्पन्ना सर्वाभरणभूषिता।
दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा॥ **3.19.17**॥ 615

ताभ्यामुभाभ्यां सम्भूय प्रमदामधिकृत्य ताम्।
इमामवस्थां नीताहं यथानाथासती तथा॥ **3.19.18**॥ 616

तस्याश्चानृजुवृत्तायास्तयोश्च हतयोरहम्।
सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि॥ **3.19.19**॥ 617

एष मे प्रथमः कामः कृतस्तत्र त्वया भवेत्।
तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे॥ **3.19.20**॥ 618

इति तस्यां ब्रुवाणायां चतुर्दश महाबलान्।
व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान्॥ **3.19.21**॥ 619

मानुषौ शस्त्रसम्पन्नौ चीरकृष्णाजिनाम्बरौ।
प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह॥ **3.19.22**॥ 620

तौ हत्वा तां च दुर्वृत्तामुपावर्तितुमर्हथ।
इयं च भगिनी तेषां रुधिरं मम पास्यति॥ **3.19.23**॥ 621

मनोरथोऽयमिष्टोऽस्या भगिन्या मम राक्षसाः।
शीघ्रं सम्पाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा॥ **3.19.24**॥ 622

युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे।
इयं प्रहृष्टा मुदिता रुधिरं युधि पास्यति॥ **3.19.25**॥ 623

इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश।
तत्र जग्मुस्तया सार्धं घना वातेरिता इव॥ **3.19.26**॥ 624

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ विंशः सर्गः ॥

श्रीरामकर्तृकः खरप्रहितानां राक्षसानां वधः

ततः शूर्पणखा घोरा राघवाश्रममागता।
राक्षसानाचचक्षे तौ भ्रातरौ सह सीतया ॥ **3.20.1** ॥ 625

ते रामं पर्णशालायामुपविष्टं महाबलम्।
ददृशुः सीतया सार्धं लक्ष्मणेनापि सेवितम् ॥ **3.20.2** ॥ 626

तां दृष्ट्वा राघवः श्रीमानागतांस्तांश्च राक्षसान्।
अब्रवीद् भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ **3.20.3** ॥ 627

मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः।
इमानस्या वधिष्यामि पदवीमागतानिह ॥ **3.20.4** ॥ 628

वाक्यमेतत् ततः श्रुत्वा रामस्य विदितात्मनः।
तथेति लक्ष्मणो वाक्यं राघवस्य प्रपूजयन् ॥ **3.20.5** ॥ 629

राघवोऽपि महच्चापं चामीकरविभूषितम्।
चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ **3.20.6** ॥ 630

पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ।
प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ **3.20.7** ॥ 631

फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ।
वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ॥ **3.20.8**॥ 632

युष्मान् पापात्मकान् हन्तुं विप्रकारान् महाहवे।
ऋषीणां तु नियोगेन सम्प्राप्तः सशरासनः॥ **3.20.9**॥ 633

तिष्ठतैवात्र सन्तुष्टा नोपवर्तितुमर्हथ।
यदि प्राणैरिहार्थो वो निवर्तध्वं निशाचराः॥ **3.20.10**॥ 634

तस्य तद् वचनं श्रुत्वा राक्षसास्ते चतुर्दश।
ऊचुर्वाचं सुसङ्क्रुद्धा ब्रह्मघ्नाः शूलपाणयः॥ **3.20.11**॥ 635

संरक्तनयना घोरा रामं संरक्तलोचनम्।
परुषा मधुराभाषं हृष्टा दृष्टपराक्रमम्॥ **3.20.12**॥ 636

क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः।
त्वमेव हास्यसे प्राणान् सद्योऽस्माभिर्हतो युधि॥ **3.20.13**॥ 637

का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे॥ **3.20.14**॥ 638

एभिर्बाहुप्रयुक्तैश्च परिघैः शूलपट्टिशैः।
प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम्॥ **3.20.15**॥ 639

इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश।
उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः॥ **3.20.16**॥ 640

चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम्।
तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश॥ **3.20.17**॥ 641

तावद्भिरेव चिच्छेद शरैः काञ्चनभूषितैः।
ततः पश्चान्महातेजा नाराचान् सूर्यसन्निभान्॥ **3.20.18**॥ 642

जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान्।
गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान्॥ **3.20.19**॥ 643

मुमोच राघवो बाणान् वज्रानिव शतक्रतुः।
ते भित्त्वा रक्षसां वेगाद् वक्षांसि रुधिरप्लुताः॥ **3.20.20**॥ 644

विनिष्पेतुस्तदा भूमौ वल्मीकादिव पन्नगाः।
तैर्भग्नहृदया भूमौ छिन्नमूला इव द्रुमाः॥ **3.20.21**॥ 645

निपेतुः शोणितस्नाता विकृता विगतासवः।
तान् भूमौ पतितान् दृष्ट्वा राक्षसी क्रोधमूर्च्छिता॥ **3.20.22**॥ 646

उपगम्य खरं सा तु किञ्चित्संशुष्कशोणिता।
पपात पुनरेवार्ता सनिर्यासेव वल्लरी॥ **3.20.23**॥ 647

भ्रातुः समीपे शोकार्ता ससर्ज निनदं महत्।
सस्वरं मुमुचे बाष्पं विवर्णवदना तदा॥ **3.20.24**॥ 648

निपातितान् प्रेक्ष्य रणे तु राक्षसान्
प्रधाविता शूर्पणखा पुनस्ततः।
वधं च तेषां निखिलेन रक्षसां
शशंस सर्वं भगिनी खरस्य सा॥ **3.20.25**॥ 649

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकविंशः सर्गः ॥

शूर्पणखया खरपार्श्वमुपगम्य राक्षसवधवृत्तान्तं निवेद्य श्रीरामतो भयं प्रदर्श्य खरस्य युद्धार्थं प्रोत्साहनम्

स पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां पुनः।
उवाच व्यक्तया वाचा तामनर्थार्थमागताम्॥ **3.21.1** ॥ 650

मया त्विदानी शूरास्ते राक्षसाः पिशिताशनाः।
त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः॥ **3.21.2** ॥ 651

भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः।
हन्यमाना न हन्यन्ते न न कुर्युर्वचो मम॥ **3.21.3** ॥ 652

किमेतच्छ्रोतुमिच्छामि कारणं यत्कृते पुनः।
हा नाथेति विनर्दन्ती सर्पवच्चेष्टसे क्षितौ॥ **3.21.4** ॥ 653

अनाथवद् विलपसि किं नु नाथे मयि स्थिते।
उत्तिष्ठोत्तिष्ठ मा मैवं वैक्लव्यं त्यज्यतामिति॥ **3.21.5** ॥ 654

इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता।
विमृज्य नयने सास्रे खरं भ्रातरमब्रवीत्॥ **3.21.6** ॥ 655

अस्मीदानीमहं प्राप्ता हतश्रवणनासिका।
शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता॥ **3.21.7** ॥ 656

प्रेषिताश्च त्वया शूरा राक्षसास्ते चतुर्दश।
निहन्तुं राघवं घोरं मत्प्रियार्थं सलक्ष्मणम्॥ **3.21.8**॥ 657

ते तु रामेण सामर्षाः शूलपट्टिशपाणयः।
समरे निहताः सर्वे सायकैर्मर्मभेदिभिः॥ **3.21.9**॥ 658

तान् भूमौ पतितान् दृष्ट्वा क्षणेनैव महाजवान्।
रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम॥ **3.21.10**॥ 659

सास्मि भीता समुद्विग्ना विषण्णा च निशाचर।
शरणं त्वां पुनः प्राप्ता सर्वतो भयदर्शिनी॥ **3.21.11**॥ 660

विषादनक्राध्युषिते परित्रासोर्मिमालिनि।
किं मां न त्रायसे मग्नां विपुले शोकसागरे॥ **3.21.12**॥ 661

एते च निहता भूमौ रामेण निशितैः शरैः।
ये च मे पदवीं प्राप्ता राक्षसाः पिशिताशनाः॥ **3.21.13**॥ 662

मयि ते यद्यनुक्रोशो यदि रक्षःसु तेषु च।
रामेण यदि शक्तिस्ते तेजो वास्ति निशाचर॥ **3.21.14**॥ 663

दण्डकारण्यनिलयं जहि राक्षसकण्टकम्।
यदि राममित्रघ्नं न त्वमद्य वधिष्यसि॥ **3.21.15**॥ 664

तव चैवाग्रतः प्राणांस्त्यक्ष्यामि निरपत्रपा।
बुद्ध्याहमनुपश्यामि न त्वं रामस्य संयुगे॥ **3.21.16**॥ 665

स्थातुं प्रतिमुखे शक्तः सबलोऽपि महारणे।
शूरमानी न शूरस्त्वं मिथ्यारोपितविक्रमः॥ **3.21.17**॥ 666

अपयाहि जनस्थानात् त्वरितः सहबान्धवः।
जहि त्वं समरे मूढान्यथा तु कुलपांसन॥ **3.21.18**॥ 667

मानुषौ तौ न शक्नोषि हन्तुं वै रामलक्ष्मणौ।
निःसत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह॥ **3.21.19**॥ 668

रामतेजोऽभिभूतो हि त्वं क्षिप्रं विनशिष्यसि।
स हि तेजःसमायुक्तो रामो दशरथात्मजः॥ **3.21.20**॥ 669

भ्राता चास्य महावीर्यो येन चास्मि विरूपिता।
एवं विलप्य बहुशो राक्षसी प्रदरोदरी॥ **3.21.21**॥ 670

भ्रातुः समीपे शोकार्ता नष्टसंज्ञा बभूव ह।
कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता॥ **3.21.22**॥ 671

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वाविंशः सर्गः ॥

चतुर्दशसहस्रसैनिकैः सह खरदूषणयोर्जनस्थानात् पञ्चवटीं प्रति प्रस्थानम्

एवमाधर्षितः शूरः शूर्पनख्या खरस्ततः।
उवाच रक्षसां मध्ये खरः खरतरं वचः॥ **3.22.1** ॥ 672

तवापमानप्रभवः क्रोधोऽयमतुलो मम।
न शक्यते धारयितुं लवणाम्भ इवोल्बणम्॥ **3.22.2** ॥ 673

न रामं गणये वीर्यान्मानुषं क्षीणजीवितम्।
आत्मदुश्चरितैः प्राणान् हतो योऽद्य विमोक्ष्यते॥ **3.22.3** ॥ 674

बाष्पः सन्धार्यतामेष सभ्रमश्च विमुच्यताम्।
अहं रामं सह भ्रात्रा नयामि यमसादनम्॥ **3.22.4** ॥ 675

परश्वधहतस्याद्य मन्दप्राणस्य भूतले।
रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि॥ **3.22.5** ॥ 676

सम्प्रहृष्टा वचः श्रुत्वा खरस्य वदनाच्च्युतम्।
प्रशशंस पुनर्मौर्ख्याद् भ्रातरं रक्षसां वरम्॥ **3.22.6** ॥ 677

तया परुषितः पूर्वं पुनरेव प्रशंसितः।
अब्रवीद् दूषणं नाम खरः सेनापतिं तदा॥ **3.22.7** ॥ 678

चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम्।
रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम्॥ **3.22.8**॥ 679

नीलजीमूतवर्णानां लोकहिंसाविहारिणाम्।
सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय॥ **3.22.9**॥ 680

उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च।
शरांश्च चित्रान् खड्गांश्च शक्तीश्च विविधाः शिताः॥ **3.22.10**॥ 681

अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम्।
वधार्थं दुर्विनीतस्य रामस्य रणकोविद॥ **3.22.11**॥ 682

इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम्।
सदश्वैः शबलैर्युक्तमाचचक्षेऽथ दूषणः॥ **3.22.12**॥ 683

तं मेरुशिखराकारं तप्तकाञ्चनभूषणम्।
हेमचक्रमसम्बाधं वैदूर्यमयकूबरम्॥ **3.22.13**॥ 684

मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चन्द्रसूर्यैश्च काञ्चनैः।
माङ्गल्यैः पक्षिसङ्घैश्च ताराभिश्च समावृतम्॥ **3.22.14**॥ 685

ध्वजनिस्त्रिंशसम्पन्नं किङ्किणीवरभूषितम्।
सदश्वयुक्तं सोऽमर्षादारुरोह खरस्तदा॥ **3.22.15**॥ 686

खरस्तु तन्महत्सैन्यं रथचर्मायुधध्वजम्।
निर्यातेत्यब्रवीत् प्रेक्ष्य दूषणः सर्वराक्षसान्॥ **3.22.16**॥ 687

ततस्तद् राक्षसं सैन्यं घोरचर्मायुधध्वजम्।
निर्जगाम जनस्थानान्महानादं महाजवम्॥ **3.22.17**॥ 688

मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः।
खड्गैश्चक्रैश्च हस्तस्थैर्भ्राजमानैः सतोमरैः॥ **3.22.18**॥ 689

शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः।
गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः॥ **3.22.19**॥ 690

राक्षसानां सुघोराणां सहस्राणि चतुर्दश।
निर्यातानि जनस्थानात् खरचित्तानुवर्तिनाम्॥ **3.22.20**॥ 691

तांस्तु निर्धावतो दृष्ट्वा राक्षसान् भीमदर्शनान्।
खरस्याथ रथः किञ्चिज्जगाम तदनन्तरम्॥ **3.22.21**॥ 692

ततस्ताञ्छबलानश्वांस्तप्तकाञ्चनभूषितान्।
खरस्य मतमाज्ञाय सारथिः पर्यचोदयत्॥ **3.22.22**॥ 693

सञ्चोदितो रथः शीघ्रं खरस्य रिपुघातिनः।
शब्देनापूरयामास दिशः सप्रदिशस्तथा॥ **3.22.23**॥ 694

प्रवृद्धमन्युस्तु खरः खरस्वरो
रिपोर्वधार्थं त्वरितो यथान्तकः।
अचूचुदत् सारथिमुन्नदन् पुन -
र्महाबलो मेघ इवाश्मवर्षवान्॥ **3.22.24**॥ 695

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्वाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोविंशः सर्गः ॥

भयङ्करानुत्पातान् दृष्ट्वापि तानचिन्तयित्वा खरस्य राक्षससेनायाश्च श्रीरामस्याश्रमसमीपे गमनम्

तत्प्रयातं बलं घोरमशिवं शोणितोदकम्।
अभ्यवर्षन्महाघोरस्तुमुलो गर्दभारुणः॥ **3.23.1** ॥ 696

निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः।
समे पुष्पचिते देशे राजमार्गे यदृच्छया॥ **3.23.2** ॥ 697

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम्।
अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरम्॥ **3.23.3** ॥ 698

ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम्।
समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः॥ **3.23.4** ॥ 699

जनस्थानसमीपे च समाक्रम्य खरस्वनाः।
विस्वरान् विविधान् नादान् मांसादा मृगपक्षिणः॥ **3.23.5** ॥ 700

व्याजह्रुरभिदीप्तायां दिशि वै भैरवस्वनम्।
अशिवं यातुधानानां शिवा घोरा महास्वनाः॥ **3.23.6** ॥ 701

प्रभिन्नगजसङ्काशास्तोयशोणितधारिणः।
आकाशं तदनाकाशं चक्रुर्भीमाम्बुवाहकाः॥ **3.23.7** ॥ 702

बभूव तिमिरं घोरमुद्धतं रोमहर्षणम्।
दिशो वा प्रदिशो वापि सुव्यक्तं न चकाशिरे॥ **3.23.8**॥ 703

क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ।
खरं चाभिमुखं नेदुस्तदा घोरा मृगाः खगाः॥ **3.23.9**॥ 704

कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः।
नित्याशिवकरा युद्धे शिवा घोरनिदर्शनाः॥ **3.23.10**॥ 705

नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः।
कबन्धः परिघाभासो दृश्यते भास्करान्तिके॥ **3.23.11**॥ 706

जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः।
प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद् दिवाकरः॥ **3.23.12**॥ 707

उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः।
संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः॥ **3.23.13**॥ 708

तस्मिन् क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः।
उद्धूतश्च विना वातं रेणुर्जलधरारुणः॥ **3.23.14**॥ 709

चीचीकूचीति वाश्यन्त्यो बभूवुस्तत्र सारिकाः।
उल्काश्चापि सनिर्घोषा निपेतुर्घोरदर्शनाः॥ **3.23.15**॥ 710

प्रचचाल मही चापि सशैलवनकानना।
खरस्य च रथस्थस्य नर्दमानस्य धीमतः॥ **3.23.16**॥ 711

प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत।
सास्रा सम्पद्यते दृष्टिः पश्यमानस्य सर्वतः॥ **3.23.17**॥ 712

ललाटे च रुजो जाता न च मोहान्न्यवर्तत।
तान् समीक्ष्य महोत्पातानुत्स्थितान् रोमहर्षणान्॥ **3.23.18**॥ 713

अब्रवीद् राक्षसान् सर्वान् प्रहसन् स खरस्तदा।
महोत्पातानिमान् सर्वानुत्थितान् घोरदर्शनान्॥ **3.23.19**॥ 714

न चिन्तयाम्यहं वीर्याद् बलवान् दुर्बलानिव।
तारा अपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात्॥ **3.23.20**॥ 715

मृत्युं मरणधर्मेण सङ्क्रुद्धो योजयाम्यहम्।
राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणम्॥ **3.23.21**॥ 716

अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे।
यन्निमित्तं तु रामस्य लक्ष्मणस्य विपर्ययः॥ **3.23.22**॥ 717

सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः।
न क्वचित् प्राप्तपूर्वो मे संयुगेषु पराजयः॥ **3.23.23**॥ 718

युष्माकमेतत् प्रत्यक्षं नानृतं कथयाम्यहम्।
देवराजमपि क्रुद्धो मत्तैरावतगामिनम्॥ **3.23.24**॥ 719

वज्रहस्तं रणे हन्यां किं पुनस्तौ च मानवौ।
सा तस्य गर्जितं श्रुत्वा राक्षसानां महाचमूः॥ **3.23.25**॥ 720

प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता।
समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः॥ **3.23.26**॥ 721

ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः।
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः॥ **3.23.27**॥ 722

स्वस्ति गोब्राह्मणेभ्यस्तु लोकानां ये च सम्मताः।
जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान्॥ **3.23.28**॥ 723

चक्रहस्तो यथा विष्णुः सर्वानसुरसत्तमान्।
एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः॥ **3.23.29**॥ 724

जातकौतूहलास्तत्र विमानस्थाश्च देवताः।
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम्॥ **3.23.30**॥ 725

रथेन तु खरो वेगात् सैन्यस्याग्राद् विनिःसृतः।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः॥ **3.23.31**॥ 726

दुर्जयः करवीराक्षः परुषः कालकार्मुकः।
हेममाली महामाली सर्पास्यो रुधिराशनः॥ **3.23.32**॥ 727

द्वादशैते महावीर्याः प्रतस्थुरभितः खरम्।
महाकपालः स्थूलाक्षः प्रमाथस्त्रिशिरास्तथा।
चत्वार एते सेनाग्रे दूषणं पृष्ठतोऽन्वयुः॥ **3.23.33**॥ 728

सा भीमवेगा समराभिकामा
महाबला राक्षसवीरसेना।
तौ राजपुत्रौ सहसाऽभ्युपेता
माला ग्रहाणामिव चन्द्रसूर्यौ॥ **3.23.34**॥ 729

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रयोविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्विंशः सर्गः ॥

श्रीरामेण तात्कालिकैः शकुनै राक्षसानां विनाशं स्वविजयं च सम्भाव्य सीतासहितस्य लक्ष्मणस्य पर्वतगुफायां प्रेषणम्

आश्रमं प्रतियाते तु खरे खरपराक्रमे।
तानेवौत्पातिकान् रामः सह भ्रात्रा ददर्श ह ॥ **3.24.1** ॥ 730

तानुत्पातान् महाघोरान् रामो दृष्ट्वात्यमर्षणः।
प्रजानामहितान् दृष्ट्वा वाक्यं लक्ष्मणमब्रवीत् ॥ **3.24.2** ॥ 731

इमान् पश्य महाबाहो सर्वभूतापहारिणः।
समुत्थितान् महोत्पातान् संहर्तुं सर्वराक्षसान् ॥ **3.24.3** ॥ 732

अमी रुधिरधारास्तु विसृजन्ते खरस्वनाः।
व्योम्नि मेघा निवर्तन्ते परुषा गर्दभारुणाः ॥ **3.24.4** ॥ 733

सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिताः।
रुक्मपृष्ठानि चापानि विचेष्टन्ते विचक्षण ॥ **3.24.5** ॥ 734

यादृशा इह कूजन्ति पक्षिणो वनचारिणः।
अग्रतो नोऽभयं प्राप्तं संशयो जीवितस्य च ॥ **3.24.6** ॥ 735

सम्प्रहारस्तु सुमहान् भविष्यति न संशयः।
अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ **3.24.7** ॥ 736

सन्निकर्षे तु नः शूर जयं शत्रोः पराजयम्।
सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते॥ **3.24.8**॥ 737

उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण।
निष्प्रभं वदनं तेषां भवत्यायुः परिक्षयः॥ **3.24.9**॥ 738

रक्षसां नर्दतां घोरः श्रूयतेऽयं महाध्वनिः।
आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः॥ **3.24.10**॥ 739

अनागतविधानं तु कर्तव्यं शुभमिच्छता।
आपदं शङ्कमानेन पुरुषेण विपश्चिता॥ **3.24.11**॥ 740

तस्माद् गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः।
गुहामाश्रय शैलस्य दुर्गां पादपसङ्कुलाम्॥ **3.24.12**॥ 741

प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया।
शापितो मम पादाभ्यां गम्यतां वत्स मा चिरम्॥ **3.24.13**॥ 742

त्वं हि शूरश्च बलवान् हन्या एतान् न संशयः।
स्वयं निहन्तुमिच्छामि सर्वानेव निशाचरान्॥ **3.24.14**॥ 743

एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया।
शरानादाय चापं च गुहां दुर्गां समाश्रयत्॥ **3.24.15**॥ 744

तस्मिन् प्रविष्टे तु गुहां लक्ष्मणे सह सीतया।
हन्त निर्युक्तमित्युक्त्वा रामः कवचमाविशत्॥ **3.24.16**॥ 745

स तेनाग्निनिकाशेन कवचेन विभूषितः।
बभूव रामस्तिमिरे महानग्निरिवोत्थितः॥ **3.24.17**॥ 746

स चापमुद्यम्य महच्छरानादाय वीर्यवान्।
सम्बभूवास्थितस्तत्र ज्यास्वनैः पूरयन् दिशः॥ **3.24.18**॥ 747

ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः।
समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षया॥ **3.24.19**॥ 748

ऋषयश्च महात्मानो लोके ब्रह्मर्षिसत्तमाः।
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः॥ **3.24.20**॥ 749

स्वस्ति गोब्राह्मणानां च लोकानां चेति संस्थिताः।
जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान्॥ **3.24.21**॥ 750

चक्रहस्तो यथा युद्धे सर्वानसुरपुङ्गवान्।
एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम्॥ **3.24.22**॥ 751

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्।
एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति॥ **3.24.23**॥ 752

इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः।
जातकौतूहलास्तस्थुर्विमानस्थाश्च देवताः॥ **3.24.24**॥ 753

आविष्टं तेजसा रामं सङ्ग्रामशिरसि स्थितम्।
दृष्ट्वा सर्वाणि भूतानि भयाद् विव्यथिरे तदा॥ **3.24.25**॥ 754

रूपमप्रतिमं तस्य रामस्याक्लिष्टकर्मणः।
बभूव रूपं क्रुद्धस्य रुद्रस्येव महात्मनः॥ **3.24.26**॥ 755

इति सम्भाष्यमाणे तु देवगन्धर्वचारणैः।
ततो गम्भीरनिर्ह्रादं घोरचर्मायुधध्वजम्॥ **3.24.27**॥ 756

अनीकं यातुधानानां समन्तात् प्रत्यपद्यत।
वीरालापान् विसृजतामन्योन्यमभिगच्छताम्॥ **3.24.28**॥ 757

चापानि विस्फारयतां जृम्भतां चाप्यभीक्ष्णशः।
विप्रघुष्टस्वनानां च दुन्दुभींश्चापि निघ्नताम्॥ **3.24.29**॥ 758

तेषां सुतुमुलः शब्दः पूरयामास तद् वनम्।
तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः॥ **3.24.30**॥ 759

दुद्रुवुर्यत्र निःशब्दं पृष्ठतो नावलोकयन्।
तच्चानीकं महावेगं रामं समनुवर्तत॥ **3.24.31**॥ 760

धृतनानाप्रहरणं गम्भीरं सागरोपमम्।
रामोऽपि चारयंश्चक्षुः सर्वतो रणपण्डितः॥ **3.24.32**॥ 761

ददर्श खरसैन्यं तद् युद्धायाभिमुखो गतः।
वितत्य च धनुर्भीमं तूण्याश्चोद्धृत्य सायकान्॥ **3.24.33**॥ 762

क्रोधमाहारयत् तीव्रं वधार्थं सर्वरक्षसाम्।
दुष्प्रेक्ष्यश्चाभवत् क्रुद्धो युगान्ताग्निरिव ज्वलन्॥ **3.24.34**॥ 763

तं दृष्ट्वा तेजसाऽऽविष्टं प्राव्यथन् वनदेवताः।
तस्य रुष्टस्य रूपं तु रामस्य ददृशे तदा।
दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः॥ **3.24.35**॥ 764

तत्कार्मुकैराभरणै रथैश्च
तद्वर्मभिश्चाग्निसमानवर्णैः।
बभूव सैन्यं पिशिताशनानां
सूर्योदये नीलमिवाभ्रजालम्॥ **3.24.36**॥ 765

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुर्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चविंशः सर्गः ॥

राक्षसानामाक्रमणं श्रीरामेण तेषां संहारश्च

अवष्टब्धधनुं रामं क्रुद्धं तं रिपुघातिनम्।
ददर्शाश्रममागम्य खरः सह पुरःसरैः॥ **3.25.1** ॥ 766

तं दृष्ट्वा सगुणं चापमुद्यम्य खरनिःस्वनम्।
रामस्याभिमुखं सूतं चोद्यतामित्यचोदयत्॥ **3.25.2** ॥ 767

स खरस्याज्ञया सूतस्तुरगान् समचोदयत्।
यत्र रामो महाबाहुरेको धुन्वन् धनुः स्थितः॥ **3.25.3** ॥ 768

तं तु निष्पतितं दृष्ट्वा सर्वतो रजनीचराः।
मुञ्चमाना महानादं सचिवाः पर्यवारयन्॥ **3.25.4** ॥ 769

स तेषां यातुधानानां मध्ये रथगतः खरः।
बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः॥ **3.25.5** ॥ 770

ततः शरसहस्रेण राममप्रतिमौजसम्।
अर्दयित्वा महानादं ननाद समरे खरः॥ **3.25.6** ॥ 771

ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः।
रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम्॥ **3.25.7** ॥ 772

मुद्गरैरायसैः शूलैः प्रासैः खड्गैः परश्वधैः।
राक्षसाः समरे शूरं निजघ्नू रोषतत्पराः॥ **3.25.8**॥ 773

ते बलाहकसङ्काशा महाकाया महाबलाः।
अभ्यधावन्त काकुत्स्थं रथैर्वाजिभिरेव च॥ **3.25.9**॥ 774

गजैः पर्वतकूटाभै रामं युद्धे जिघांसवः।
ते रामे शरवर्षाणि व्यसृजन् रक्षसां गणाः॥ **3.25.10**॥ 775

शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः।
सर्वैः परिवृतो रामो राक्षसैः क्रूरदर्शनैः॥ **3.25.11**॥ 776

तिथिष्विव महादेवो वृतः पारिषदां गणैः।
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः॥ **3.25.12**॥ 777

प्रतिजग्राह विशिखैर्नद्योघानिव सागरः।
स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे॥ **3.25.13**॥ 778

रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः।
स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः॥ **3.25.14**॥ 779

बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः।
विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः॥ **3.25.15**॥ 780

एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम्।
ततो रामस्तु सङ्क्रुद्धो मण्डलीकृतकार्मुकः॥ **3.25.16**॥ 781

ससर्ज निशितान् बाणाञ्छतशोऽथ सहस्रशः।
दुरावारान् दुर्विषहान् कालपाशोपमान् रणे॥ **3.25.17**॥ 782

मुमोच लीलया कङ्कपत्रान् काञ्चनभूषणान्।
ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया॥ **3.25.18**॥ 783

आददू रक्षसां प्राणान् पाशाः कालकृता इव।
भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः॥ **3.25.19**॥ 784

अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः।
असङ्ख्येयास्तु रामस्य सायकाश्चापमण्डलात्॥ **3.25.20**॥ 785

विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः।
तैर्धनूंषि ध्वजाग्राणि चर्माणि कवचानि च॥ **3.25.21**॥ 786

बाहून् सहस्ताभरणानूरून् करिकरोपमान्।
चिच्छेद रामः समरे शतशोऽथ सहस्रशः॥ **3.25.22**॥ 787

हयान् काञ्चनसन्नाहान् रथयुक्तान् ससारथीन्।
गजांश्च सगजारोहान् सहयान् सादिनस्तदा॥ **3.25.23**॥ 788

चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युताः।
पदातीन् समरे हत्वा ह्यनयद् यमसादनम्॥ **3.25.24**॥ 789

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः।
भीममार्तस्वरं चक्रुश्छिद्यमाना निशाचराः॥ **3.25.25**॥ 790

तत्सैन्यं विविधैर्बाणैरर्दितं मर्मभेदिभिः।
न रामेण सुखं लेभे शुष्कं वनमिवाग्निना॥ **3.25.26**॥ 791

केचिद् भीमबलाः शूराः प्रासाञ्शूलान् परश्वधान्।
चिक्षिपुः परमक्रुद्धा रामाय रजनीचराः॥ **3.25.27**॥ 792

तेषां बाणैर्महाबाहुः शस्त्राण्यावार्य वीर्यवान्।
जहार समरे प्राणांश्चिच्छेद च शिरोधरान्॥ **3.25.28**॥ 793

ते छिन्नशिरसः पेतुश्छिन्नचर्मशरासनाः।
सुपर्णवातविक्षिप्ता जगत्यां पादपा यथा॥ **3.25.29**॥ 794

अवशिष्टाश्च ये तत्र विषण्णास्ते निशाचराः।
खरमेवाभ्यधावन्त शरणार्थं शराहताः॥ **3.25.30**॥ 795

तान् सर्वान् धनुरादाय समाश्वास्य च दूषणः।
अभ्यधावत् सुसङ्क्रुद्धः क्रुद्धं क्रुद्ध इवान्तकः॥ **3.25.31**॥ 796

निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः।
राममेवाभ्यधावन्त सालतालशिलायुधाः॥ **3.25.32**॥ 797

शूलमुद्गरहस्ताश्च पाशहस्ता महाबलाः।
सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे॥ **3.25.33**॥ 798

द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः।
तद् बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम्॥ **3.25.34**॥ 799

रामस्यास्य महाघोरं पुनस्तेषां च रक्षसाम्।
ते समन्तादभिक्रुद्धा राघवं पुनरार्दयन्॥ **3.25.35**॥ 800

ततः सर्वा दिशो दृष्ट्वा प्रदिशश्च समावृताः।
राक्षसैः सर्वतः प्राप्तैः शरवर्षाभिरावृतः॥ **3.25.36**॥ 801

स कृत्वा भैरवं नादमस्त्रं परमभास्वरम्।
समयोजयद् गान्धर्वं राक्षसेषु महाबलः॥ **3.25.37**॥ 802

ततः शरसहस्राणि निर्ययुश्चापमण्डलात्।
सर्वा दश दिशो बाणैरापूर्यन्त समागतैः॥ **3.25.38**॥ 803

नाददानं शरान् घोरान् विमुञ्चन्तं शरोत्तमान्।
विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः॥ **3.25.39**॥ 804

शरान्धकारमाकाशमावृणोत् सदिवाकरम्।
बभूवावस्थितो रामः प्रक्षिपन्निव ताञ्छरान्॥ **3.25.40**॥ 805

युगपत्पतमानैश्च युगपच्च हतैर्भृशम्।
युगपत्पतितैश्चैव विकीर्णा वसुधाभवत्॥ **3.25.41**॥ 806

निहताः पतिताः क्षीणाश्छिन्ना भिन्ना विदारिताः।
तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः॥ **3.25.42**॥ 807

सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्तथा।
ऊरुभिर्बाहुभिश्छिन्नैर्नानारूपैर्विभूषणैः॥ **3.25.43**॥ 808

हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः।
चामरव्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि॥ **3.25.44**॥ 809

रामेण बाणाभिहतैर्विच्छिन्नैः शूलपट्टिशैः।
खड्गैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः॥ **3.25.45**॥ 810

चूर्णिताभिः शिलाभिश्च शरैश्चित्रैरनेकशः।
विच्छिन्नैः समरे भूमिर्विस्तीर्णाभूद् भयङ्करा॥ **3.25.46**॥ 811

तान् दृष्ट्वा निहतान् सर्वे राक्षसाः परमातुराः।
न तत्र चलितुं शक्ता रामं परपुरञ्जयम्॥ **3.25.47**॥ 812

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्विंशः सर्गः ॥

श्रीरामेण दूषणसहितानां चतुर्दशसहस्रराक्षसानां वधः

दूषणस्तु स्वकं सैन्यं हन्यमानं विलोक्य च।
सन्दिदेश महाबाहुर्भीमवेगान् दुरासदान्॥ **3.26.1** ॥ 813

राक्षसान् पञ्चसाहस्रान् समरेष्वनिवर्तिनः।
ते शूलैः पट्टिशैः खड्गैः शिलावर्षैर्द्रुमैरपि॥ **3.26.2** ॥ 814

शरवर्षैरविच्छिन्नं ववर्षुस्तं समन्ततः।
तद् द्रुमाणां शिलानां च वर्षं प्राणहरं महत्॥ **3.26.3** ॥ 815

प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः।
प्रतिगृह्य च तद् वर्षं निमीलित इवर्षभः॥ **3.26.4** ॥ 816

रामः क्रोधं परं लेभे वधार्थं सर्वरक्षसाम्।
ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा॥ **3.26.5** ॥ 817

शरैरभ्यकिरत् सैन्यं सर्वतः सहदूषणम्।
ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः॥ **3.26.6** ॥ 818

शरैरशनिकल्पैस्तं राघवं समवारयत्।
ततो रामः सुसङ्क्रुद्धः क्षुरेणास्य महद् धनुः॥ **3.26.7** ॥ 819

चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान्।
हत्वा चाश्वान् शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः॥ **3.26.8**॥ 820

शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि।
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः॥ **3.26.9**॥ 821

जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम्।
वेष्टितं काञ्चनैः पट्टैर्देवसैन्याभिमर्दनम्॥ **3.26.10**॥ 822

आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम्।
वज्राशनिसमस्पर्शं परगोपुरदारणम्॥ **3.26.11**॥ 823

तं महोरगसङ्काशं प्रगृह्य परिघं रणे।
दूषणोऽभ्यपतद् रामं क्रूरकर्मा निशाचरः॥ **3.26.12**॥ 824

तस्याभिपतमानस्य दूषणस्य च राघवः।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ॥ **3.26.13**॥ 825

भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि।
परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः॥ **3.26.14**॥ 826

कराभ्यां च विकीर्णाभ्यां पपात भुवि दूषणः।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः॥ **3.26.15**॥ 827

दृष्ट्वा तं पतितं भूमौ दूषणं निहतं रणे।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन्॥ **3.26.16**॥ 828

एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः।
संहत्याभ्यद्रवन् रामं मृत्युपाशावपाशिताः॥ **3.26.17**॥ 829

महाकपालः स्थूलाक्षः प्रमाथी च महाबलः।
महाकपालो विपुलं शूलमुद्यम्य राक्षसः॥ **3.26.18**॥ 830

स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम्।
दृष्ट्वैवापततस्तांस्तु राघवः सायकैः शितैः॥ **3.26.19**॥ 831

तीक्ष्णाग्रैः प्रतिजग्राह सम्प्राप्तानतिथीनिव।
महाकपालस्य शिरश्चिच्छेद रघुनन्दनः॥ **3.26.20**॥ 832

असङ्ख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम्।
स्थूलाक्षस्याक्षिणी स्थूले पूरयामास सायकैः॥ **3.26.21**॥ 833

स पपात हतो भूमौ विटपीव महाद्रुमः।
दूषणस्यानुगान् पञ्चसाहस्रान् कुपितः क्षणात्॥ **3.26.22**॥ 834

हत्वा तु पञ्चसाहस्रैरनयद् यमसादनम्।
दूषणं निहतं श्रुत्वा तस्य चैव पदानुगान्॥ **3.26.23**॥ 835

व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान् महाबलान्।
अयं विनिहतः सङ्ख्ये दूषणः सपदानुगः॥ **3.26.24**॥ 836

महत्या सेनया सार्धं युद्ध्वा रामं कुमानुषम्।
शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः॥ **3.26.25**॥ 837

एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः॥ **3.26.26**॥ 838

दुर्जयः करवीराक्षः परुषः कालकार्मुकः।
हेममाली महामाली सर्पास्यो रुधिराशनः॥ **3.26.27**॥ 839

द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः।
राममेवाभ्यधावन्त विसृजन्तः शरोत्तमान्॥ **3.26.28**॥ 840

ततः पावकसङ्काशैर्हेमवज्रविभूषितैः।
जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः॥ **3.26.29**॥ 841

ते रुक्मपुङ्खा विशिखाः सधूमा इवपावकाः।
निजघ्नुस्तानि रक्षांसि वज्रा इव महाद्रुमान्॥ **3.26.30**॥ 842

रक्षसां तु शतं रामः शतेनैकेन कर्णिना।
सहस्रं तु सहस्रेण जघान रणमूर्धनि॥ **3.26.31**॥ 843

तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः।
निपेतुः शोणितादिग्धा धरण्यां रजनीचराः॥ **3.26.32**॥ 844

तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः।
विस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव॥ **3.26.33**॥ 845

तत्क्षणे तु महाघोरं वनं निहतराक्षसम्।
बभूव निरयप्रख्यं मांसशोणितकर्दमम्॥ **3.26.34**॥ 846

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम्।
हतान्येकेन रामेण मानुषेण पदातिना॥ **3.26.35**॥ 847

तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः।
राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः॥ **3.26.36**॥ 848

शेषा हता महावीर्या राक्षसा रणमूर्धनि।
घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते॥ **3.26.37**॥ 849

ततस्तु तद्भीमबलं महाहवे
समीक्ष्य रामेण हतं बलीयसा।
रथेन रामं महता खरस्ततः
समाससादेन्द्र इवोद्यताशनिः॥ **3.26.38**॥ 850

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षड्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तविंशः सर्गः ॥

त्रिशिरसो वधः

खरं तु रामाभिमुखं प्रयान्तं वाहिनीपतिः।
राक्षसस्त्रिशिरा नाम सन्निपत्येदमब्रवीत्॥ **3.27.1** ॥ 851

मां नियोजय विक्रान्तं त्वं निवर्तस्व साहसात्।
पश्य रामं महाबाहुं संयुगे विनिपातितम्॥ **3.27.2** ॥ 852

प्रतिजानामि ते सत्यमायुधं चाहमालभे।
यथा रामं वधिष्यामि वधार्हं सर्वरक्षसाम्॥ **3.27.3** ॥ 853

अहं वास्य रणे मृत्युरेष वा समरे मम।
विनिवर्त्य रणोत्साहं मुहूर्तं प्राश्निको भव॥ **3.27.4** ॥ 854

प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि।
मयि वा निहते रामं संयुगाय प्रयास्यसि॥ **3.27.5** ॥ 855

खरस्त्रिशिरसा तेन मृत्युलोभात् प्रसादितः।
गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ॥ **3.27.6** ॥ 856

त्रिशिरास्तु रथेनैव वाजियुक्तेन भास्वता।
अभ्यद्रवद् रणे रामं त्रिशृङ्ग इव पर्वतः॥ **3.27.7** ॥ 857

शरधारासमूहान् स महामेघ इवोत्सृजन्।
व्यसृजत् सदृशं नादं जलार्द्रस्येव दुन्दुभेः॥ **3.27.8**॥ 858

आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः।
धनुषा प्रतिजग्राह विधुन्वन् सायकाञ्शितान्॥ **3.27.9**॥ 859

स सम्प्रहारस्तुमुलो रामत्रिशिरसोस्तदा।
सम्बभूवातिबलिनोः सिंहकुञ्जरयोरिव॥ **3.27.10**॥ 860

ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः।
अमर्षी कुपितो रामः संरब्ध इदमब्रवीत्॥ **3.27.11**॥ 861

अहो विक्रमशूरस्य राक्षसस्येदृशं बलम्।
पुष्पैरिव शरैर्योऽहं ललाटेऽस्मि परिक्षतः॥ **3.27.12**॥ 862

ममापि प्रतिगृह्णीष्व शरांश्चापगुणाच्च्युतान्।
एवमुक्त्वा सुसंरब्धः शरानाशीविषोपमान्॥ **3.27.13**॥ 863

त्रिशिरोवक्षसि क्रुद्धो निजघान चतुर्दश।
चतुर्भिस्तुरगानस्य शरैः सन्नतपर्वभिः॥ **3.27.14**॥ 864

न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः।
अष्टभिः सायकैः सूतं रथोपस्थे न्यपातयत्॥ **3.27.15**॥ 865

रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम्।
ततो हतरथात् तस्मादुत्पतन्तं निशाचरम्॥ **3.27.16**॥ 866

चिच्छेद रामस्तं बाणैर्हृदये सोऽभवज्जडः।
सायकैश्चाप्रमेयात्मा सामर्षस्तस्य रक्षसः॥ **3.27.17**॥ 867

शिरांस्यपातयत् त्रीणि वेगवद्भिस्त्रिभिः शरैः।
स धूमशोणितोद्गारी रामबाणाभिपीडितः॥ **3.27.18**॥ 868

न्यपतत् पतितैः पूर्वं समरस्थो निशाचरः।
हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः॥ **3.27.19**॥ 869

द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव।
तान् खरो द्रवतो दृष्ट्वा निवर्त्य रुषितस्त्वरन्।
राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा॥ **3.27.20**॥ 870

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाविंशः सर्गः ॥

खरेण सह श्रीरामस्य घोरं युद्धम्

निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह।
खरस्याप्यभवत् त्रासो दृष्ट्वा रामस्य विक्रमम्॥ **3.28.1** ॥ 871

स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलम्।
हतमेकेन रामेण दूषणस्त्रिशिरा अपि॥ **3.28.2** ॥ 872

तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः।
आससाद खरो रामं नमुचिर्वासवं यथा॥ **3.28.3** ॥ 873

विकृष्य बलवच्चापं नाराचान् रक्तभोजनान्।
खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव॥ **3.28.4** ॥ 874

ज्यां विधुन्वन् सुबहुशः शिक्षयास्त्राणि दर्शयन्।
चचार समरे मार्गाञ्शरै रथगतः खरः॥ **3.28.5** ॥ 875

स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः।
पूरयामास तं दृष्ट्वा रामोऽपि सुमहद् धनुः॥ **3.28.6** ॥ 876

स सायकैर्दुर्विषहैर्विस्फुलिङ्गैरिवाग्निभिः।
नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः॥ **3.28.7** ॥ 877

तद् बभूव शितैर्बाणैः खररामविसर्जितैः।
पर्याकाशमनाकाशं सर्वतः शरसङ्कुलम्॥ **3.28.8**॥ 878

शरजालावृतः सूर्यो न तदा स्म प्रकाशते।
अन्योन्यवधसंरम्भादुभयोः सम्प्रयुध्यतोः॥ **3.28.9**॥ 879

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः।
आजघान रणे रामं तोत्रैरिव महाद्विपम्॥ **3.28.10**॥ 880

तं रथस्थं धनुष्पाणिं राक्षसं पर्यवस्थितम्।
ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम्॥ **3.28.11**॥ 881

हन्तारं सर्वसैन्यस्य पौरुषे पर्यवस्थितम्।
परिश्रान्तं महासत्त्वं मेने रामं खरस्तदा॥ **3.28.12**॥ 882

तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम्।
दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा॥ **3.28.13**॥ 883

ततः सूर्यनिकाशेन रथेन महता खरः।
आससादाथ तं रामं पतङ्ग इव पावकम्॥ **3.28.14**॥ 884

ततोऽस्य सशरं चापं मुष्टिदेशे महात्मनः।
खरश्चिच्छेद रामस्य दर्शयन् हस्तलाघवम्॥ **3.28.15**॥ 885

स पुनस्त्वपरान् सप्त शरानादाय मर्मणि।
निजघान रणे क्रुद्धः शक्राशनिसमप्रभान्॥ **3.28.16**॥ 886

ततः शरसहस्रेण राममप्रतिमौजसम्।
अर्दयित्वा महानादं ननाद समरे खरः॥ **3.28.17**॥ 887

ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः।
पपात कवचं भूमौ रामस्यादित्यवर्चसम्॥ **3.28.18**॥ 888

स शरैरर्पितः क्रुद्धः सर्वगात्रेषु राघवः।
रराज समरे रामो विधूमोऽग्निरिव ज्वलन्॥ **3.28.19**॥ 889

ततो गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः।
चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः॥ **3.28.20**॥ 890

सुमहद् वैष्णवं यत् तदतिसृष्टं महर्षिणा।
वरं तद् धनुरुद्यम्य खरं समभिधावत॥ **3.28.21**॥ 891

ततः कनकपुङ्खैस्तु शरैः सन्नतपर्वभिः।
चिच्छेद रामः सङ्क्रुद्धः खरस्य समरे ध्वजम्॥ **3.28.22**॥ 892

स दर्शनीयो बहुधा विच्छिन्नः काञ्चनो ध्वजः।
जगाम धरणीं सूर्यो देवतानामिवाज्ञया॥ **3.28.23**॥ 893

तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः।
विव्याध हृदि मर्मज्ञो मातङ्गमिव तोमरैः॥ **3.28.24**॥ 894

स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः।
विद्धो रुधिरसिक्ताङ्गो बभूव रुषितो भृशम्॥ **3.28.25**॥ 895

स धनुर्धन्विनां श्रेष्ठः सङ्गृह्य परमाहवे।
मुमोच परमेष्वासः षट् शरानभिलक्षितान्॥ **3.28.26**॥ 896

शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत्।
त्रिभिश्चन्द्रार्धवक्त्रैश्च वक्षस्यभिजघान ह॥ **3.28.27**॥ 897

ततः पश्चान्महातेजा नाराचान् भास्करोपमान्।
जघान राक्षसं क्रुद्धस्त्रयोदश शिलाशितान्॥ **3.28.28**॥ 898

रथस्य युगमेकेन चतुर्भिः शबलान् हयान्।
षष्ठेन च शिरः सङ्ख्ये चिच्छेद खरसारथेः॥ **3.28.29**॥ 899

त्रिभिस्त्रिवेणून् बलवान् द्वाभ्यामक्षं महाबलः।
द्वादशेन तु बाणेन खरस्य सशरं धनुः॥ **3.28.30**॥ 900

छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव।
त्रयोदशेनेन्द्रसमो बिभेद समरे खरम्॥ **3.28.31**॥ 901

प्रभग्नधन्वा विरथो हताश्वो हतसारथिः।
गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा॥ **3.28.32**॥ 902

तत् कर्म रामस्य महारथस्य
समेत्य देवाश्च महर्षयश्च।
अपूजयन् प्राञ्जलयः प्रहृष्टा -
स्तदा विमानाग्रगताः समेताः॥ **3.28.33**॥ 903

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनत्रिंशः सर्गः ॥

श्रीरामेण खरस्य भर्त्सनं खरेणापि तं प्रति परुषमुक्त्वा तदुपरि गदायाः प्रहारः श्रीरामेण तस्याः खण्डनं च

खरं तु विरथं रामो गदापाणिमवस्थितम्।
मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत्॥ **3.29.1** ॥ 904

गजाश्वरथसम्बाधे बले महति तिष्ठता।
कृतं ते दारुणं कर्म सर्वलोकजुगुप्सितम्॥ **3.29.2** ॥ 905

उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत्।
त्रयाणामपि लोकानामीश्वरोऽपि न तिष्ठति॥ **3.29.3** ॥ 906

कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर।
तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम्॥ **3.29.4** ॥ 907

लोभात् पापानि कुर्वाणः कामाद् वा यो न बुध्यते।
हृष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव॥ **3.29.5** ॥ 908

वसतो दण्डकारण्ये तापसान् धर्मचारिणः।
किं नु हत्वा महाभागान् फलं प्राप्स्यसि राक्षस॥ **3.29.6** ॥ 909

न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः।
ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः॥ **3.29.7** ॥ 910

अवश्यं लभते कर्ता फलं पापस्य कर्मणः।
घोरं पर्यागते काले द्रुमः पुष्पमिवार्तवम्॥ **3.29.8**॥ 911

नचिरात् प्राप्यते लोके पापानां कर्मणां फलम्।
सविषाणामिवान्नानां भुक्तानां क्षणदाचर॥ **3.29.9**॥ 912

पापमाचरतां घोरं लोकस्याप्रियमिच्छताम्।
अहमासादितो राज्ञा प्राणान् हन्तुं निशाचर॥ **3.29.10**॥ 913

अद्य भित्त्वा मया मुक्ताः शराः काञ्चनभूषणाः।
विदार्यातिपतिष्यन्ति वल्मीकमिव पन्नगाः॥ **3.29.11**॥ 914

ये त्वया दण्डकारण्ये भक्षिता धर्मचारिणः।
तानद्य निहतः सङ्ख्ये ससैन्योऽनुगमिष्यसि॥ **3.29.12**॥ 915

अद्य त्वां निहतं बाणैः पश्यन्तु परमर्षयः।
निरयस्थं विमानस्था ये त्वया निहताः पुरा॥ **3.29.13**॥ 916

प्रहरस्व यथाकामं कुरु यत्नं कुलाधम।
अद्य ते पातयिष्यामि शिरस्तालफलं यथा॥ **3.29.14**॥ 917

एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः।
प्रत्युवाच ततो रामं प्रहसन् क्रोधमूर्च्छितः॥ **3.29.15**॥ 918

प्राकृतान् राक्षसान् हत्वा युद्धे दशरथात्मज।
आत्मना कथमात्मानमप्रशस्यं प्रशंससि॥ **3.29.16**॥ 919

विक्रान्ता बलवन्तो वा ये भवन्ति नरर्षभाः।
कथयन्ति न ते किञ्चित् तेजसा चातिगर्विताः॥ **3.29.17**॥ 920

प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः।
निरर्थकं विकत्थन्ते यथा राम विकत्थसे॥ **3.29.18**॥ 921

कुलं व्यपदिशन् वीरः समरे कोऽभिधास्यति।
मृत्युकाले तु सम्प्राप्ते स्वयमप्रस्तवे स्तवम्॥ **3.29.19**॥ 922

सर्वथा तु लघुत्वं ते कत्थनेन विदर्शितम्।
सुवर्णप्रतिरूपेण तप्तेनेव कुशाग्निना॥ **3.29.20**॥ 923

न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम्।
धराधरमिवाकम्प्यं पर्वतं धातुभिश्चितम्॥ **3.29.21**॥ 924

पर्याप्तोऽहं गदापाणिर्हन्तुं प्राणान् रणे तव।
त्रयाणामपि लोकानां पाशहस्त इवान्तकः॥ **3.29.22**॥ 925

कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहम्।
अस्तं प्राप्नोति सविता युद्धविघ्नस्ततो भवेत्॥ **3.29.23**॥ 926

चतुर्दश सहस्राणि राक्षसानां हतानि ते।
त्वद्विनाशात् करोम्यद्य तेषामश्रुप्रमार्जनम्॥ **3.29.24**॥ 927

इत्युक्त्वा परमक्रुद्धः स गदां परमाङ्गदाम्।
खरश्चिक्षेप रामाय प्रदीप्तामशनिं यथा॥ **3.29.25**॥ 928

खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा।
भस्म वृक्षांश्च गुल्मांश्च कृत्वागात् तत्समीपतः॥ **3.29.26**॥ 929

तामापतन्तीं महतीं मृत्युपाशोपमां गदाम्।
अन्तरिक्षगतां रामश्चिच्छेद बहुधा शरैः॥ **3.29.27**॥ 930

सा विशीर्णा शरैर्भिन्ना पपात धरणीतले।
गदा मन्त्रौषधिबलैर्व्यालीव विनिपातिता॥ **3.29.28**॥ 931

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिंशः सर्गः ॥

श्रीरामेण परुषमुक्तस्य खरस्य तं प्रति परुषोक्तिस्तदुपरि खरेण शालेन प्रहारश्च तं शालं छित्त्वा श्रीरामेण खरस्य वधो देवैर्मुनिभिश्च श्रीरामस्य स्तवनम्

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः।
स्मयमान इदं वाक्यं संरब्धमिदमब्रवीत्॥ **3.30.1**॥ 932

एतत् ते बलसर्वस्वं दर्शितं राक्षसाधम।
शक्तिहीनतरो मत्तो वृथा त्वमुपगर्जसि॥ **3.30.2**॥ 933

एषा बाणविनिर्भिन्ना गदा भूमितलं गता।
अभिधानप्रगल्भस्य तव प्रत्ययघातिनी॥ **3.30.3**॥ 934

यत् त्वयोक्तं विनष्टानामिदमश्रुप्रमार्जनम्।
राक्षसानां करोमीति मिथ्या तदपि ते वचः॥ **3.30.4**॥ 935

नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः।
प्राणानपहरिष्यामि गरुत्मानमृतं यथा॥ **3.30.5**॥ 936

अद्य ते भिन्नकण्ठस्य फेनबुद्बुदभूषितम्।
विदारितस्य मद्बाणैर्मही पास्यति शोणितम्॥ **3.30.6**॥ 937

पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः।
स्वप्स्यसे गां समाश्लिष्य दुर्लभां प्रमदामिव॥ **3.30.7**॥ 938

प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने।
भविष्यन्ति शरण्यानां शरण्या दण्डका इमे॥ **3.30.8**॥ 939

जनस्थाने हतस्थाने तव राक्षस मच्छरैः।
निर्भया विचरिष्यन्ति सर्वतो मुनयो वने॥ **3.30.9**॥ 940

अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः।
बाष्पार्द्रवदना दीना भयादन्यभयावहाः॥ **3.30.10**॥ 941

अद्य शोकरसज्ञास्ता भविष्यन्ति निरर्थिकाः।
अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः॥ **3.30.11**॥ 942

नृशंसशील क्षुद्रात्मन् नित्यं ब्राह्मणकण्टक।
त्वत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः॥ **3.30.12**॥ 943

तमेवमभिसंरब्धं ब्रुवाणं राघवं वने।
खरो निर्भर्त्सयामास रोषात् खरतरस्वरः॥ **3.30.13**॥ 944

दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः।
वाच्यावाच्यं ततो हि त्वं मृत्योर्वश्यो न बुध्यसे॥ **3.30.14**॥ 945

कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये।
कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः॥ **3.30.15**॥ 946

एवमुक्त्वा ततो रामं संरुध्य भृकुटिं ततः।
स ददर्श महासालमविदूरे निशाचरः॥ **3.30.16**॥ 947

रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन्।
स तमुत्पाटयामास सन्दष्टदशनच्छदम्॥ **3.30.17**॥ 948

तं समुत्क्षिप्य बाहुभ्यां विनर्दित्वा महाबलः।
राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत्॥ **3.30.18**॥ 949

तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान्।
रोषमाहारयत् तीव्रं निहन्तुं समरे खरम्॥ **3.30.19**॥ 950

जातस्वेदस्ततो रामो रोषरक्तान्तलोचनः।
निर्बिभेद सहस्रेण बाणानां समरे खरम्॥ **3.30.20**॥ 951

तस्य बाणान्तराद् रक्तं बहु सुस्राव फेनिलम्।
गिरेः प्रस्रवणस्येव धाराणां च परिस्रवः॥ **3.30.21**॥ 952

विकलः स कृतो बाणैः खरो रामेण संयुगे।
मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद् द्रुतम्॥ **3.30.22**॥ 953

तमापतन्तं सङ्क्रुद्धं कृतास्त्रो रुधिराप्लुतम्।
अपासर्पद् द्वित्रिपदं किञ्चित्त्वरितविक्रमः॥ **3.30.23**॥ 954

ततः पावकसङ्काशं वधाय समरे शरम्।
खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम्॥ **3.30.24**॥ 955

स तद् दत्तं मघवता सुरराजेन धीमता।
सन्दधे च स धर्मात्मा मुमोच च खरं प्रति॥ **3.30.25**॥ 956

स विमुक्तो महाबाणो निर्घातसमनिःस्वनः।
रामेण धनुरायम्य खरस्योरसि चापतत्॥ **3.30.26**॥ 957

स पपात खरो भूमौ दह्यमानः शराग्निना।
रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथान्धकः॥ **3.30.27**॥ 958

स वृत्र इव वज्रेण फेनेन नमुचिर्यथा।
बलो वेन्द्राशनिहतो निपपात हतः खरः॥ **3.30.28**॥ 959

एतस्मिन्नन्तरे देवाश्चारणैः सह सङ्गताः।
दुन्दुभीश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः॥ **3.30.29**॥ 960

रामस्योपरि संहृष्टा ववर्षुर्विस्मितास्तदा।
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः॥ **3.30.30**॥ 961

चतुर्दश सहस्राणि रक्षसां कामरूपिणाम्।
खरदूषणमुख्यानां निहतानि महामृधे॥ **3.30.31**॥ 962

अहो बत महत्कर्म रामस्य विदितात्मनः।
अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते॥ **3.30.32**॥ 963

इत्येवमुक्त्वा ते सर्वे ययुर्देवा यथागतम्।
ततो राजर्षयः सर्वे सङ्गताः परमर्षयः॥ **3.30.33**॥ 964

सभाज्य मुदिता रामं सागस्त्या इदमब्रुवन्।
एतदर्थं महातेजा महेन्द्रः पाकशासनः॥ **3.30.34**॥ 965

शरभङ्गाश्रमं पुण्यमाजगाम पुरन्दरः।
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः॥ **3.30.35**॥ 966

एषां वधार्थं शत्रूणां रक्षसां पापकर्मणाम्।
तदिदं नः कृतं कार्यं त्वया दशरथात्मज॥ **3.30.36**॥ 967

स्वधर्मं प्रचरिष्यन्ति दण्डकेषु महर्षयः।
एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया॥ **3.30.37**॥ 968

गिरिदुर्गाद् विनिष्क्रम्य संविवेशाश्रमे सुखी।
ततो रामस्तु विजयी पूज्यमानो महर्षिभिः॥ **3.30.38**॥ 969

प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिपूजितः।
तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम्॥ **3.30.39**॥ 970

बभूव हृष्टा वैदेही भर्तारं परिषस्वजे।
मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान्।
रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा॥ **3.30.40**॥ 971

ततस्तु तं राक्षससङ्घमर्दनं
सम्पूज्यमानं मुदितैर्महात्मभिः।
पुनः परिष्वज्य मुदान्वितानना
बभूव हृष्टा जनकात्मजा तदा॥ **3.30.41**॥ 972

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकत्रिंशः सर्गः ॥

अकम्पनसम्मत्या रावणस्य सीतापहरणाय गमनं मारीचस्य वचसा तस्य पुनर्लङ्कायामेव परावर्तनम्

त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः।
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत्॥ **3.31.1** ॥ 973

जनस्थानस्थिता राजन् राक्षसा बहवो हताः।
खरश्च निहतः सङ्ख्ये कथञ्चिदहमागतः॥ **3.31.2** ॥ 974

एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः।
अकम्पनमुवाचेदं निर्दहन्निव तेजसा॥ **3.31.3** ॥ 975

केन भीमं जनस्थानं हतं मम परासुना।
को हि सर्वेषु लोकेषु गतिं नाधिगमिष्यति॥ **3.31.4** ॥ 976

न हि मे विप्रियं कृत्वा शक्यं मघवता सुखम्।
प्राप्तुं वैश्रवणेनापि न यमेन च विष्णुना॥ **3.31.5** ॥ 977

कालस्य चाप्यहं कालो दहेयमपि पावकम्।
मृत्युं मरणधर्मेण संयोजयितुमुत्सहे॥ **3.31.6** ॥ 978

वातस्य तरसा वेगं निहन्तुमपि चोत्सहे।
दहेयमपि सङ्क्रुद्धस्तेजसाऽऽदित्यपावकौ॥ **3.31.7** ॥ 979

तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः।
भयात् सन्दिग्धया वाचा रावणं याचतेऽभयम्॥ **3.31.8**॥ 980

दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः।
स विस्रब्धोऽब्रवीद् वाक्यमसन्दिग्धमकम्पनः॥ **3.31.9**॥ 981

पुत्रो दशरथस्यास्ते सिंहसंहननो युवा।
रामो नाम महास्कन्धो वृत्तायतमहाभुजः॥ **3.31.10**॥ 982

श्यामः पृथुयशाः श्रीमानतुल्यबलविक्रमः।
हतस्तेन जनस्थाने खरश्च सहदूषणः॥ **3.31.11**॥ 983

अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः।
नागेन्द्र इव निःश्वस्य इदं वचनमब्रवीत्॥ **3.31.12**॥ 984

स सुरेन्द्रेण संयुक्तो रामः सर्वामरैः सह।
उपयातो जनस्थानं ब्रूहि कच्चिदकम्पन॥ **3.31.13**॥ 985

रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः।
आचचक्षे बलं तस्य विक्रमं च महात्मनः॥ **3.31.14**॥ 986

रामो नाम महातेजाः श्रेष्ठः सर्वधनुष्मताम्।
दिव्यास्त्रगुणसम्पन्नः परं धर्मं गतो युधि॥ **3.31.15**॥ 987

तस्यानुरूपो बलवान् रक्ताक्षो दुन्दुभिस्वनः।
कनीयान् लक्ष्मणो भ्राता राकाशशिनिभाननः॥ **3.31.16**॥ 988

स तेन सह संयुक्तः पावकेनानिलो यथा।
श्रीमान् राजवरस्तेन जनस्थानं निपातितम्॥ **3.31.17**॥ 989

नैव देवा महात्मानो नात्र कार्या विचारणा।
शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः॥ **3.31.18**॥ 990

सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान्।
येन येन च गच्छन्ति राक्षसा भयकर्षिताः॥ **3.31.19**॥ 991

तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थितम्।
इत्थं विनाशितं तेन जनस्थानं तवानघ॥ **3.31.20**॥ 992

अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत्।
गमिष्यामि जनस्थानं रामं हन्तुं सलक्ष्मणम्॥ **3.31.21**॥ 993

अथैवमुक्ते वचने प्रोवाचेदमकम्पनः।
शृणु राजन् यथावृत्तं रामस्य बलपौरुषम्॥ **3.31.22**॥ 994

असाध्यः कुपितो रामो विक्रमेण महायशाः।
आपगायास्तु पूर्णाया वेगं परिहरेच्छरैः॥ **3.31.23**॥ 995

सताराग्रहनक्षत्रं नभश्चाप्यवसादयेत्।
असौ रामस्तु सीदन्ती श्रीमानभ्युद्धरेन्महीम्॥ **3.31.24**॥ 996

भित्त्वा वेलां समुद्रस्य लोकानाप्लावयेद् विभुः।
वेगं वापि समुद्रस्य वायुं वा विधमेच्छरैः॥ **3.31.25**॥ 997

संहत्य वा पुनर्लोकान् विक्रमेण महायशाः।
शक्तः श्रेष्ठः स पुरुषः स्रष्टं पुनरपि प्रजाः॥ **3.31.26**॥ 998

नहि रामो दशग्रीव शक्यो जेतुं रणे त्वया।
रक्षसां वापि लोकेन स्वर्गः पापजनैरिव॥ **3.31.27**॥ 999

न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि।
अयं तस्य वधोपायस्तन्ममैकमनाः शृणु॥ **3.31.28**॥ 1000

भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा।
श्यामा समविभक्ताङ्गी स्त्रीरत्नं रत्नभूषिता॥ **3.31.29**॥ 1001

नैव देवी न गन्धर्वी नाप्सरा न च पन्नगी।
तुल्या सीमन्तिनी तस्या मानुषी तु कुतो भवेत्॥ **3.31.30**॥ 1002

तस्यापहर भार्यां त्वं तं प्रमथ्य महावने।
सीतया रहितो रामो न चैव हि भविष्यति॥ **3.31.31**॥ 1003

अरोचयत तद्वाक्यं रावणो राक्षसाधिपः।
चिन्तयित्वा महाबाहुरकम्पनमुवाच ह॥ **3.31.32**॥ 1004

बाढं कल्यं गमिष्यामि ह्येकः सारथिना सह।
आनेष्यामि च वैदेहीमिमां हृष्टो महापुरीम्॥ **3.31.33**॥ 1005

तदेवमुक्त्वा प्रययौ खरयुक्तेन रावणः।
रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन्॥ **3.31.34**॥ 1006

स रथो राक्षसेन्द्रस्य नक्षत्रपथगो महान्।
चञ्चुर्यमाणः शुशुभे जलदे चन्द्रमा इव॥ **3.31.35**॥ 1007

स दूरे चाश्रमं गत्वा ताटकेयमुपागमत्।
मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः॥ **3.31.36**॥ 1008

तं स्वयं पूजयित्वा तु आसनेनोदकेन च।
अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत्॥ **3.31.37**॥ 1009

कच्चित् सुकुशलं राजन् लोकानां राक्षसाधिप।
आशङ्के नाधिजाने त्वं यतस्तूर्णमुपागतः॥ **3.31.38**॥ 1010

एवमुक्तो महातेजा मारीचेन स रावणः।
ततः पश्चादिदं वाक्यमब्रवीद् वाक्यकोविदः॥ **3.31.39**॥ 1011

आरक्षो मे हतस्तात रामेणाक्लिष्टकारिणा।
जनस्थानमवध्यं तत् सर्वं युधि निपातितम्॥ **3.31.40**॥ 1012

तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे।
राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत्॥ **3.31.41**॥ 1013

आख्याता केन वा सीता मित्ररूपेण शत्रुणा।
त्वया राक्षसशार्दूल को न नन्दति नन्दितः॥ **3.31.42**॥ 1014

सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे।
रक्षोलोकस्य सर्वस्य कः शृङ्गं छेत्तुमिच्छति॥ **3.31.43**॥ 1015

प्रोत्साहयति यश्च त्वां स च शत्रुरसंशयम्।
आशीविषमुखाद् दंष्ट्रामुद्धर्तुं चेच्छति त्वया॥ **3.31.44**॥ 1016

कर्मणानेन केनासि कापथं प्रतिपादितः।
सुखसुप्तस्य ते राजन् प्रहृतं केन मूर्धनि॥ **3.31.45**॥ 1017

विशुद्धवंशाभिजनाग्रहस्त -
तेजोमदः संस्थितदोर्विषाणः।
उदीक्षितुं रावण नेह युक्तः
स संयुगे राघवगन्धहस्ती॥ **3.31.46**॥ 1018

असौ रणान्तःस्थितिसन्धिवालो
विदग्धरक्षोमृगहा नृसिंहः।
सुप्तस्त्वया बोधयितुं न शक्यः
शराङ्गपूर्णो निशितासिदंष्ट्रः॥ **3.31.47**॥ 1019

चापापहारे भुजवेगपङ्के
शरोर्मिमाले सुमहाहवौघे।
न रामपातालमुखेऽतिघोरे
प्रस्कन्दितुं राक्षसराज युक्तम्॥ **3.31.48**॥ 1020

प्रसीद लङ्केश्वर राक्षसेन्द्र
लङ्कां प्रसन्नो भव साधु गच्छ।
त्वं स्वेषु दारेषु रमस्व नित्यं
रामः सभार्यो रमतां वनेषु॥ 3.31.49॥ 1021

एवमुक्तो दशग्रीवो मारीचेन स रावणः।
न्यवर्तत पुरीं लङ्कां विवेश च गृहोत्तमम्॥ 3.31.50॥ 1022

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वात्रिंशः सर्गः ॥

शूर्पणखाया लङ्कायां रावणस्य पार्श्वे गमनम्

ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश।
हतान्येकेन रामेण रक्षसां भीमकर्मणाम्॥ **3.32.1** ॥ 1023

दूषणं च खरं चैव हतं त्रिशिरसं रणे।
दृष्ट्वा पुनर्महानादान् ननाद जलदोपमा॥ **3.32.2** ॥ 1024

सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम्।
जगाम परमोद्विग्ना लङ्कां रावणपालिताम्॥ **3.32.3** ॥ 1025

सा ददर्श विमानाग्रे रावणं दीप्ततेजसम्।
उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम्॥ **3.32.4** ॥ 1026

आसीनं सूर्यसङ्काशे काञ्चने परमासने।
रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम्॥ **3.32.5** ॥ 1027

देवगन्धर्वभूतानामृषीणां च महात्मनाम्।
अजेयं समरे घोरं व्यात्ताननमिवान्तकम्॥ **3.32.6** ॥ 1028

देवासुरविमर्देषु वज्राशनिकृतव्रणम्।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम्॥ **3.32.7** ॥ 1029

विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम्।
विशालवक्षसं वीरं राजलक्षणलक्षितम्॥ **3.32.8**॥ 1030

नद्धवैदूर्यसङ्काशं तप्तकाञ्चनभूषणम्।
सुभुजं शुक्लदशनं महास्यं पर्वतोपमम्॥ **3.32.9**॥ 1031

विष्णुचक्रनिपातैश्च शतशो देवसंयुगे।
अन्यैः शस्त्रैः प्रहारैश्च महायुद्धेषु ताडितम्॥ **3.32.10**॥ 1032

अहताङ्गैः समस्तैस्तं देवप्रहरणैस्तदा।
अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम्॥ **3.32.11**॥ 1033

क्षेप्तारं पर्वताग्राणां सुराणां च प्रमर्दनम्।
उच्छेत्तारं च धर्माणां परदाराभिमर्शनम्॥ **3.32.12**॥ 1034

सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा।
पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम्॥ **3.32.13**॥ 1035

तक्षकस्य प्रियां भार्यां पराजित्य जहार यः।
कैलासं पर्वतं गत्वा विजित्य नरवाहनम्॥ **3.32.14**॥ 1036

विमानं पुष्पकं तस्य कामगं वै जहार यः।
वनं चैत्ररथं दिव्यं नलिनी नन्दनं वनम्॥ **3.32.15**॥ 1037

विनाशयति यः क्रोधाद् देवोद्यानानि वीर्यवान्।
चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परन्तपौ॥ **3.32.16**॥ 1038

निवारयति बाहुभ्यां यः शैलशिखरोपमः।
दशवर्षसहस्राणि तपस्तप्त्वा महावने॥ **3.32.17**॥ 1039

पुरा स्वयम्भुवे धीरः शिरांस्युपजहार यः।
देवदानवगन्धर्वपिशाचपतगोरगैः॥ **3.32.18**॥ 1040

अभयं यस्य सङ्ग्रामे मृत्युतो मानुषादृते।
मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः॥ **3.32.19**॥ 1041

हविर्धानेषु यः सोममुपहन्ति महाबलः।
प्राप्तयज्ञहरं दुष्टं ब्रह्मघ्नं क्रूरकारिणम्॥ **3.32.20**॥ 1042

कर्कशं निरनुक्रोशं प्रजानामहिते रतम्।
रावणं सर्वभूतानां सर्वलोकभयावहम्॥ **3.32.21**॥ 1043

राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलम्।
तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम्॥ **3.32.22**॥ 1044

आसने सूपविष्टं तं काले कालमिवोद्यतम्।
राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम्॥ **3.32.23**॥ 1045

उपगम्याब्रवीद् वाक्यं राक्षसी भयविह्वला।
रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम्॥ **3.32.24**॥ 1046

तमब्रवीद् दीप्तविशाललोचनं
प्रदर्शयित्वा भयलोभमोहिता।
सुदारुणं वाक्यमभीतचारिणी
महात्मना शूर्पणखा विरूपिता॥ **3.32.25**॥ 1047

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्वात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयस्त्रिंशः सर्गः ॥

शूर्पणखाकर्तृकं रावणस्य भर्त्सनम्

ततः शूर्पणखा दीना रावणं लोकरावणम्।
अमात्यमध्ये सङ्क्रुद्धा परुषं वाक्यमब्रवीत्॥ **3.33.1** ॥ 1048

प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः।
समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे॥ **3.33.2** ॥ 1049

सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम्।
लुब्धं न बहु मन्यन्ते श्मशानाग्निमिव प्रजाः॥ **3.33.3** ॥ 1050

स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः।
स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति॥ **3.33.4** ॥ 1051

अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम्।
वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः॥ **3.33.5** ॥ 1052

ये न रक्षन्ति विषयमस्वाधीनं नराधिपाः।
ते न वृद्ध्या प्रकाशन्ते गिरयः सागरे यथा॥ **3.33.6** ॥ 1053

आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः।
अयुक्तचारश्चपलः कथं राजा भविष्यसि॥ **3.33.7** ॥ 1054

त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस।
ज्ञातव्यं तन्न जानीषे कथं राजा भविष्यसि॥ **3.33.8**॥ 1055

येषां चाराश्च कोशश्च नयश्च जयतां वर।
अस्वाधीना नरेन्द्राणां प्राकृतैस्ते जनैः समाः॥ **3.33.9**॥ 1056

यस्मात् पश्यन्ति दूरस्थान् सर्वानर्थान् नराधिपाः।
चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः॥ **3.33.10**॥ 1057

अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्युतः।
स्वजनं च जनस्थानं निहतं नावबुध्यसे॥ **3.33.11**॥ 1058

चर्तुदश सहस्राणि रक्षसां भीमकर्मणाम्।
हतान्येकेन रामेण खरश्च सहदूषणः॥ **3.33.12**॥ 1059

ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः।
धर्षितं च जनस्थानं रामेणाक्लिष्टकारिणा॥ **3.33.13**॥ 1060

त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च राक्षस।
विषये स्वे समुत्पन्नं यद् भयं नावबुध्यसे॥ **3.33.14**॥ 1061

तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम्।
व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम्॥ **3.33.15**॥ 1062

अतिमानिनमग्राह्यमात्मसम्भावितं नरम्।
क्रोधनं व्यसने हन्ति स्वजनोऽपि नराधिपम्॥ **3.33.16**॥ 1063

नानुतिष्ठति कार्याणि भयेषु न बिभेति च।
क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो भवेदिह॥ **3.33.17**॥ 1064

शुष्ककाष्ठैर्भवेत् कार्यं लोष्ठैरपि च पांसुभिः।
न तु स्थानात् परिभ्रष्टैः कार्यं स्याद् वसुधाधिपैः॥ **3.33.18**॥ 1065

उपभुक्तं यथा वासः स्रजो वा मृदिता यथा।
एवं राज्यात् परिभ्रष्टः समर्थोऽपि निरर्थकः॥ **3.33.19**॥ 1066

अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः।
कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम्॥ **3.33.20**॥ 1067

नयनाभ्यां प्रसुप्तो वा जागर्ति नयचक्षुषा।
व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः॥ **3.33.21**॥ 1068

त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः।
यस्य तेऽविदितश्चारै रक्षसां सुमहान् वधः॥ **3.33.22**॥ 1069

परावमन्ता विषयेषु सङ्गवान्
न देशकालप्रविभागतत्त्ववित्।
अयुक्तबुद्धिर्गुणदोषनिश्चये
विपन्नराज्यो नचिराद् विपत्स्यसे॥ **3.33.23**॥ 1070

इति स्वदोषान् परिकीर्तितांस्तया
समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः।
धनेन दर्पेण बलेन चान्वितो
विचिन्तयामास चिरं स रावणः॥ **3.33.24**॥ 1071

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रयस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुस्त्रिंशः सर्गः ॥

रावणेन पृष्टया शूर्पणखया तस्मै सीतालक्ष्मणसहितस्य श्रीरामस्य परिचयं दत्त्वा सीतां भार्यात्वेन ग्रहीतुं तस्य प्रेरणम्

ततः शूर्पणखां दृष्ट्वा ब्रुवन्तीं परुषं वचः।
अमात्यमध्ये सङ्क्रुद्धः परिपप्रच्छ रावणः॥ **3.34.1** ॥ 1072

कश्च रामः कथंवीर्यः किंरूपः किम्पराक्रमः।
किमर्थं दण्डकारण्यं प्रविष्टश्च सुदुस्तरम्॥ **3.34.2** ॥ 1073

आयुधं किं च रामस्य येन ते राक्षसा हताः।
खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा॥ **3.34.3** ॥ 1074

तत्त्वं ब्रूहि मनोज्ञाङ्गि केन त्वं च विरूपिता।
इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता॥ **3.34.4** ॥ 1075

ततो रामं यथान्यायमाख्यातुमुपचक्रमे।
दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः॥ **3.34.5** ॥ 1076

कन्दर्पसमरूपश्च रामो दशरथात्मजः।
शक्रचापनिभं चापं विकृष्य कनकाङ्गदम्॥ **3.34.6** ॥ 1077

दीप्तान् क्षिपति नाराचान् सर्पानिव महाविषान्।
नाददानं शरान् घोरान् विमुञ्चन्तं महाबलम्॥ **3.34.7** ॥ 1078

न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे।
हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः॥ **3.34.8**॥ 1079

इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः।
रक्षसां भीमवीर्याणां सहस्राणि चतुर्दश॥ **3.34.9**॥ 1080

निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना।
अर्धाधिकमुहूर्तेन खरश्च सहदूषणः॥ **3.34.10**॥ 1081

ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः॥ **3.34.11**॥ 1082

एका कथञ्चिन्मुक्ताहं परिभूय महात्मना।
स्त्रीवधं शङ्कमानेन रामेण विदितात्मना॥ **3.34.12**॥ 1083

भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः।
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान्॥ **3.34.13**॥ 1084

अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान् बली।
रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः॥ **3.34.14**॥ 1085

रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना।
धर्मपत्नी प्रिया नित्यं भर्तुः प्रियहिते रता॥ **3.34.15**॥ 1086

सा सुकेशी सुनासोरूः सुरूपा च यशस्विनी।
देवतेव वनस्यास्य राजते श्रीरिवापरा॥ **3.34.16**॥ 1087

तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा।
सीता नाम वरारोहा वैदेही तनुमध्यमा॥ **3.34.17**॥ 1088

नैव देवी न गन्धर्वी न यक्षी न च किन्नरी।
तथारूपा मया नारी दृष्टपूर्वा महीतले॥ **3.34.18**॥ 1089

यस्य सीता भवेद् भार्या यं च हृष्टा परिष्वजेत्।
अभिजीवेत् स सर्वेषु लोकेष्वपि पुरन्दरात्॥ **3.34.19**॥ 1090

सा सुशीला वपुःश्लाघ्या रूपेणाप्रतिमा भुवि।
तवानुरूपा भार्या सा त्वं च तस्याः पतिर्वरः॥ **3.34.20**॥ 1091

तां तु विस्तीर्णजघनां पीनोत्तुङ्गपयोधराम्।
भार्यार्थे तु तवानेतुमुद्यताहं वरानना॥ **3.34.21**॥ 1092

विरूपितास्मि क्रूरेण लक्ष्मणेन महाभुज।
तां तु दृष्ट्वाद्य वैदेहीं पूर्णचन्द्रनिभाननाम्॥ **3.34.22**॥ 1093

मन्मथस्य शराणां च त्वं विधेयो भविष्यसि।
यदि तस्यामभिप्रायो भार्यात्वे तव जायते।
शीघ्रमुद्धियतां पादो जयार्थमिह दक्षिणः॥ **3.34.23**॥ 1094

रोचते यदि ते वाक्यं ममैतद् राक्षसेश्वर।
क्रियतां निर्विशङ्केन वचनं मम रावण॥ **3.34.24**॥ 1095

विज्ञायैषामशक्तिं च क्रियतां च महाबल।
सीता तवानवद्याङ्गी भार्यात्वे राक्षसेश्वर॥ **3.34.25**॥ 1096

निशम्य रामेण शरैरजिह्मगै -
हताञ्जनस्थानगतान् निशाचरान्।
खरं च दृष्ट्वा निहतं च दूषणं
त्वमद्य कृत्यं प्रतिपत्तुमर्हसि॥ **3.34.26**॥ 1097

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चत्रिंशः सर्गः ॥

सागरानुपशोभामवलोकयतो रावणस्य पुनर्मारीचस्य पार्श्व गमनम्

ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणम्।
सचिवानभ्यनुज्ञाय कार्यं बुद्ध्वा जगाम ह ॥ **3.35.1** ॥ 1098

तत् कार्यमनुगम्यान्तर्यथावदुपलभ्य च।
दोषाणां च गुणानां च सम्प्रधार्य बलाबलम् ॥ **3.35.2** ॥ 1099

इति कर्तव्यमित्येव कृत्वा निश्चयमात्मनः।
स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ **3.35.3** ॥ 1100

यानशालां ततो गत्वा प्रच्छन्नं राक्षसाधिपः।
सूतं सञ्चोदयामास रथः संयुज्यतामिति ॥ **3.35.4** ॥ 1101

एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः।
रथं संयोजयामास तस्याभिमतमुत्तमम् ॥ **3.35.5** ॥ 1102

कामगं रथमास्थाय काञ्चनं रत्नभूषितम्।
पिशाचवदनैर्युक्तं खरैः कनकभूषणैः ॥ **3.35.6** ॥ 1103

मेघप्रतिमनादेन स तेन धनदानुजः।
राक्षसाधिपतिः श्रीमान् ययौ नदनदीपतिम् ॥ **3.35.7** ॥ 1104

स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः।
स्निग्धवैदूर्यसङ्काशस्तप्तकाञ्चनभूषणः॥ **3.35.8**॥ 1105

दशास्यो विंशतिभुजो दर्शनीयपरिच्छदः।
त्रिदशारिर्मुनीन्द्रघ्नो दशशीर्ष इवाद्रिराट्॥ **3.35.9**॥ 1106

कामगं रथमास्थाय शुशुभे राक्षसाधिपः।
विद्युन्मण्डलवान् मेघः सबलाक इवाम्बरे॥ **3.35.10**॥ 1107

सशैलसागरानूपं वीर्यवानवलोकयन्।
नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः॥ **3.35.11**॥ 1108

शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः।
विशालैराश्रमपदैर्वेदिमद्भिरलङ्कृतम्॥ **3.35.12**॥ 1109

कदल्यटविसंशोभं नारिकेलोपशोभितम्।
सालैस्तालैस्तमालैश्च तरुभिश्च सुपुष्पितैः॥ **3.35.13**॥ 1110

अत्यन्तनियताहारैः शोभितं परमर्षिभिः।
नागैः सुपर्णैर्गन्धर्वैः किन्नरैश्च सहस्रशः॥ **3.35.14**॥ 1111

जितकामैश्च सिद्धैश्च चारणैश्चोपशोभितम्।
आजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः॥ **3.35.15**॥ 1112

दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतम्।
क्रीडारतविधिज्ञाभिरप्सरोभिः सहस्रशः॥ **3.35.16**॥ 1113

सेवितं देवपत्नीभिः श्रीमतीभिरुपासितम्।
देवदानवसङ्घैश्च चरितं त्वमृताशिभिः॥ **3.35.17**॥ 1114

हंसक्रौञ्चप्लवाकीर्णं सारसैः सम्प्रसादितम्।
वैदूर्यप्रस्तरं स्निग्धं सान्द्रं सागरतेजसा॥ **3.35.18**॥ 1115

पाण्डुराणि विशालानि दिव्यमाल्ययुतानि च।
तूर्यगीताभिजुष्टानि विमानानि समन्ततः॥ **3.35.19**॥ 1116

तपसा जितलोकानां कामगान्यभिसम्पतन्।
गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः॥ **3.35.20**॥ 1117

निर्यासरसमूलानां चन्दनानां सहस्रशः।
वनानि पश्यन् सौम्यानि घ्राणतृप्तिकराणि च॥ **3.35.21**॥ 1118

अगुरूणां च मुख्यानां वनान्युपवनानि च।
तक्कोलानां च जात्यानां फलिनां च सुगन्धिनाम्॥ **3.35.22**॥ 1119

पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च।
मुक्तानां च समूहानि शुष्यमाणानि तीरतः॥ **3.35.23**॥ 1120

शैलानि प्रवरांश्चैव प्रवालनिचयांस्तथा।
काञ्चनानि च शृङ्गाणि राजतानि तथैव च॥ **3.35.24**॥ 1121

प्रस्रवाणि मनोज्ञानि प्रसन्नान्यद्भुतानि च।
धनधान्योपपन्नानि स्त्रीरत्नैरावृतानि च॥ **3.35.25**॥ 1122

हस्त्यश्वरथगाढानि नगराणि विलोकयन्।
तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम्॥ **3.35.26**॥ 1123

अनूपे सिन्धुराजस्य ददर्श त्रिदिवोपमम्।
तत्रापश्यत् स मेघाभं न्यग्रोधं मुनिभिर्वृतम्॥ **3.35.27**॥ 1124

समन्ताद् यस्य ताः शाखाः शतयोजनमायताः।
यस्य हस्तिनमादाय महाकायं च कच्छपम्॥ **3.35.28**॥ 1125

भक्षार्थं गरुडः शाखामाजगाम महाबलः।
तस्य तां सहसा शाखां भारेण पतगोत्तमः॥ **3.35.29**॥ 1126

सुपर्णः पर्णबहुलां बभञ्जाथ महाबलः।
तत्र वैखानसा माषा वालखिल्या मरीचिपाः॥ **3.35.30**॥ 1127

आजा बभूवुर्धूम्राश्च सङ्गताः परमर्षयः।
तेषां दयार्थं गरुडस्तां शाखां शतयोजनाम्॥ **3.35.31**॥ 1128

भग्नामादाय वेगेन तौ चोभौ गजकच्छपौ।
एकपादेन धर्मात्मा भक्षयित्वा तदामिषम्॥ **3.35.32**॥ 1129

निषादविषयं हत्वा शाखया पतगोत्तमः।
प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन्॥ **3.35.33**॥ 1130

स तु तेन प्रहर्षेण द्विगुणीकृतविक्रमः।
अमृतानयनार्थं वै चकार मतिमान् मतिम्॥ **3.35.34**॥ 1131

अयोजालानि निर्मथ्य भित्त्वा रत्नगृहं वरम्।
महेन्द्रभवनाद् गुप्तमाजहारामृतं ततः॥ **3.35.35**॥ 1132

तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम्।
नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः॥ **3.35.36**॥ 1133

तं तु गत्वा परं पारं समुद्रस्य नदीपतेः।
ददर्शाश्रममेकान्ते पुण्ये रम्ये वनान्तरे॥ **3.35.37**॥ 1134

तत्र कृष्णाजिनधरं जटामण्डलधारिणम्।
ददर्श नियताहारं मारीचं नाम राक्षसम्॥ **3.35.38**॥ 1135

स रावणः समागम्य विधिवत् तेन रक्षसा।
मारीचेनार्चितो राजा सर्वकामैरमानुषैः॥ **3.35.39**॥ 1136

तं स्वयं पूजयित्वा च भोजनेनोदकेन च।
अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत्॥ **3.35.40**॥ 1137

कच्चित्ते कुशलं राजल्लङ्कायां राक्षसेश्वर।
केनार्थेन पुनस्त्वं वै तूर्णमेव इहागतः॥ 3.35.41॥ 1138

एवमुक्तो महातेजा मारीचेन स रावणः।
ततः पश्चादिदं वाक्यमब्रवीद् वाक्यकोविदः॥ 3.35.42॥ 1139

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्त्रिंशः सर्गः ॥

श्रीरामस्यागांसि वर्णयित्वा तत्पत्न्याः सीताया अपहरणे साहाय्यं कर्तुं मारीचं प्रति रावणस्यानुरोधः

मारीच श्रूयतां तात वचनं मम भाषतः।
आर्तोऽस्मि मम चार्तस्य भवान् हि परमा गतिः॥ **3.36.1** ॥ 1140

जानीषे त्वं जनस्थानं भ्राता यत्र खरो मम।
दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे॥ **3.36.2** ॥ 1141

त्रिशिराश्च महाबाहू राक्षसः पिशिताशनः।
अन्ये च बहवः शूरा लब्धलक्षा निशाचराः॥ **3.36.3** ॥ 1142

वसन्ति मन्नियोगेन अधिवासं च राक्षसाः।
बाधमाना महारण्ये मुनीन् ये धर्मचारिणः॥ **3.36.4** ॥ 1143

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्।
शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम्॥ **3.36.5** ॥ 1144

ते त्विदानीं जनस्थाने वसमाना महाबलाः।
सङ्गताः परमायत्ता रामेण सह संयुगे॥ **3.36.6** ॥ 1145

नानाशस्त्रप्रहरणाः खरप्रमुखराक्षसाः।
तेन सञ्जातरोषेण रामेण रणमूर्धनि॥ **3.36.7** ॥ 1146

अनुक्त्वा परुषं किञ्चिच्छरैर्व्यापारितं धनुः।
चतुर्दश सहस्राणि रक्षसामुग्रतेजसाम्॥ **3.36.8**॥ 1147

निहतानि शरैर्दीप्तैर्मानुषेण पदातिना।
खरश्च निहतः सङ्ख्ये दूषणश्च निपातितः॥ **3.36.9**॥ 1148

हत्वा त्रिशिरसं चापि निर्भया दण्डकाः कृताः।
पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः॥ **3.36.10**॥ 1149

स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः।
अशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः॥ **3.36.11**॥ 1150

त्यक्तधर्मा त्वधर्मात्मा भूतानामहिते रतः।
येन वैरं विनारण्ये सत्त्वमास्थाय केवलम्॥ **3.36.12**॥ 1151

कर्णनासापहारेण भगिनी मे विरूपिता।
अस्य भार्यां जनस्थानात् सीतां सुरसुतोपमाम्॥ **3.36.13**॥ 1152

आनयिष्यामि विक्रम्य सहायस्तत्र मे भव।
त्वया ह्यहं सहायेन पार्श्वस्थेन महाबल॥ **3.36.14**॥ 1153

भ्रातृभिश्च सुरान् सर्वान् नाहमत्राभिचिन्तये।
तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस॥ **3.36.15**॥ 1154

वीर्ये युद्धे च दर्पे च न ह्यस्ति सदृशस्तव।
उपायतो महाञ्शूरो महामायाविशारदः॥ **3.36.16**॥ 1155

एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर।
शृणु तत् कर्म साहाय्ये यत् कार्यं वचनान्मम॥ **3.36.17**॥ 1156

सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः।
आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर॥ **3.36.18**॥ 1157

त्वां तु निःसंशयं सीता दृष्ट्वा तु मृगरूपिणम्।
गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति॥ **3.36.19**॥ 1158

ततस्तयोरपाये तु शून्ये सीतां यथासुखम्।
निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव॥ **3.36.20**॥ 1159

ततः पश्चात् सुखं रामे भार्याहरणकर्शिते।
विश्रब्धं प्रहरिष्यामि कृतार्थेनान्तरात्मना॥ **3.36.21**॥ 1160

तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः।
शुष्कं समभवद् वक्त्रं परित्रस्तो बभूव च॥ **3.36.22**॥ 1161

ओष्ठौ परिलिहञ्शुष्कौ नेत्रैरनिमिषैरिव।
मृतभूत इवार्तस्तु रावणं समुदैक्षत॥ **3.36.23**॥ 1162

स रावणं त्रस्तविषण्णचेता
महावने रामपराक्रमज्ञः।
कृताञ्जलिस्तत्त्वमुवाच वाक्यं
हितं च तस्मै हितमात्मनश्च॥ **3.36.24**॥ 1163

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षट्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तत्रिंशः सर्गः ॥

श्रीरामस्य गुणप्रभावानुपवर्ण्य मारीचेन सीताहरणोद्यमाद्रावणस्य निवारणम्

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः।
प्रत्युवाच महातेजा मारीचो राक्षसेश्वरम्॥ **3.37.1** ॥ 1164

सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥ **3.37.2** ॥ 1165

न नूनं बुध्यसे रामं महावीर्यगुणोन्नतम्।
अयुक्तचारश्चपलो महेन्द्रवरुणोपमम्॥ **3.37.3** ॥ 1166

अपि स्वस्ति भवेत् तात सर्वेषामपि रक्षसाम्।
अपि रामो न सङ्क्रुद्धः कुर्याल्लोकानराक्षसान्॥ **3.37.4** ॥ 1167

अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा।
अपि सीतानिमित्तं च न भवेद् व्यसनं महत्॥ **3.37.5** ॥ 1168

अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम्।
न विनश्येत् पुरी लङ्का त्वया सह सराक्षसा॥ **3.37.6** ॥ 1169

त्वद्विधः कामवृत्तो हि दुःशीलः पापमन्त्रितः।
आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः॥ **3.37.7** ॥ 1170

न च पित्रा परित्यक्तो नामर्यादः कथञ्चन।
न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः॥ **3.37.8**॥ 1171

न च धर्मगुणैर्हीनः कौसल्यानन्दवर्धनः।
न च तीक्ष्णो हि भूतानां सर्वभूतहिते रतः॥ **3.37.9**॥ 1172

वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम्।
करिष्यामीति धर्मात्मा ततः प्रव्रजितो वनम्॥ **3.37.10**॥ 1173

कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च।
हित्वा राज्यं च भोगांश्च प्रविष्टो दण्डकावनम्॥ **3.37.11**॥ 1174

न रामः कर्कशस्तात नाविद्वान् नाजितेन्द्रियः।
अनृतं न श्रुतं चैव नैव त्वं वक्तुमर्हसि॥ **3.37.12**॥ 1175

रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।
राजा सर्वस्य लोकस्य देवानामिव वासवः॥ **3.37.13**॥ 1176

कथं नु तस्य वैदेहीं रक्षितां स्वेन तेजसा।
इच्छसे प्रसभं हर्तुं प्रभामिव विवस्वतः॥ **3.37.14**॥ 1177

शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे।
रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि॥ **3.37.15**॥ 1178

धनुर्व्यादितदीप्तास्यं शरार्चिषममर्षणम्।
चापबाणधरं तीक्ष्णं शत्रुसेनापहारिणम्॥ **3.37.16**॥ 1179

राज्यं सुखं च सन्त्यज्य जीवितं चेष्टमात्मनः।
नात्यासादयितुं तात रामान्तकमिहार्हसि॥ **3.37.17**॥ 1180

अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा।
न त्वं समर्थस्तां हर्तुं रामचापाश्रयां वने॥ **3.37.18**॥ 1181

तस्य वै नरसिंहस्य सिंहोरस्कस्य भामिनी।
प्राणेभ्योऽपि प्रियतरा भार्या नित्यमनुव्रता॥ **3.37.19**॥ 1182

न सा धर्षयितुं शक्या मैथिल्योजस्विनः प्रिया।
दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा॥ **3.37.20**॥ 1183

किमुद्यमं व्यर्थमिमं कृत्वा ते राक्षसाधिप।
दृष्टश्चेत् त्वं रणे तेन तदन्तमुपजीवितम्॥ **3.37.21**॥ 1184

जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम्।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम्॥ **3.37.22**॥ 1185

स सर्वैः सचिवैः सार्धं विभीषणपुरस्कृतैः।
मन्त्रयित्वा स धर्मिष्ठैः कृत्वा निश्चयमात्मनः।
दोषाणां च गुणानां च सम्प्रधार्य बलाबलम्॥ **3.37.23**॥ 1186

आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः।
हितं हि तव निश्चित्य क्षमं त्वं कर्तुमर्हसि॥ **3.37.24**॥ 1187

अहं तु मन्ये तव न क्षमं रणे
समागमं कोसलराजसूनुना।
इदं हि भूयः शृणु वाक्यमुत्तमं
क्षमं च युक्तं च निशाचराधिप॥ **3.37.25**॥ 1188

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टात्रिंशः सर्गः ॥

श्रीरामशक्तिविषयकमनुभवं प्रतिपाद्य मारीचेन रावणस्य श्रीरामापराधकरणान्निवारणम्

कदाचिदप्यहं वीर्यात् पर्यटन् पृथिवीमिमाम्।
बलं नागसहस्रस्य धारयन् पर्वतोपमः॥ **3.38.1** ॥ 1189

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः।
भयं लोकस्य जनयन् किरीटी परिघायुधः॥ **3.38.2** ॥ 1190

व्यचरन् दण्डकारण्यमृषिमांसानि भक्षयन्।
विश्वामित्रोऽथ धर्मात्मा मद्भित्रस्तो महामुनिः॥ **3.38.3** ॥ 1191

स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत्।
अयं रक्षतु मां रामः पर्वकाले समाहितः॥ **3.38.4** ॥ 1192

मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर।
इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा॥ **3.38.5** ॥ 1193

प्रत्युवाच महाभागं विश्वामित्रं महामुनिम्।
ऊनद्वादशवर्षोऽयमकृतास्त्रश्च राघवः॥ **3.38.6** ॥ 1194

कामं तु मम तत् सैन्यं मया सह गमिष्यति।
बलेन चतुरङ्गेण स्वयमेत्य निशाचरम्॥ **3.38.7** ॥ 1195

वधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितम्।
एवमुक्तः स तु मुनी राजानमिदमब्रवीत्॥ **3.38.8**॥ 1196

रामान्नान्यद् बलं लोके पर्याप्तं तस्य रक्षसः।
देवतानामपि भवान् समरेष्वभिपालकः॥ **3.38.9**॥ 1197

आसीत् तव कृतं कर्म त्रिलोकविदितं नृप।
काममस्ति महत् सैन्यं तिष्ठत्विह परन्तप॥ **3.38.10**॥ 1198

बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे।
गमिष्ये राममादाय स्वस्ति तेऽस्तु परन्तप॥ **3.38.11**॥ 1199

इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजम्।
जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम्॥ **3.38.12**॥ 1200

तं तथा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम्।
बभूवोपस्थितो रामश्चित्रं विस्फारयन् धनुः॥ **3.38.13**॥ 1201

अजातव्यञ्जनः श्रीमान् बालः श्यामः शुभेक्षणः।
एकवस्त्रधरो धन्वी शिखी कनकमालया॥ **3.38.14**॥ 1202

शोभयन् दण्डकारण्यं दीप्तेन स्वेन तेजसा।
अदृश्यत तदा रामो बालचन्द्र इवोदितः॥ **3.38.15**॥ 1203

ततोऽहं मेघसङ्काशस्तप्तकाञ्चनकुण्डलः।
बली दत्तवरो दर्पादाजगामाश्रमान्तरम्॥ **3.38.16**॥ 1204

तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः।
मां तु दृष्ट्वा धनुः सज्यमसम्भ्रान्तश्चकार ह॥ **3.38.17**॥ 1205

अवजानन्नहं मोहाद् बालोऽयमिति राघवम्।
विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः॥ **3.38.18**॥ 1206

तेन मुक्तस्ततो बाणः शितः शत्रुनिबर्हणः।
तेनाहं ताडितः क्षिप्तः समुद्रे शतयोजने॥ **3.38.19**॥ 1207

नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः।
रामस्य शरवेगेन निरस्तो भ्रान्तचेतनः॥ **3.38.20**॥ 1208

पातितोऽहं तदा तेन गम्भीरे सागराम्भसि।
प्राप्य संज्ञां चिरात् तात लङ्कां प्रति गतः पुरीम्॥ **3.38.21**॥ 1209

एवमस्मि तदा मुक्तः सहायास्ते निपातिताः।
अकृतास्त्रेण रामेण बालेनाक्लिष्टकर्मणा॥ **3.38.22**॥ 1210

तन्मया वार्यमाणस्तु यदि रामेण विग्रहम्।
करिष्यस्यापदं घोरां क्षिप्रं प्राप्य न शिष्यसि॥ **3.38.23**॥ 1211

क्रीडारतिविधिज्ञानां समाजोत्सवदर्शिनाम्।
रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि॥ **3.38.24**॥ 1212

हर्म्यप्रासादसम्बाधां नानारत्नविभूषिताम्।
द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते॥ **3.38.25**॥ 1213

अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात्।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा॥ **3.38.26**॥ 1214

दिव्यचन्दनदिग्धाङ्गान् दिव्याभरणभूषितान्।
द्रक्ष्यस्यभिहतान् भूमौ तव दोषात् तु राक्षसान्॥ **3.38.27**॥ 1215

हृतदारान् सदारांश्च दश विद्रवतो दिशः।
हतशेषानशरणान् द्रक्ष्यसि त्वं निशाचरान्॥ **3.38.28**॥ 1216

शरजालपरिक्षिप्तामग्निज्वालासमावृताम्।
प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वमसंशयम्॥ **3.38.29**॥ 1217

परदाराभिमर्शात् तु नान्यत् पापतरं महत्।
प्रमदानां सहस्राणि तव राजन् परिग्रहे॥ **3.38.30**॥ 1218

भव स्वदारनिरतः स्वकुलं रक्ष राक्षसान्।
मानं वृद्धिं च राज्यं च जीवितं चेष्टमात्मनः॥ **3.38.31**॥ 1219

कलत्राणि च सौम्यानि मित्रवर्गं तथैव च।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम्॥ **3.38.32**॥ 1220

निवार्यमाणः सुहृदा मया भृशं
प्रसह्य सीतां यदि धर्षयिष्यसि।
गमिष्यसि क्षीणबलः सबान्धवो
यमक्षयं रामशरास्तजीवितः॥ **3.38.33**॥ 1221

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनचत्वारिंशः सर्गः ॥

मारीचेन रावणस्य प्रबोधनम्

एवमस्मि तदा मुक्तः कथञ्चित् तेन संयुगे।
इदानीमपि यद् वृत्तं तच्छृणुष्व यदुत्तरम्॥ **3.39.1**॥ 1222

राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथाकृतः।
सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावने॥ **3.39.2**॥ 1223

दीप्तजिह्वो महादंष्ट्रस्तीक्ष्णशृङ्गो महाबलः।
व्यचरन् दण्डकारण्यं मांसभक्षो महामृगः॥ **3.39.3**॥ 1224

अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण।
अत्यन्तघोरो व्यचरंस्तापसांस्तान् प्रधर्षयन्॥ **3.39.4**॥ 1225

निहत्य दण्डकारण्ये तापसान् धर्मचारिणः।
रुधिराणि पिबंस्तेषां तन्मांसानि च भक्षयन्॥ **3.39.5**॥ 1226

ऋषिमांसाशनः क्रूरस्त्रासयन् वनगोचरान्।
तदा रुधिरमत्तोऽहं व्यचरं दण्डकावनम्॥ **3.39.6**॥ 1227

तदाहं दण्डकारण्ये विचरन् धर्मदूषकः।
आसादयं तदा रामं तापसं धर्ममाश्रितम्॥ **3.39.7**॥ 1228

वैदेहीं च महाभागां लक्ष्मणं च महारथम्।
तापसं नियताहारं सर्वभूतहिते रतम्॥ **3.39.8**॥ 1229

सोऽहं वनगतं रामं परिभूय महाबलम्।
तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन्॥ **3.39.9**॥ 1230

अभ्यधावं सुसङ्क्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः।
जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन्॥ **3.39.10**॥ 1231

तेन त्यक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः।
विकृष्य सुमहच्चापं सुपर्णानिलतुल्यगाः॥ **3.39.11**॥ 1232

ते बाणा वज्रसङ्काशाः सुघोरा रक्तभोजनाः।
आजग्मुः सहिताः सर्वे त्रयः सन्नतपर्वणः॥ **3.39.12**॥ 1233

पराक्रमज्ञो रामस्य शठो दृष्टभयः पुरा।
समुत्क्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ॥ **3.39.13**॥ 1234

शरेण मुक्तो रामस्य कथञ्चित् प्राप्य जीवितम्।
इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः॥ **3.39.14**॥ 1235

वृक्षे वृक्षे हि पश्यामि चीरकृष्णाजिनाम्बरम्।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम्॥ **3.39.15**॥ 1236

अपि रामसहस्राणि भीतः पश्यामि रावण।
रामभूतमिदं सर्वमरण्यं प्रतिभाति मे॥ **3.39.16**॥ 1237

राममेव हि पश्यामि रहिते राक्षसेश्वर।
दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः॥ **3.39.17**॥ 1238

रकारादीनि नामानि रामत्रस्तस्य रावण।
रत्नानि च रथाश्चैव वित्रासं जनयन्ति मे॥ **3.39.18**॥ 1239

अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम्।
बलिं वा नमुचिं वापि हन्याद्धि रघुनन्दनः॥ **3.39.19**॥ 1240

रणे रामेण युद्धस्व क्षमां वा कुरु रावण।
न ते रामकथा कार्या यदि मां द्रष्टुमिच्छसि॥ **3.39.20**॥ 1241

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः।
परेषामपराधेन विनष्टाः सपरिच्छदाः॥ **3.39.21**॥ 1242

सोऽहं परापराधेन विनशेयं निशाचर।
कुरु यत् ते क्षमं तत्त्वमहं त्वां नानुयामि वै॥ **3.39.22**॥ 1243

रामश्च हि महातेजा महासत्त्वो महाबलः।
अपि राक्षसलोकस्य भवेदन्तकरोऽपि हि॥ **3.39.23**॥ 1244

यदि शूर्पणखाहेतोर्जनस्थानगतः खरः।
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा।
अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः॥ **3.39.24**॥ 1245

इदं वचो बन्धुहितार्थिना मया
यथोच्यमानं यदि नाभिपत्स्यसे।
सबान्धवस्त्यक्ष्यसि जीवितं रणे
हतोऽद्य रामेण शरैरजिह्मगैः॥ **3.39.25**॥ 1246

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चत्वारिंशः सर्गः ॥

रावणेन मारीचस्य भर्त्सनं सीतापहृतौ साहाय्यं कर्तुमादेशदानं च

मारीचस्य तु तद् वाक्यं क्षमं युक्तं च रावणः।
उक्तो न प्रतिजग्राह मर्तुकाम इवौषधम्॥ **3.40.1** ॥ 1247

तं पथ्यहितवक्तारं मारीचं राक्षसाधिपः।
अब्रवीत् परुषं वाक्यमयुक्तं कालचोदितः॥ **3.40.2** ॥ 1248

दुष्कुलैतदयुक्तार्थं मारीच मयि कथ्यते।
वाक्यं निष्फलमत्यर्थं बीजमुप्तमिवोषरे॥ **3.40.3** ॥ 1249

त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे।
मूर्खस्य पापशीलस्य मानुषस्य विशेषतः॥ **3.40.4** ॥ 1250

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा।
स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः॥ **3.40.5** ॥ 1251

अवश्यं तु मया तस्य संयुगे खरघातिनः।
प्राणैः प्रियतरा सीता हर्तव्या तव सन्निधौ॥ **3.40.6** ॥ 1252

एवं मे निश्चिता बुद्धिर्हृदि मारीच विद्यते।
न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः॥ **3.40.7** ॥ 1253

दोषं गुणं वा सम्पृष्टस्त्वमेवं वक्तुमर्हसि।
अपायं वा उपायं वा कार्यस्यास्य विनिश्चये॥ **3.40.8**॥ 1254

सम्पृष्टेन तु वक्तव्यं सचिवेन विपश्चिता।
उद्यताञ्जलिना राज्ञो य इच्छेद् भूतिमात्मनः॥ **3.40.9**॥ 1255

वाक्यमप्रतिकूलं तु मृदुपूर्वं शुभं हितम्।
उपचारेण वक्तव्यो युक्तं च वसुधाधिपः॥ **3.40.10**॥ 1256

सावमर्दं तु यद्वाक्यमथवा हितमुच्यते।
नाभिनन्देत तद् राजा मानार्थी मानवर्जितम्॥ **3.40.11**॥ 1257

पञ्च रूपाणि राजानो धारयन्त्यमितौजसः।
अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च॥ **3.40.12**॥ 1258

औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम्।
धारयन्ति महात्मानो राजानः क्षणदाचर॥ **3.40.13**॥ 1259

तस्मात् सर्वास्ववस्थासु मान्याः पूज्याश्च नित्यदा।
त्वं तु धर्ममविज्ञाय केवलं मोहमाश्रितः॥ **3.40.14**॥ 1260

अभ्यागतं तु दौरात्म्यात् परुषं वदसीदृशम्।
गुणदोषौ न पृच्छामि क्षेमं चात्मनि राक्षस॥ **3.40.15**॥ 1261

मयोक्तमपि चैतावत् त्वां प्रत्यमितविक्रम।
अस्मिंस्तु स भवान् कृत्ये साहाय्यं कर्तुमर्हसि॥ **3.40.16**॥ 1262

शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम।
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः॥ **3.40.17**॥ 1263

आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर।
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि॥ **3.40.18**॥ 1264

त्वां हि मायामयं दृष्ट्वा काञ्चनं जातविस्मया।
आनयैनमिति क्षिप्रं रामं वक्ष्यति मैथिली॥ **3.40.19**॥ 1265

अपक्रान्ते च काकुत्स्थे दूरं गत्वाप्युदाहर।
हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम्॥ **3.40.20**॥ 1266

तच्छ्रुत्वा रामपदवीं सीतया च प्रचोदितः।
अनुगच्छति सम्भ्रान्तः सौमित्रिरपि सौहृदात्॥ **3.40.21**॥ 1267

अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखम्।
आहरिष्यामि वैदेहीं सहस्राक्षः शचीमिव॥ **3.40.22**॥ 1268

एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस।
राज्यस्यार्धं प्रदास्यामि मारीच तव सुव्रत॥ **3.40.23**॥ 1269

गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये।
अहं त्वानुगमिष्यामि सरथो दण्डकावनम्॥ **3.40.24**॥ 1270

प्राप्य सीतामयुद्धेन वञ्चयित्वा तु राघवम्।
लङ्कां प्रति गमिष्यामि कृतकार्यः सह त्वया॥ **3.40.25**॥ 1271

नो चेत् करोषि मारीच हन्मि त्वामहमद्य वै।
एतत् कार्यमवश्यं मे बलादपि करिष्यसि।
राज्ञो विप्रतिकूलस्थो न जातु सुखमेधते॥ **3.40.26**॥ 1272

आसाद्य तं जीवितसंशयस्ते
मृत्युर्ध्रुवो ह्यद्य मया विरुध्य।
एतद् यथावत् परिगण्य बुद्ध्या
यदत्र पथ्यं कुरु तत्तथा त्वम्॥ **3.40.27**॥ 1273

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकचत्वारिंशः सर्गः ॥

मारीचेन रावणस्य विनाशभयं प्रदर्श्य पुनः प्रतिबोधनम्

आज्ञप्तो रावणेनेत्थं प्रतिकूलं च राजवत्।
अब्रवीत् परुषं वाक्यं निःशङ्को राक्षसाधिपम्॥ **3.41.1**॥ 1274

केनायमुपदिष्टस्ते विनाशः पापकर्मणा।
सपुत्रस्य सराज्यस्य सामात्यस्य निशाचर॥ **3.41.2**॥ 1275

कस्त्वया सुखिना राजन् नाभिनन्दति पापकृत्।
केनेदमुपदिष्टं ते मृत्युद्वारमुपायतः॥ **3.41.3**॥ 1276

शत्रवस्तव सुव्यक्तं हीनवीर्या निशाचर।
इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा॥ **3.41.4**॥ 1277

केनेदमुपदिष्टं ते क्षुद्रेणाहितबुद्धिना।
यस्त्वामिच्छति नश्यन्तं स्वकृतेन निशाचर॥ **3.41.5**॥ 1278

वध्याः खलु न वध्यन्ते सचिवास्तव रावण।
ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्वशः॥ **3.41.6**॥ 1279

अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः।
निग्राह्यः सर्वथा सद्भिः स निग्राह्यो न गृह्यसे॥ **3.41.7**॥ 1280

धर्ममर्थं च कामं च यशश्च जयतां वर।
स्वामिप्रसादात् सचिवाः प्राप्नुवन्ति निशाचर॥ **3.41.8**॥ 1281

विपर्यये तु तत्सर्वं व्यर्थं भवति रावण।
व्यसनं स्वामिवैगुण्यात् प्राप्नुवन्तीतरे जनाः॥ **3.41.9**॥ 1282

राजमूलो हि धर्मश्च यशश्च जयतां वर।
तस्मात् सर्वास्ववस्थासु रक्षितव्या नराधिपाः॥ **3.41.10**॥ 1283

राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर।
न चातिप्रतिकूलेन नाविनीतेन राक्षस॥ **3.41.11**॥ 1284

ये तीक्ष्णमन्त्राः सचिवा भुज्यन्ते सह तेन वै।
विषमेषु रथाः शीघ्रं मन्दसारथयो यथा॥ **3.41.12**॥ 1285

बहवः साधवो लोके युक्तधर्ममनुष्ठिताः।
परेषामपराधेन विनष्टाः सपरिच्छदाः॥ **3.41.13**॥ 1286

स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण।
रक्ष्यमाणा न वर्धन्ते मेषा गोमायुना यथा॥ **3.41.14**॥ 1287

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः॥ **3.41.15**॥ 1288

तदिदं काकतालीयं घोरमासादितं मया।
अत्र त्वं शोचनीयोऽसि ससैन्यो विनशिष्यसि॥ **3.41.16**॥ 1289

मां निहत्य तु रामोऽसावचिरात् त्वां वधिष्यति।
अनेन कृतकृत्योऽस्मि म्रिये चाप्यरिणा हतः॥ **3.41.17**॥ 1290

दर्शनादेव रामस्य हतं मामवधारय।
आत्मानं च हतं विद्धि हृत्वा सीतां सबान्धवम्॥ **3.41.18**॥ 1291

आनयिष्यसि चेत् सीतामाश्रमात् सहितो मया।
नैव त्वमपि नाहं वै नैव लङ्का न राक्षसाः॥ **3.41.19**॥ 1292

निवार्यमाणस्तु मया हितैषिणा
न मृष्यसे वाक्यमिदं निशाचर।
परेतकल्पा हि गतायुषो नरा
हितं न गृह्णन्ति सुहृद्भिरीरितम्॥ **3.41.20**॥ 1293

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विचत्वारिंशः सर्गः ॥

सौवर्णमृगरूपं धारयित्वा मारीचस्य श्रीरामाश्रमे गमनं सीताकर्तृकं तस्य दर्शनं च

एवमुक्त्वा तु परुषं मारीचो रावणं ततः।
गच्छावेत्यब्रवीद् दीनो भयाद् रात्रिञ्चरप्रभोः॥ **3.42.1** ॥ 1294

दृष्टश्चाहं पुनस्तेन शरचापासिधारिणा।
मद्वधोद्यतशस्त्रेण निहतं जीवितं च मे॥ **3.42.2** ॥ 1295

नहि रामं पराक्रम्य जीवन् प्रतिनिवर्तते।
वर्तते प्रतिरूपोऽसौ यमदण्डहतस्य ते॥ **3.42.3** ॥ 1296

किं नु कर्तुं मया शक्यमेवं त्वयि दुरात्मनि।
एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर॥ **3.42.4** ॥ 1297

प्रहृष्टस्त्वभवत् तेन वचनेन स राक्षसः।
परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत्॥ **3.42.5** ॥ 1298

एतच्छौटीर्ययुक्तं ते मच्छन्दवशवर्तिनः।
इदानीमसि मारीचः पूर्वमन्यो हि राक्षसः॥ **3.42.6** ॥ 1299

आरुह्यतामयं शीघ्रं खगो रत्नविभूषितः।
मया सह रथो युक्तः पिशाचवदनैः खरैः॥ **3.42.7** ॥ 1300

प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि।
तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम्॥ **3.42.8**॥ 1301

ततस्तथेत्युवाचैनं रावणं ताटकासुतः।
ततो रावणमारीचौ विमानमिव तं रथम्॥ **3.42.9**॥ 1302

आरुह्याययतुः शीघ्रं तस्मादाश्रममण्डलात्।
तथैव तत्र पश्यन्तौ पत्तनानि वनानि च॥ **3.42.10**॥ 1303

गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च।
समेत्य दण्डकारण्यं राघवस्याश्रमं ततः॥ **3.42.11**॥ 1304

ददर्श सहमारीचो रावणो राक्षसाधिपः।
अवतीर्य रथात् तस्मात् ततः काञ्चनभूषणात्॥ **3.42.12**॥ 1305

हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत्।
एतद् रामाश्रमपदं दृश्यते कदलीवृतम्॥ **3.42.13**॥ 1306

क्रियतां तत् सखे शीघ्रं यदर्थं वयमागताः।
स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा॥ **3.42.14**॥ 1307

मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह।
स तु रूपं समास्थाय महदद्भुतदर्शनम्॥ **3.42.15**॥ 1308

मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः।
रक्तपद्मोत्पलमुख इन्द्रनीलोत्पलश्रवाः॥ **3.42.16**॥ 1309

किञ्चिदभ्युन्नतग्रीव इन्द्रनीलनिभोदरः।
मधूकनिभपार्श्वश्च कञ्जकिञ्जल्कसन्निभः॥ **3.42.17**॥ 1310

वैदूर्यसङ्काशखुरस्तनुजङ्घः सुसंहतः।
इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजितः॥ **3.42.18**॥ 1311

मनोहरस्निग्धवर्णो रत्नैर्नानाविधैर्वृतः।
क्षणेन राक्षसो जातो मृगः परमशोभनः॥ **3.42.19**॥ 1312

वनं प्रज्वलयन् रम्यं रामाश्रमपदं च तत्।
मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः॥ **3.42.20**॥ 1313

प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम्।
विचरन् गच्छते सम्यक् शाद्वलानि समन्ततः॥ **3.42.21**॥ 1314

रौप्यैर्बिन्दुशतैश्चित्रं भूत्वा च प्रियदर्शनः।
विटपीनां किसलयान् भक्षयन् विचचार ह॥ **3.42.22**॥ 1315

कदलीगृहकं गत्वा कर्णिकारानितस्ततः।
समाश्रयन् मन्दगतिं सीतासन्दर्शनं ततः॥ **3.42.23**॥ 1316

राजीवचित्रपृष्ठः स विरराज महामृगः।
रामाश्रमपदाभ्याशे विचचार यथासुखम्॥ **3.42.24**॥ 1317

पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः।
गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते॥ **3.42.25**॥ 1318

विक्रीडंश्च क्वचिद् भूमौ पुनरेव निषीदति।
आश्रमद्वारमागम्य मृगयूथानि गच्छति॥ **3.42.26**॥ 1319

मृगयूथैरनुगतः पुनरेव निवर्तते।
सीतादर्शनमाकाङ्क्षन् राक्षसो मृगतां गतः॥ **3.42.27**॥ 1320

परिभ्रमति चित्राणि मण्डलानि विनिष्पतन्।
समुद्वीक्ष्य च सर्वे तं मृगा येऽन्ये वनेचराः॥ **3.42.28**॥ 1321

उपगम्य समाघ्राय विद्रवन्ति दिशो दश।
राक्षसः सोऽपि तान् वन्यान् मृगान् मृगवधे रतः॥ **3.42.29**॥ 1322

प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन्।
तस्मिन्नेव ततः काले वैदेही शुभलोचना॥ **3.42.30**॥ 1323

कुसुमापचये व्यग्रा पादपानत्यवर्तत।
कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा॥ **3.42.31**॥ 1324

कुसुमान्यपचिन्वन्ती चचार रुचिरानना।
अनर्हा वनवासस्य सा तं रत्नमयं मृगम्॥ **3.42.32**॥ 1325

मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना।
तं वै रुचिरदन्तोष्ठं रूप्यधातुतनूरुहम्॥ **3.42.33**॥ 1326

विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत।
स च तां रामदयितां पश्यन् मायामयो मृगः॥ **3.42.34**॥ 1327

विचचार ततस्तत्र दीपयन्निव तद् वनम्।
अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगम्।
विस्मयं परमं सीता जगाम जनकात्मजा॥ **3.42.35**॥ 1328

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिचत्वारिंशः सर्गः ॥

कपटमृगं दृष्ट्वा लक्ष्मणस्य सन्देहः सीतया जीवन्तं मृतं वा मृगमानेतुं श्रीरामस्य प्रेरणं श्रीरामेण लक्ष्मणं सम्बोध्य तदुपरि सीतारक्षाभारं निक्षिप्य तं मृगं हन्तुं गमनम्

सा तं सम्प्रेक्ष्य सुश्रोणी कुसुमानि विचिन्वती।
हेमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम्॥ **3.43.1**॥ 1329

प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी।
भर्तारमपि चक्रन्द लक्ष्मणं चैव सायुधम्॥ **3.43.2**॥ 1330

आहूयाहूय च पुनस्तं मृगं साधु वीक्षते।
आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुज॥ **3.43.3**॥ 1331

तावाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ।
वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम्॥ **3.43.4**॥ 1332

शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो वाक्यमब्रवीत्।
तमेवैनमहं मन्ये मारीचं राक्षसं मृगम्॥ **3.43.5**॥ 1333

चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने।
अनेन निहता राम राजानः कामरूपिणा॥ **3.43.6**॥ 1334

अस्य मायाविदो माया मृगरूपमिदं कृतम्।
भानुमत् पुरुषव्याघ्र गन्धर्वपुरसन्निभम्॥ **3.43.7**॥ 1335

मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव।
जगत्यां जगतीनाथ मायैषा हि न संशयः॥ **3.43.8**॥ 1336

एवं ब्रुवाणं काकुत्स्थं प्रतिवार्य शुचिस्मिता।
उवाच सीता संहृष्टा छद्मना हतचेतना॥ **3.43.9**॥ 1337

आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः।
आनयैनं महाबाहो क्रीडार्थं नो भविष्यति॥ **3.43.10**॥ 1338

इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः।
मृगाश्चरन्ति सहिताश्चमराः सृमरास्तथा॥ **3.43.11**॥ 1339

ऋक्षाः पृषतसङ्घाश्च वानराः किन्नरास्तथा।
विहरन्ति महाबाहो रूपश्रेष्ठा महाबलाः॥ **3.43.12**॥ 1340

न चान्यः सदृशो राजन् दृष्टः पूर्वं मृगो मया।
तेजसा क्षमया दीप्त्या यथायं मृगसत्तमः॥ **3.43.13**॥ 1341

नानावर्णविचित्राङ्गो रत्नभूतो ममाग्रतः।
द्योतयन् वनमव्यग्रं शोभते शशिसन्निभः॥ **3.43.14**॥ 1342

अहो रूपमहो लक्ष्मीः स्वरसम्पच्च शोभना।
मृगोऽद्भुतो विचित्राङ्गो हृदयं हरतीव मे॥ **3.43.15**॥ 1343

यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव।
आश्चर्यभूतं भवति विस्मयं जनयिष्यति॥ **3.43.16**॥ 1344

समाप्तवनवासानां राज्यस्थानां च नः पुनः।
अन्तःपुरे विभूषार्थो मृग एष भविष्यति॥ **3.43.17**॥ 1345

भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो।
मृगरूपमिदं दिव्यं विस्मयं जनयिष्यति॥ **3.43.18**॥ 1346

जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः।
अजिनं नरशार्दूल रुचिरं तु भविष्यति॥ **3.43.19**॥ 1347

निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि।
शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम्॥ **3.43.20**॥ 1348

कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम्।
वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम॥ **3.43.21**॥ 1349

तेन काञ्चनरोम्णा तु मणिप्रवरशृङ्गिणा।
तरुणादित्यवर्णेन नक्षत्रपथवर्चसा॥ **3.43.22**॥ 1350

बभूव राघवस्यापि मनो विस्मयमागतम्।
इति सीतावचः श्रुत्वा दृष्ट्वा च मृगमद्भुतम्॥ **3.43.23**॥ 1351

लोभितस्तेन रूपेण सीतया च प्रचोदितः।
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः॥ **3.43.24**॥ 1352

पश्य लक्ष्मण वैदेह्याः स्पृहामुल्लसितामिमाम्।
रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति॥ **3.43.25**॥ 1353

न वने नन्दनोद्देशे न चैत्ररथसंश्रये।
कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित् समो मृगः॥ **3.43.26**॥ 1354

प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः।
शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः॥ **3.43.27**॥ 1355

पश्यास्य जृम्भमाणस्य दीप्तामग्निशिखोपमाम्।
जिह्वां मुखान्निःसरन्तीं मेघादिव शतह्रदाम्॥ **3.43.28**॥ 1356

मसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः।
कस्य नामानिरूप्योऽसौ न मनो लोभयेन्मृगः॥ **3.43.29**॥ 1357

कस्य रूपमिदं दृष्ट्वा जाम्बूनदमयप्रभम्।
नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत्॥ **3.43.30**॥ 1358

मांसहेतोरपि मृगान् विहारार्थं च धन्विनः।
घ्नन्ति लक्ष्मण राजानो मृगयायां महावने॥ **3.43.31**॥ 1359

धनानि व्यवसायेन विचीयन्ते महावने।
धातवो विविधाश्चापि मणिरत्नसुवर्णिनः॥ **3.43.32**॥ 1360

तत् सारमखिलं नृणां धनं निचयवर्धनम्।
मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण॥ **3.43.33**॥ 1361

अर्थी येनार्थकृत्येन संव्रजत्यविचारयन्।
तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याः सुलक्ष्मण॥ **3.43.34**॥ 1362

एतस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि।
उपवेक्ष्यति वैदेही मया सह सुमध्यमा॥ **3.43.35**॥ 1363

न कादली न प्रियकी न प्रवेणी न चाविकी।
भवेदेतस्य सदृशी स्पर्शोऽनेनेति मे मतिः॥ **3.43.36**॥ 1364

एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः।
उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ॥ **3.43.37**॥ 1365

यदि वायं तथा यन्मां भवेद् वदसि लक्ष्मण।
मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया॥ **3.43.38**॥ 1366

एतेन हि नृशंसेन मारीचेनाकृतात्मना।
वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः॥ **3.43.39**॥ 1367

उत्थाय बहवोऽनेन मृगयायां जनाधिपाः।
निहताः परमेष्वासास्तस्माद् वध्यस्त्वयं मृगः॥ **3.43.40**॥ 1368

पुरस्तादिह वातापिः परिभूय तपस्विनः।
उदरस्थो द्विजान् हन्ति स्वगर्भोऽश्वतरीमिव॥ **3.43.41**॥ 1369

स कदाचिच्चिराल्लोभादाससाद महामुनिम्।
अगस्त्यं तेजसा युक्तं भक्ष्यस्तस्य बभूव ह॥ **3.43.42**॥ 1370

समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तम्।
उत्स्मयित्वा तु भगवान् वातापिमिदमब्रवीत्॥ **3.43.43**॥ 1371

त्वयाविगण्य वातापे परिभूताश्च तेजसा।
जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः॥ **3.43.44**॥ 1372

तद् रक्षो न भवेदेव वातापिरिव लक्ष्मण।
मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम्॥ **3.43.45**॥ 1373

भवेद्धतोऽयं वातापिरगस्त्येनेव मा गतः।
इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीम्॥ **3.43.46**॥ 1374

अस्यामायत्तमस्माकं यत् कृत्यं रघुनन्दन।
अहमेनं वधिष्यामि ग्रहीष्याम्यथवा मृगम्॥ **3.43.47**॥ 1375

यावद् गच्छामि सौमित्रे मृगमानयितुं द्रुतम्।
पश्य लक्ष्मण वैदेह्या मृगत्वचि गतां स्पृहाम्॥ **3.43.48**॥ 1376

त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति।
अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया॥ **3.43.49**॥ 1377

यावत् पृषतमेकेन सायकेन निहन्म्यहम्।
हत्वैतच्चर्म चादाय शीघ्रमेष्यामि लक्ष्मण॥ **3.43.50**॥ 1378

प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण।

भवाप्रमत्तः प्रतिगृह्य मैथिलीं
प्रतिक्षणं सर्वत एव शङ्कितः ॥ 3.43.51 ॥ 1379

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुश्चत्वारिंशः सर्गः ॥

श्रीरामेण मारीचस्य वधस्तत्कर्तृकं सीतालक्ष्मणाह्वानशब्दं श्रुत्वा श्रीरामस्य चिन्ता

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः।
बबन्धासिं महातेजा जाम्बूनदमयत्सरुम्॥ **3.44.1** ॥ 1380

ततस्त्रिविनतं चापमादायात्मविभूषणम्।
आबध्य च कपालौ द्वौ जगामोदग्रविक्रमः॥ **3.44.2** ॥ 1381

तं वन्यराजो राजेन्द्रमापतन्तं निरीक्ष्य वै।
बभूवान्तर्हितस्त्रासात् पुनः सन्दर्शनेऽभवत्॥ **3.44.3** ॥ 1382

बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः।
तं स्म पश्यति रूपेण द्योतयन्तमिवाग्रतः॥ **3.44.4** ॥ 1383

अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने।
अतिवृत्तमिवोत्पाताल्लोभयानं कदाचन॥ **3.44.5** ॥ 1384

शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरम्।
दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित्॥ **3.44.6** ॥ 1385

छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम्।
मुहूर्तादेव ददृशे मुहुर्दूरात् प्रकाशते॥ **3.44.7** ॥ 1386

दर्शनादर्शनेनैव सोऽपाकर्षत राघवम्।
स दूरमाश्रमस्यास्य मारीचो मृगतां गतः॥ **3.44.8**॥ 1387

आसीत् क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः।
अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले॥ **3.44.9**॥ 1388

स तमुन्मादयामास मृगरूपो निशाचरः।
मृगैः परिवृतोऽथान्यैरदूरात् प्रत्यदृश्यत॥ **3.44.10**॥ 1389

ग्रहीतुकामं दृष्ट्वा तं पुनरेवाभ्यधावत।
तत्क्षणादेव सन्त्रासात् पुनरन्तर्हितोऽभवत्॥ **3.44.11**॥ 1390

पुनरेव ततो दूराद् वृक्षखण्डाद् विनिःसृतः।
दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः॥ **3.44.12**॥ 1391

भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः।
सूर्यरश्मिप्रतीकाशं ज्वलन्तमरिमर्दनम्॥ **3.44.13**॥ 1392

सन्धाय सुदृढे चापे विकृष्य बलवद्बली।
तमेव मृगमुद्दिश्य श्वसन्तमिव पन्नगम्॥ **3.44.14**॥ 1393

मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितम्।
शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः॥ **3.44.15**॥ 1394

मारीचस्यैव हृदयं बिभेदाशनिसन्निभः।
तालमात्रमथोत्प्लुत्य न्यपतत् स भृशातुरः॥ **3.44.16**॥ 1395

व्यनदद् भैरवं नादं धरण्यामल्पजीवितः।
म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम्॥ **3.44.17**॥ 1396

स्मृत्वा तद्वचनं रक्षो दध्यौ केन तु लक्ष्मणम्।
इह प्रस्थापयेत् सीता तां शून्ये रावणो हरेत्॥ **3.44.18**॥ 1397

स प्राप्तकालमाज्ञाय चकार च ततः स्वनम्।
सदृशं राघवस्येव हा सीते लक्ष्मणेति च॥ **3.44.19**॥ 1398

तेन मर्मणि निर्विद्धं शरेणानुपमेन हि।
मृगरूपं तु तत् त्यक्त्वा राक्षसं रूपमास्थितः॥ **3.44.20**॥ 1399

चक्रे स सुमहाकायं मारीचो जीवितं त्यजन्।
तं दृष्ट्वा पतितं भूमौ राक्षसं भीमदर्शनम्॥ **3.44.21**॥ 1400

रामो रुधिरसिक्ताङ्गं चेष्टमानं महीतले।
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन्॥ **3.44.22**॥ 1401

मारीचस्य तु मायैषा पूर्वोक्तं लक्ष्मणेन तु।
तत् तथा ह्यभवच्चाद्य मारीचोऽयं मया हतः॥ **3.44.23**॥ 1402

हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वनम्।
ममार राक्षसः सोऽयं श्रुत्वा सीता कथं भवेत्॥ **3.44.24**॥ 1403

लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति।
इति सञ्चिन्त्य धर्मात्मा रामो हृष्टतनूरुहः॥ **3.44.25**॥ 1404

तत्र रामं भयं तीव्रमाविवेश विषादजम्।
राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वनम्॥ **3.44.26**॥ 1405

निहत्य पृषतं चान्यं मांसमादाय राघवः।
त्वरमाणो जनस्थानं ससाराभिमुखं तदा॥ **3.44.27**॥ 1406

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुश्चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चचत्वारिंशः सर्गः ॥

सीताया मार्मिकवचसा प्रेरितस्य लक्ष्मणस्य श्रीरामपार्श्वे गमनम्

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने।
उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम्॥ **3.45.1**॥ 1407

नहि मे जीवितं स्थाने हृदयं वावतिष्ठते।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम्॥ **3.45.2**॥ 1408

आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि।
तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम्॥ **3.45.3**॥ 1409

रक्षसां वशमापन्नं सिंहानामिव गोवृषम्।
न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम्॥ **3.45.4**॥ 1410

तमुवाच ततस्तत्र क्षुभिता जनकात्मजा।
सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत्॥ **3.45.5**॥ 1411

यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे।
इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते॥ **3.45.6**॥ 1412

लोभात्तु मत्कृते नूनं नानुगच्छसि राघवम्।
व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते॥ **3.45.7**॥ 1413

तेन तिष्ठसि विस्रब्धं तमपश्यन् महाद्युतिम्।
किं हि संशयमापन्ने तस्मिन्निह मया भवेत्॥ **3.45.8**॥ 1414

कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः।
एवं ब्रुवाणां वैदेहीं बाष्पशोकसमन्विताम्॥ **3.45.9**॥ 1415

अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव।
पन्नगासुरगन्धर्वदेवदानवराक्षसैः॥ **3.45.10**॥ 1416

अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः।
देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु॥ **3.45.11**॥ 1417

राक्षसेषु पिशाचेषु किन्नरेषु मृगेषु च।
दानवेषु च घोरेषु न स विद्येत शोभने॥ **3.45.12**॥ 1418

यो रामं प्रतियुध्येत समरे वासवोपमम्।
अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि॥ **3.45.13**॥ 1419

न त्वामस्मिन् वने हातुमुत्सहे राघवं विना।
अनिवार्यं बलं तस्य बलैर्बलवतामपि॥ **3.45.14**॥ 1420

त्रिभिर्लोकैः समुदितैः सेश्वरैः सामरैरपि।
हृदयं निर्वृतं तेऽस्तु सन्तापस्त्यज्यतां तव॥ **3.45.15**॥ 1421

आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम्।
न स तस्य स्वरो व्यक्तं न कश्चिदपि दैवतः॥ **3.45.16**॥ 1422

गन्धर्वनगरप्रख्या माया तस्य च रक्षसः।
न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना॥ **3.45.17**॥ 1423

रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे।
कृतवैराश्च कल्याणि वयमेतैर्निशाचरैः॥ **3.45.18**॥ 1424

खरस्य निधने देवि जनस्थानवधं प्रति।
राक्षसा विविधा वाचो व्याहरन्ति महावने॥ **3.45.19**॥ 1425

हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि।
लक्ष्मणेनैवमुक्ता तु क्रुद्धा संरक्तलोचना॥ **3.45.20**॥ 1426

अब्रवीत् परुषं वाक्यं लक्ष्मणं सत्यवादिनम्।
अनार्याकरुणारम्भ नृशंस कुलपांसन॥ **3.45.21**॥ 1427

अहं तव प्रियं मन्ये रामस्य व्यसनं महत्।
रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे॥ **3.45.22**॥ 1428

नैव चित्रं सपत्नेषु पापं लक्ष्मण यद् भवेत्।
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु॥ **3.45.23**॥ 1429

सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि।
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा॥ **3.45.24**॥ 1430

तन्न सिध्यति सौमित्रे तवापि भरतस्य वा।
कथमिन्दीवरश्यामं रामं पद्मनिभेक्षणम्॥ **3.45.25**॥ 1431

उपसंश्रित्य भर्तारं कामयेयं पृथग्जनम्।
समक्षं तव सौमित्रे प्राणांस्त्यक्ष्याम्यसंशयम्॥ **3.45.26**॥ 1432

रामं विना क्षणमपि नैव जीवामि भूतले।
इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम्॥ **3.45.27**॥ 1433

अब्रवील्लक्ष्मणः सीतां प्राञ्जलिः स जितेन्द्रियः।
उत्तरं नोत्सहे वक्तुं दैवतं भवती मम॥ **3.45.28**॥ 1434

वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि।
स्वभावस्त्वेष नारीणामेषु लोकेषु दृश्यते॥ **3.45.29**॥ 1435

विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः।
न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे॥ **3.45.30**॥ 1436

श्रोत्रयोरुभयोर्मध्ये तप्तनाराचसन्निभम्।
उपशृण्वन्तु मे सर्वे साक्षिणो हि वनेचराः॥ **3.45.31**॥ 1437

न्यायवादी यथा वाक्यमुक्तोऽहं परुषं त्वया।
धिक् त्वामद्य विनश्यन्तीं यन्मामेवं विशङ्कसे॥ **3.45.32**॥ 1438

स्त्रीत्वाद् दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम्।
गच्छामि यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने॥ **3.45.33**॥ 1439

रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः।
निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे।
अपि त्वां सह रामेण पश्येयं पुनरागतः॥ **3.45.34**॥ 1440

लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा।
प्रत्युवाच ततो वाक्यं तीव्रबाष्पपरिप्लुता॥ **3.45.35**॥ 1441

गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण।
आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः॥ **3.45.36**॥ 1442

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम्।
न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे॥ **3.45.37**॥ 1443

इति लक्ष्मणमाश्रुत्य सीता शोकसमन्विता।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह॥ **3.45.38**॥ 1444

तामार्तरूपां विमना रुदन्तीं
सौमित्रिरालोक्य विशालनेत्राम्।

आश्वासयामास न चैव भर्तु -
स्तं भ्रातरं किञ्चिदुवाच सीता ॥ **3.45.39** ॥ 1445

ततस्तु सीतामभिवाद्य लक्ष्मणः
कृताञ्जलिः किञ्चिदभिप्रणम्य च।
अवेक्षमाणो बहुशः स मैथिलीं
जगाम रामस्य समीपमात्मवान् ॥ **3.45.40** ॥ 1446

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्चत्वारिंशः सर्गः ॥

परिव्राजकरूपेण रावणस्य सीतायाः पार्श्वे गमनं तस्याः परिचयं ज्ञातुं तां प्रति प्रश्नः सीतया आतिथ्याय तस्य निमन्त्रणं च

तया परुषमुक्तस्तु कुपितो राघवानुजः।
स विकाङ्क्षन् भृशं रामं प्रतस्थे नचिरादिव ॥ **3.46.1** ॥ 1447

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः।
अभिचक्राम वैदेहीं परिव्राजकरूपधृक् ॥ **3.46.2** ॥ 1448

श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही।
वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ॥ **3.46.3** ॥ 1449

परिव्राजकरूपेण वैदेहीमन्ववर्तत।
तामाससादातिबलो भ्रातृभ्यां रहितां वने ॥ **3.46.4** ॥ 1450

रहितां सूर्यचन्द्राभ्यां सन्ध्यामिव महत्तमः।
तामपश्यत् ततो बालां राजपुत्रीं यशस्विनीम् ॥ **3.46.5** ॥ 1451

रोहिणीं शशिना हीनां ग्रहवद् भृशदारुणः।
तमुग्रं पापकर्माणं जनस्थानगता द्रुमाः ॥ **3.46.6** ॥ 1452

सन्दृश्य न प्रकम्पन्ते न प्रवाति च मारुतः।
शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ॥ **3.46.7** ॥ 1453

स्तिमितं गन्तुमारेभे भयाद् गोदावरी नदी।
रामस्य त्वन्तरं प्रेप्सुर्दशग्रीवस्तदन्तरे॥ **3.46.8**॥ 1454

उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः।
अभव्यो भव्यरूपेण भर्तारमनुशोचतीम्॥ **3.46.9**॥ 1455

अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः।
सहसा भव्यरूपेण तृणैः कूप इवावृतः॥ **3.46.10**॥ 1456

अतिष्ठत् प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम्।
तिष्ठन् सम्प्रेक्ष्य च तदा पत्नीं रामस्य रावणः॥ **3.46.11**॥ 1457

शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम्।
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम्॥ **3.46.12**॥ 1458

स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम्।
अभ्यगच्छत वैदेहीं हृष्टचेता निशाचरः॥ **3.46.13**॥ 1459

दृष्ट्वा कामशराविद्धो ब्रह्मघोषमुदीरयन्।
अब्रवीत् प्रश्रितं वाक्यं रहिते राक्षसाधिपः॥ **3.46.14**॥ 1460

तामुत्तमां त्रिलोकानां पद्महीनामिव श्रियम्।
विभ्राजमानां वपुषा रावणः प्रशशंस ह॥ **3.46.15**॥ 1461

रौप्यकाञ्चनवर्णाभे पीतकौशेयवासिनि।
कमलानां शुभां मालां पद्मिनीव च बिभ्रती॥ **3.46.16**॥ 1462

ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने।
भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी॥ **3.46.17**॥ 1463

समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव।
विशाले विमले नेत्रे रक्तान्ते कृष्णतारके॥ **3.46.18**॥ 1464

विशालं जघनं पीनमूरू करिकरोपमौ।
एतावुपचितौ वृत्तौ संहतौ सम्प्रगल्भितौ॥ **3.46.19**॥ 1465

पीनोन्नतमुखौ कान्तौ स्निग्धतालफलोपमौ।
मणिप्रवेकाभरणौ रुचिरौ ते पयोधरौ॥ **3.46.20**॥ 1466

चारुस्मिते चारुदति चारुनेत्रे विलासिनि।
मनो हरसि मे रामे नदीकूलमिवाम्भसा॥ **3.46.21**॥ 1467

करान्तमितमध्यासि सुकेशे संहतस्तनि।
नैव देवी न गन्धर्वी न यक्षी न च किन्नरी॥ **3.46.22**॥ 1468

नैवंरूपा मया नारी दृष्टपूर्वा महीतले।
रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते॥ **3.46.23**॥ 1469

इह वासश्च कान्तारे चित्तमुन्माथयन्ति मे।
सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि॥ **3.46.24**॥ 1470

राक्षसानामयं वासो घोराणां कामरूपिणाम्।
प्रासादाग्राणि रम्याणि नगरोपवनानि च॥ **3.46.25**॥ 1471

सम्पन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया।
वरं माल्यं वरं गन्धं वरं वस्त्रं च शोभने॥ **3.46.26**॥ 1472

भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे।
का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते॥ **3.46.27**॥ 1473

वसूनां वा वरारोहे देवता प्रतिभासि मे।
नेह गच्छन्ति गन्धर्वा न देवा न च किन्नराः॥ **3.46.28**॥ 1474

राक्षसानामयं वासः कथं तु त्वमिहागता।
इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगा वृकाः॥ **3.46.29**॥ 1475

ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसे।
मदान्वितानां घोराणां कुञ्जराणां तरस्विनाम्॥ **3.46.30**॥ 1476

कथमेका महारण्ये न बिभेषि वरानने।
कासि कस्य कुतश्च त्वं किं निमित्तं च दण्डकान्॥ **3.46.31**॥ 1477

एका चरसि कल्याणि घोरान् राक्षससेवितान्।
इति प्रशस्ता वैदेही रावणेन महात्मना॥ **3.46.32**॥ 1478

द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम्।
सर्वैरतिथिसत्कारैः पूजयामास मैथिली॥ **3.46.33**॥ 1479

उपानीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च।
अब्रवीत् सिद्धमित्येव तदा तं सौम्यदर्शनम्॥ **3.46.34**॥ 1480

द्विजातिवेषेण समीक्ष्य मैथिली
समागतं पात्रकुसुम्भधारिणम्।
अशक्यमुद् द्वेष्टुमुपायदर्शना -
न्यमन्त्रयद् ब्राह्मणवत् तथागतम्॥ **3.46.35**॥ 1481

इयं बृसी ब्राह्मण काममास्यता -
मिदं च पाद्यं प्रतिगृह्यतामिति।
इदं च सिद्धं वनजातमुत्तमं
त्वदर्थमव्यग्रमिहोपभुज्यताम्॥ **3.46.36**॥ 1482

निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं
नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम्।
प्रसह्य तस्या हरणे दृढं मनः
समर्पयामास वधाय रावणः॥ **3.46.37**॥ 1483

ततः सुवेषं मृगयागतं पतिं
प्रतीक्षमाणा सहलक्ष्मणं तदा।
निरीक्षमाणा हरितं ददर्श तन् -
महद् वनं नैव तु रामलक्ष्मणौ॥ **3.46.38**॥ 1484

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षट्चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तचत्वारिंशः सर्गः ॥

सीतया रावणाय पत्युरात्मनश्च परिचयं दत्त्वा वनागमने कारणस्य प्रतिपादनं रावणेन तां स्वपट्टमहिषीपदे प्रतिष्ठापयितुं स्वविचारस्य प्रकटनं सीतया तस्य भर्त्सनं च

रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा।
परिव्राजकरूपेण शशंसात्मानमात्मना ॥ **3.47.1** ॥ 1485

ब्राह्मणश्चातिथिश्चैष अनुक्तो हि शपेत माम्।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ **3.47.2** ॥ 1486

दुहिता जनकस्याहं मैथिलस्य महात्मनः।
सीता नाम्नास्मि भद्रं ते रामस्य महिषी प्रिया ॥ **3.47.3** ॥ 1487

उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने।
भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥ **3.47.4** ॥ 1488

तत्र त्रयोदशे वर्षे राजामन्त्रयत प्रभुः।
अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ॥ **3.47.5** ॥ 1489

तस्मिन् सम्भ्रियमाणे तु राघवस्याभिषेचने।
कैकेयी नाम भर्तारं ममार्या याचते वरम् ॥ **3.47.6** ॥ 1490

परिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे।
मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥ **3.47.7** ॥ 1491

द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम्।
नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये न कदाचन॥ **3.47.8**॥ 1492

एष मे जीवितस्यान्तो रामो यदभिषिच्यते।
इति ब्रुवाणां कैकेयीं श्वशुरो मे स पार्थिवः॥ **3.47.9**॥ 1493

अयाचतार्थैरन्वर्थैर्न च याञ्ञां चकार सा।
मम भर्ता महातेजा वयसा पञ्चविंशकः॥ **3.47.10**॥ 1494

अष्टादश हि वर्षाणि मम जन्मनि गण्यते।
रामेति प्रथितो लोके सत्यवाञ्शीलवाञ्शुचिः॥ **3.47.11**॥ 1495

विशालाक्षो महाबाहुः सर्वभूतहिते रतः।
कामार्तश्च महाराजः पिता दशरथः स्वयम्॥ **3.47.12**॥ 1496

कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत्।
अभिषेकाय तु पितुः समीपं राममागतम्॥ **3.47.13**॥ 1497

कैकेयी मम भर्तारमित्युवाच द्रुतं वचः।
तव पित्रा समाज्ञप्तं ममेदं शृणु राघव॥ **3.47.14**॥ 1498

भरताय प्रदातव्यमिदं राज्यमकण्टकम्।
त्वया तु खलु वस्तव्यं नव वर्षाणि पञ्च च॥ **3.47.15**॥ 1499

वने प्रव्रज काकुत्स्थ पितरं मोचयानृतात्।
तथेत्युवाच तां रामः कैकेयीमकुतोभयः॥ **3.47.16**॥ 1500

चकार तद्वचः श्रुत्वा भर्ता मम दृढव्रतः।
दद्यान्न प्रतिगृह्णीयात् सत्यं ब्रूयान्न चानृतम्॥ **3.47.17**॥ 1501

एतद् ब्राह्मण रामस्य व्रतं धृतमनुत्तमम्।
तस्य भ्राता तु वैमात्रो लक्ष्मणो नाम वीर्यवान्॥ **3.47.18**॥ 1502

रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा।
स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः॥ **3.47.19**॥ 1503

अन्वगच्छद् धनुष्पाणिः प्रव्रजन्तं मया सह।
जटी तापसरूपेण मया सह सहानुजः॥ **3.47.20**॥ 1504

प्रविष्टो दण्डकारण्यं धर्मनित्यो दृढव्रतः।
ते वयं प्रच्युता राज्यात् कैकेय्यास्तु कृते त्रयः॥ **3.47.21**॥ 1505

विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा।
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया॥ **3.47.22**॥ 1506

आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम्।
रुरून् गोधान् वराहांश्च हत्वाऽऽदायामिषं बहु॥ **3.47.23**॥ 1507

स त्वं नाम च गोत्रं च कुलमाचक्ष्व तत्त्वतः।
एकश्च दण्डकारण्ये किमर्थं चरसि द्विज॥ **3.47.24**॥ 1508

एवं ब्रुवत्यां सीतायां रामपत्न्यां महाबलः।
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः॥ **3.47.25**॥ 1509

येन वित्रासिता लोकाः सदेवासुरमानुषाः।
अहं स रावणो नाम सीते रक्षोगणेश्वरः॥ **3.47.26**॥ 1510

त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम्।
रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते॥ **3.47.27**॥ 1511

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः।
सर्वासामेव भद्रं ते ममाग्रमहिषी भव॥ **3.47.28**॥ 1512

लङ्का नाम समुद्रस्य मध्ये मम महापुरी।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्धनि॥ **3.47.29**॥ 1513

तत्र सीते मया सार्धं वनेषु विचरिष्यसि।
न चास्य वनवासस्य स्पृहयिष्यसि भामिनि॥ **3.47.30**॥ 1514

पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः।
सीते परिचरिष्यन्ति भार्या भवसि मे यदि॥ **3.47.31**॥ 1515

रावणेनैवमुक्ता तु कुपिता जनकात्मजा।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम्॥ **3.47.32**॥ 1516

महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम्।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता॥ **3.47.33**॥ 1517

सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम्।
सत्यसन्धं महाभागमहं राममनुव्रता॥ **3.47.34**॥ 1518

महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम्।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता॥ **3.47.35**॥ 1519

पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम्।
पृथुकीर्तिं महाबाहुमहं राममनुव्रता॥ **3.47.36**॥ 1520

त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम्।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा॥ **3.47.37**॥ 1521

पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक्।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस॥ **3.47.38**॥ 1522

क्षुधितस्य च सिंहस्य मृगशत्रोस्तरस्विनः।
आशीविषस्य वदनाद् दंष्ट्रामादातुमिच्छसि॥ **3.47.39**॥ 1523

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि।
कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि॥ **3.47.40**॥ 1524

अक्षि सूच्या प्रमृजसि जिह्वया लेढि च क्षुरम्।
राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि॥ **3.47.41**॥ 1525

अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि॥ **3.47.42**॥ 1526

यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि।
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि॥ **3.47.43**॥ 1527

कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि।
अयोमुखानां शूलानामग्रे चरितुमिच्छसि।
रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि॥ **3.47.44**॥ 1528

यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दनिकासमुद्रयोः।
सुराग्र्यसौवीरकयोर्यदन्तरं
तदन्तरं दाशरथेस्तवैव च॥ **3.47.45**॥ 1529

यदन्तरं काञ्चनसीसलोहयो -
र्यदन्तरं चन्दनवारिपङ्कयोः।
यदन्तरं हस्तिबिडालयोर्वने
तदन्तरं दाशरथेस्तवैव च॥ **3.47.46**॥ 1530

यदन्तरं वायसवैनतेययो -
र्यदन्तरं मद्गुमयूरयोरपि।
यदन्तरं हंसकगृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च॥ **3.47.47**॥ 1531

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ।

हृतापि तेऽहं न जरां गमिष्ये
आज्यं यथा मक्षिकयावगीर्णम्॥ **3.47.48**॥ 1532

इतीव तद्वाक्यमदुष्टभावा
सुदुष्टमुक्त्वा रजनीचरं तम्।
गात्रप्रकम्पाद् व्यथिता बभूव
वातोद्धता सा कदलीव तन्वी॥ **3.47.49**॥ 1533

तां वेपमानामुपलक्ष्य सीतां
स रावणो मृत्युसमप्रभावः।
कुलं बलं नाम च कर्म च स्वं
समाचचक्षे भयकारणार्थम्॥ **3.47.50**॥ 1534

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टचत्वारिंशः सर्गः ॥

रावणेन स्वपराक्रमस्य वर्णनं सीतया तस्य भर्त्सनं च

एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः।
ललाटे भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह ॥ **3.48.1** ॥ 1535

भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि।
रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ **3.48.2** ॥ 1536

यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः।
विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥ **3.48.3** ॥ 1537

येन वैश्रवणो भ्राता वैमात्रः कारणान्तरे।
द्वन्द्वमासादितः क्रोधाद् रणे विक्रम्य निर्जितः ॥ **3.48.4** ॥ 1538

मद्भयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ **3.48.5** ॥ 1539

यस्य तत् पुष्पकं नाम विमानं कामगं शुभम्।
वीर्यादावर्जितं भद्रे येन यामि विहायसम् ॥ **3.48.6** ॥ 1540

मम सञ्जातरोषस्य मुखं दृष्ट्वैव मैथिलि।
विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥ **3.48.7** ॥ 1541

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः।
तीव्रांशुः शिशिरांशुश्च भयात् सम्पद्यते दिवि॥ **3.48.8**॥ 1542

निष्कम्पपत्रास्तरवो नद्यश्च स्तिमितोदकाः।
भवन्ति यत्र तत्राहं तिष्ठामि च चरामि च॥ **3.48.9**॥ 1543

मम पारे समुद्रस्य लङ्का नाम पुरी शुभा।
सम्पूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती॥ **3.48.10**॥ 1544

प्राकारेण परिक्षिप्ता पाण्डुरेण विराजिता।
हेमकक्ष्या पुरी रम्या वैदूर्यमयतोरणा॥ **3.48.11**॥ 1545

हस्त्यश्वरथसम्बाधा तूर्यनादविनादिता।
सर्वकामफलैर्वृक्षैः सङ्कुलोद्यानभूषिता॥ **3.48.12**॥ 1546

तत्र त्वं वस हे सीते राजपुत्रि मया सह।
न स्मरिष्यसि नारीणां मानुषीणां मनस्विनि॥ **3.48.13**॥ 1547

भुञ्जाना मानुषान् भोगान् दिव्यांश्च वरवर्णिनि।
न स्मरिष्यसि रामस्य मानुषस्य गतायुषः॥ **3.48.14**॥ 1548

स्थापयित्वा प्रियं पुत्रं राज्ये दशरथो नृपः।
मन्दवीर्यस्ततो ज्येष्ठः सुतः प्रस्थापितो वनम्॥ **3.48.15**॥ 1549

तेन किं भ्रष्टराज्येन रामेण गतचेतसा।
करिष्यसि विशालाक्षि तापसेन तपस्विना॥ **3.48.16**॥ 1550

रक्ष राक्षसभर्तारं कामय स्वयमागतम्।
न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि॥ **3.48.17**॥ 1551

प्रत्याख्याय हि मां भीरु पश्चात्तापं गमिष्यसि।
चरणेनाभिहत्येव पुरूरवसमुर्वशी॥ **3.48.18**॥ 1552

अङ्गुल्या न समो रामो मम युद्धे स मानुषः।
तव भाग्येन सम्प्राप्तं भजस्व वरवर्णिनि॥ **3.48.19**॥ 1553

एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना।
अब्रवीत् परुषं वाक्यं रहिते राक्षसाधिपम्॥ **3.48.20**॥ 1554

कथं वैश्रवणं देवं सर्वदेवनमस्कृतम्।
भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि॥ **3.48.21**॥ 1555

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः॥ **3.48.22**॥ 1556

अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम्।
नहि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत्॥ **3.48.23**॥ 1557

जीवेच्चिरं वज्रधरस्य पश्चा -
च्छचीं प्रधृष्याप्रतिरूपरूपाम्।
न मादृशीं राक्षस धर्षयित्वा
पीतामृतस्यापि तवास्ति मोक्षः॥ **3.48.24**॥ 1558

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनपञ्चाशः सर्गः ॥

रावणेन सीताया अपहरणं तस्या विलापो जटायुषो दर्शनं च

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान्।
हस्ते हस्तं समाहत्य चकार सुमहद् वपुः॥ **3.49.1** ॥ 1559

स मैथिलीं पुनर्वाक्यं बभाषे वाक्यकोविदः।
नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ॥ **3.49.2** ॥ 1560

उद्बहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः।
आपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः॥ **3.49.3** ॥ 1561

अर्कं तुद्यां शरैस्तीक्ष्णैर्विभिन्द्यां हि महीतलम्।
कामरूपेण उन्मत्ते पश्य मां कामरूपिणम्॥ **3.49.4** ॥ 1562

एवमुक्तवतस्तस्य रावणस्य शिखिप्रभे।
क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः॥ **3.49.5** ॥ 1563

सद्यः सौम्यं परित्यज्य तीक्ष्णरूपं स रावणः।
स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः॥ **3.49.6** ॥ 1564

संरक्तनयनः श्रीमांस्तप्तकाञ्चनभूषणः।
क्रोधेन महताविष्टो नीलजीमूतसन्निभः॥ **3.49.7** ॥ 1565

दशास्यो विंशतिभुजो बभूव क्षणदाचरः।
स परिव्राजकच्छद्म महाकायो विहाय तत्॥ **3.49.8**॥ 1566

प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः।
रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीम्॥ **3.49.9**॥ 1567

स तामसितकेशान्तां भास्करस्य प्रभामिव।
वसनाभरणोपेतां मैथिलीं रावणोऽब्रवीत्॥ **3.49.10**॥ 1568

त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि।
मामाश्रय वरारोहे तवाहं सदृशः पतिः॥ **3.49.11**॥ 1569

मां भजस्व चिराय त्वमहं श्लाघ्यः पतिस्तव।
नैव चाहं क्वचिद् भद्रे करिष्ये तव विप्रियम्॥ **3.49.12**॥ 1570

त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम्।
राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषम्॥ **3.49.13**॥ 1571

कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि।
यः स्त्रियो वचनाद् राज्यं विहाय ससुहृज्जनम्॥ **3.49.14**॥ 1572

अस्मिन् व्यालानुचरिते वने वसति दुर्मतिः।
इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम्॥ **3.49.15**॥ 1573

अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः।
जग्राह रावणः सीतां बुधः खे रोहिणीमिव॥ **3.49.16**॥ 1574

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना॥ **3.49.17**॥ 1575

तं दृष्ट्वा गिरिशृङ्गाभं तीक्ष्णदंष्ट्रं महाभुजम्।
प्राद्रवन् मृत्युसङ्काशं भयार्ता वनदेवताः॥ **3.49.18**॥ 1576

स च मायामयो दिव्यः खरयुक्तः खरस्वनः।
प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः॥ **3.49.19**॥ 1577

ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः।
अङ्केनादाय वैदेहीं रथमारोपयत् तदा॥ **3.49.20**॥ 1578

सा गृहीतातिचुक्रोश रावणेन यशस्विनी।
रामेति सीता दुःखार्ता रामं दूरं गतं वने॥ **3.49.21**॥ 1579

तामकामां स कामार्तः पन्नगेन्द्रवधूमिव।
विचेष्टमानामादाय उत्पपाताथ रावणः॥ **3.49.22**॥ 1580

ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा॥ **3.49.23**॥ 1581

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक।
ह्रियमाणां न जानीषे रक्षसा कामरूपिणा॥ **3.49.24**॥ 1582

जीवितं सुखमर्थं च धर्महेतोः परित्यजन्।
ह्रियमाणामधर्मेण मां राघव न पश्यसि॥ **3.49.25**॥ 1583

ननु नामाविनीतानां विनेतासि परन्तप।
कथमेवंविधं पापं न त्वं शाधि हि रावणम्॥ **3.49.26**॥ 1584

न तु सद्योऽविनीतस्य दृश्यते कर्मणः फलम्।
कालोऽप्यङ्गीभवत्यत्र सस्यानामिव पक्तये॥ **3.49.27**॥ 1585

त्वं कर्म कृतवानेतत् कालोपहतचेतनः।
जीवितान्तकरं घोरं रामाद् व्यसनमाप्नुहि॥ **3.49.28**॥ 1586

हन्तेदानीं सकामा तु कैकेयी बान्धवैः सह।
ह्रियेयं धर्मकामस्य धर्मपत्नी यशस्विनः॥ **3.49.29**॥ 1587

आमन्त्रये जनस्थाने कर्णिकारांश्च पुष्पितान्।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः॥ **3.49.30**॥ 1588

हंससारससङ्घुष्टां वन्दे गोदावरीं नदीम्।
क्षिप्रं रामाय शंस त्वं सीतां हरति रावणः॥ **3.49.31**॥ 1589

दैवतानि च यान्यस्मिन् वने विविधपादपे।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम्॥ **3.49.32**॥ 1590

यानि कानिचिदप्यत्र सत्त्वानि विविधानि च।
सर्वाणि शरणं यामि मृगपक्षिगणानि वै॥ **3.49.33**॥ 1591

ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम्।
विवशा ते हृता सीता रावणेनेति शंसत॥ **3.49.34**॥ 1592

विदित्वा तु महाबाहुरमुत्रापि महाबलः।
आनेष्यति पराक्रम्य वैवस्वतहृतामपि॥ **3.49.35**॥ 1593

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना॥ **3.49.36**॥ 1594

सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशङ्गता।
समाक्रन्दद् भयपरा दुःखोपहतया गिरा॥ **3.49.37**॥ 1595

जटायो पश्य मामार्य ह्रियमाणामनाथवत्।
अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा॥ **3.49.38**॥ 1596

नैष वारयितुं शक्यस्त्वया क्रूरो निशाचरः।
सत्ववाञ्जितकाशी च सायुधश्चैव दुर्मतिः॥ **3.49.39**॥ 1597

रामाय तु यथातत्त्वं जटायो हरणं मम।
लक्ष्मणाय च तत् सर्वमाख्यातव्यमशेषतः॥ **3.49.40**॥ 1598

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशः सर्गः ॥

जटायुषा सीताहरणरूपाद् दुष्कर्मणो रावणं निवर्तयितुं तस्य प्रबोधनं तदन्ते युद्धार्थमाह्वानं च

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च ददर्श सः॥ **3.50.1** ॥ 1599

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम्॥ **3.50.2** ॥ 1600

दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रयः।
भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि साम्प्रतम्॥ **3.50.3** ॥ 1601

जटायुर्नाम नाम्नाहं गृध्रराजो महाबलः।
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः॥ **3.50.4** ॥ 1602

लोकानां च हिते युक्तो रामो दशरथात्मजः।
तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी॥ **3.50.5** ॥ 1603

सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि।
कथं राजा स्थितो धर्मे परदारान् परामृशेत्॥ **3.50.6** ॥ 1604

रक्षणीया विशेषेण राजदारा महाबल।
निवर्तय गतिं नीचां परदाराभिमर्शनात्॥ **3.50.7** ॥ 1605

न तत् समाचरेद् धीरो यत् परोऽस्य विगर्हयेत्।
यथाऽऽत्मनस्तथान्येषां दारा रक्ष्या विमर्शनात्॥ **3.50.8**॥ 1606

अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम्।
व्यवस्यन्त्यनु राजानं धर्मं पौलस्त्यनन्दन॥ **3.50.9**॥ 1607

राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः।
धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते॥ **3.50.10**॥ 1608

पापस्वभावश्चपलः कथं त्वं रक्षसां वर।
ऐश्वर्यमभिसम्प्राप्तो विमानमिव दुष्कृती॥ **3.50.11**॥ 1609

कामस्वभावो यः सोऽसौ न शक्यस्तं प्रमार्जितुम्।
नहि दुष्टात्मनामार्यमावसत्यालये चिरम्॥ **3.50.12**॥ 1610

विषये वा पुरे वा ते यदा रामो महाबलः।
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि॥ **3.50.13**॥ 1611

यदि शूर्पणखाहेतोर्जनस्थानगतः खरः।
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा॥ **3.50.14**॥ 1612

अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः।
यस्य त्वं लोकनाथस्य हृत्वा भार्यां गमिष्यसि॥ **3.50.15**॥ 1613

क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा।
दहेद् दहनभूतेन वृत्रमिन्द्राशनिर्यथा॥ **3.50.16**॥ 1614

सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे।
ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि॥ **3.50.17**॥ 1615

स भारः सौम्य भर्तव्यो यो नरं नावसादयेत्।
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम्॥ **3.50.18**॥ 1616

यत् कृत्वा न भवेद् धर्मो न कीर्तिर्न यशो ध्रुवम्।
शरीरस्य भवेत् खेदः कस्तत् कर्म समाचरेत्॥ **3.50.19**॥ 1617

षष्टिवर्षसहस्राणि जातस्य मम रावण।
पितृपैतामहं राज्यं यथावदनुतिष्ठतः॥ **3.50.20**॥ 1618

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि॥ **3.50.21**॥ 1619

न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः।
हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव॥ **3.50.22**॥ 1620

युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण।
शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा॥ **3.50.23**॥ 1621

असकृत्संयुगे येन निहता दैत्यदानवाः।
न चिराच्चीरवासास्त्वां रामो युधि वधिष्यति॥ **3.50.24**॥ 1622

किं नु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ।
क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः॥ **3.50.25**॥ 1623

नहि मे जीवमानस्य नयिष्यसि शुभामिमाम्।
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम्॥ **3.50.26**॥ 1624

अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः।
जीवितेनापि रामस्य तथा दशरथस्य च॥ **3.50.27**॥ 1625

तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण।
वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात्।
युद्धातिथ्यं प्रदास्यामि यथाप्राणं निशाचर॥ **3.50.28**॥ 1626

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकपञ्चाशः सर्गः ॥

जटायूरावणयोर्घोरं युद्धं रावणेन जटायुषो वधश्च

इत्युक्तः क्रोधताम्राक्षस्तप्तकाञ्चनकुण्डलः।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः॥ **3.51.1** ॥ 1627

स सम्प्रहारस्तुमुलस्तयोस्तस्मिन् महामृधे।
बभूव वातोद्धुतयोर्मेघयोर्गगने यथा॥ **3.51.2** ॥ 1628

तद् बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा।
सपक्षयोर्माल्यवतोर्महापर्वतयोरिव॥ **3.51.3** ॥ 1629

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः।
अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलम्॥ **3.51.4** ॥ 1630

स तानि शरजालानि गृध्रः पत्ररथेश्वरः।
जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे॥ **3.51.5** ॥ 1631

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।
चकार बहुधा गात्रे व्रणान् पतगसत्तमः॥ **3.51.6** ॥ 1632

अथ क्रोधाद् दशग्रीवो जग्राह दश मार्गणान्।
मृत्युदण्डनिभान् घोराञ्शत्रोर्निधनकाङ्क्षया॥ **3.51.7** ॥ 1633

स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः।
बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः॥ **3.51.8**॥ 1634

स राक्षसरथे पश्यञ्जानकी बाष्पलोचनाम्।
अचिन्तयित्वा बाणांस्तान् राक्षसं समभिद्रवत्॥ **3.51.9**॥ 1635

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्ज पतगोत्तमः॥ **3.51.10**॥ 1636

ततोऽन्यद् धनुरादाय रावणः क्रोधमूर्छितः।
ववर्ष शरवर्षाणि शतशोऽथ सहस्रशः॥ **3.51.11**॥ 1637

शरैरावारितस्तस्य संयुगे पतगेश्वरः।
कुलायमभिसम्प्राप्तः पक्षिवच्च बभौ तदा॥ **3.51.12**॥ 1638

स तानि शरजालानि पक्षाभ्यां तु विधूय ह।
चरणाभ्यां महातेजा बभञ्जास्य महद् धनुः॥ **3.51.13**॥ 1639

तच्चाग्निसदृशं दीप्तं रावणस्य शरावरम्।
पक्षाभ्यां च महातेजा व्यधुनोत् पतगेश्वरः॥ **3.51.14**॥ 1640

काञ्चनोरश्छदान् दिव्यान् पिशाचवदनान् खरान्।
तांश्चास्य जवसम्पन्नाञ्जघान समरे बली॥ **3.51.15**॥ 1641

अथ त्रिवेणुसम्पन्नं कामगं पावकार्चिषम्।
मणिसोपानचित्राङ्गं बभञ्ज च महारथम्॥ **3.51.16**॥ 1642

पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह।
पातयामास वेगेन ग्राहिभी राक्षसैः सह॥ **3.51.17**॥ 1643

सारथेश्चास्य वेगेन तुण्डेन च महच्छिरः।
पुनर्व्यपहनच्छ्रीमान् पक्षिराजो महाबलः॥ **3.51.18**॥ 1644

स भग्नधन्वा विरथो हताश्वो हतसारथिः।
अङ्केनादाय वैदेही पपात भुवि रावणः॥ **3.51.19**॥ 1645

दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम्।
साधु साध्विति भूतानि गृध्रराजमपूजयन्॥ **3.51.20**॥ 1646

परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम्।
उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः॥ **3.51.21**॥ 1647

तं प्रहृष्टं निधायाङ्के रावणं जनकात्मजाम्।
गच्छन्तं खड्गशेषं च प्रणष्टहतसाधनम्॥ **3.51.22**॥ 1648

गृध्रराजः समुत्पत्य रावणं समभिद्रवत्।
समावार्य महातेजा जटायुरिदमब्रवीत्॥ **3.51.23**॥ 1649

वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण।
अल्पबुद्धे हरस्येनां वधाय खलु रक्षसाम्॥ **3.51.24**॥ 1650

समित्रबन्धुः सामात्यः सबलः सपरिच्छदः।
विषपानं पिबस्येतत् पिपासित इवोदकम्॥ **3.51.25**॥ 1651

अनुबन्धमजानन्तः कर्मणामविचक्षणाः।
शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि॥ **3.51.26**॥ 1652

बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्ष्यसे।
वधाय बडिशं गृह्य सामिषं जलजो यथा॥ **3.51.27**॥ 1653

नहि जातु दुराधर्षौ काकुत्स्थौ तव रावण।
धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ॥ **3.51.28**॥ 1654

यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम्।
तस्कराचरितो मार्गो नैष वीरनिषेवितः॥ **3.51.29**॥ 1655

युद्ध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण।
शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा॥ **3.51.30**॥ 1656

परेतकाले पुरुषो यत् कर्म प्रतिपद्यते।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोऽसि कर्म तत्॥ **3.51.31**॥ 1657

पापानुबन्धो वै यस्य कर्मणः को नु तत् पुमान्।
कुर्वीत लोकाधिपतिः स्वयम्भूर्भगवानपि॥ **3.51.32**॥ 1658

एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः।
निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान्॥ **3.51.33**॥ 1659

तं गृहीत्वा नखैस्तीक्ष्णैर्विददार समन्ततः।
अधिरूढो गजारोहो यथा स्याद् दुष्टवारणम्॥ **3.51.34**॥ 1660

विददार नखैरस्य तुण्डं पृष्ठे समर्पयन्।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः॥ **3.51.35**॥ 1661

स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः।
अमर्षस्फुरितोष्ठः सन् प्राकम्पत च राक्षसः॥ **3.51.36**॥ 1662

सम्परिष्वज्य वैदेहीं वामेनाङ्केन रावणः।
तलेनाभिजघानार्तो जटायुं क्रोधमूर्च्छितः॥ **3.51.37**॥ 1663

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून् दश तदा व्यपाहरदरिंदमः॥ **3.51.38**॥ 1664

सञ्छिन्नबाहोः सद्यो वै बाहवः सहसाभवन्।
विषज्वालावलीयुक्ता वल्मीकादिव पन्नगाः॥ **3.51.39**॥ 1665

ततः क्रोधाद् दशग्रीवः सीतामुत्सृज्य वीर्यवान्।
मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत्॥ **3.51.40**॥ 1666

ततो मुहूर्तं सङ्ग्रामो बभूवातुलवीर्ययोः।
राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च॥ **3.51.41**॥ 1667

तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः।
पक्षौ पादौ च पार्श्वौ च खड्गमुद्धृत्य सोऽच्छिनत्॥ **3.51.42**॥ 1668

सच्छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा।
निपपात महागृध्रो धरण्यामल्पजीवितः॥ **3.51.43**॥ 1669

तं दृष्ट्वा पतितं भूमौ क्षतजार्द्र जटायुषम्।
अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता॥ **3.51.44**॥ 1670

तं नीलजीमूतनिकाशकल्पं
सपाण्डुरोरस्कमुदारवीर्यम्।
ददर्श लङ्काधिपतिः पृथिव्यां
जटायुषं शान्तमिवाग्निदावम्॥ **3.51.45**॥ 1671

ततस्तु तं पत्ररथं महीतले
निपातितं रावणवेगमर्दितम्।
पुनश्च सङ्गृह्य शशिप्रभानना
रुरोद सीता जनकात्मजा तदा॥ **3.51.46**॥ 1672

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विपञ्चाशः सर्गः ॥

रावणेन सीताया अपहरणम्

सा तु ताराधिपमुखी रावणेन निरीक्ष्य तम्।
गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ **3.52.1** ॥ 1673

निमित्तं लक्षणं स्वप्नं शकुनिस्वरदर्शनम्।
अवश्यं सुखदुःखेषु नराणां परिदृश्यते ॥ **3.52.2** ॥ 1674

न नूनं राम जानासि महद्व्यसनमात्मनः।
धावन्ति नूनं काकुत्स्थ मदर्थं मृगपक्षिणः ॥ **3.52.3** ॥ 1675

अयं हि कृपया राम मां त्रातुमिह सङ्गतः।
शेते विनिहतो भूमौ ममाभाग्याद् विहङ्गमः ॥ **3.52.4** ॥ 1676

त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना।
सुसन्त्रस्ता समाक्रन्दच्छृण्वतां तु यथान्तिके ॥ **3.52.5** ॥ 1677

तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत्।
अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ **3.52.6** ॥ 1678

तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान्।
मुञ्च मुञ्चेति बहुशः प्राप तां राक्षसाधिपः ॥ **3.52.7** ॥ 1679

क्रोशन्तीं राम रामेति रामेण रहितां वने।
जीवितान्ताय केशेषु जग्राहान्तकसन्निभः॥ **3.52.8**॥ 1680

प्रधर्षितायां वैदेह्यां बभूव सचराचरम्।
जगत् सर्वममर्यादं तमसान्धेन संवृतम्॥ **3.52.9**॥ 1681

न वाति मारुतस्तत्र निष्प्रभोऽभूद् दिवाकरः।
दृष्ट्वा सीतां परामृष्टां देवो दिव्येन चक्षुषा॥ **3.52.10**॥ 1682

कृतं कार्यमिति श्रीमान् व्याजहार पितामहः।
प्रहृष्टा व्यथिताश्चासन् सर्वे ते परमर्षयः॥ **3.52.11**॥ 1683

दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः।
रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया॥ **3.52.12**॥ 1684

स तु तां राम रामेति रुदतीं लक्ष्मणेति च।
जगामादाय चाकाशं रावणो राक्षसेश्वरः॥ **3.52.13**॥ 1685

तप्ताभरणवर्णाङ्गी पीतकौशेयवासिनी।
रराज राजपुत्री तु विद्युत्सौदामनी यथा॥ **3.52.14**॥ 1686

उद्धूतेन च वस्त्रेण तस्याः पीतेन रावणः।
अधिकं परिबभ्राज गिरिर्दीप्त इवाग्निना॥ **3.52.15**॥ 1687

तस्याः परमकल्याण्यास्ताम्राणि सुरभीणि च।
पद्मपत्राणि वैदेह्या अभ्यकीर्यन्त रावणम्॥ **3.52.16**॥ 1688

तस्याः कौशेयमुद्धूतमाकाशे कनकप्रभम्।
बभौ चादित्यरागेण ताम्रमभ्रमिवातपे॥ **3.52.17**॥ 1689

तस्यास्तद् विमलं वक्त्रमाकाशे रावणाङ्कगम्।
न रराज विना रामं विनालमिव पङ्कजम्॥ **3.52.18**॥ 1690

बभूव जलदं नीलं भित्त्वा चन्द्र इवोदितः।
सुललाटं सुकेशान्तं पद्मगर्भाभमव्रणम्॥ **3.52.19**॥ 1691

शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलङ्कृतम्।
तस्याः सुनयनं वक्त्रमाकाशे रावणाङ्कगम्॥ **3.52.20**॥ 1692

रुदितं व्यपमृष्टास्रं चन्द्रवत्प्रियदर्शनम्।
सुनासं चारुताम्रोष्ठमाकाशे हाटकप्रभम्॥ **3.52.21**॥ 1693

राक्षसेन्द्रसमाधूतं तस्यास्तद् वदनं शुभम्।
शुशुभे न विना रामं दिवा चन्द्र इवोदितः॥ **3.52.22**॥ 1694

सा हेमवर्णा नीलाङ्गं मैथिली राक्षसाधिपम्।
शुशुभे काञ्चनी काञ्ची नीलं गजमिवाश्रिता॥ **3.52.23**॥ 1695

सा पद्मपीता हेमाभा रावणं जनकात्मजा।
विद्युद् घनमिवाविश्य शुशुभे तप्तभूषणा॥ **3.52.24**॥ 1696

तस्या भूषणघोषेण वैदेह्या राक्षसेश्वरः।
बभूव विमलो नीलः सघोष इव तोयदः॥ **3.52.25**॥ 1697

उत्तमाङ्गच्युता तस्याः पुष्पवृष्टिः समन्ततः।
सीताया ह्रियमाणायाः पपात धरणीतले॥ **3.52.26**॥ 1698

सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः।
समाधूता दशग्रीवं पुनरेवाभ्यवर्तत॥ **3.52.27**॥ 1699

अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम्।
नक्षत्रमाला विमला मेरुं नगमिवोन्नतम्॥ **3.52.28**॥ 1700

चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम्।
विद्युन्मण्डलसङ्काशं पपात धरणीतले॥ **3.52.29**॥ 1701

तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम्।
प्रशोभयत वैदेही गजं कक्ष्येव काञ्चनी॥ **3.52.30**॥ 1702

तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा।
जहाराकाशमाविश्य सीतां वैश्रवणानुजः॥ **3.52.31**॥ 1703

तस्यास्तान्यग्निवर्णानि भूषणानि महीतले।
सघोषाण्यवशीर्यन्त क्षीणास्तारा इवाम्बरात्॥ **3.52.32**॥ 1704

तस्याः स्तनान्तराद् भ्रष्टो हारस्ताराधिपद्युतिः।
वैदेह्या निपतन् भाति गङ्गेव गगनच्युता॥ **3.52.33**॥ 1705

उत्पातवाताभिरता नानाद्विजगणायुताः।
मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः॥ **3.52.34**॥ 1706

नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः।
सखीमिव गतोत्साहां शोचन्तीव स्म मैथिलीम्॥ **3.52.35**॥ 1707

समन्तादभिसम्पत्य सिंहव्याघ्रमृगद्विजाः।
अन्वधावंस्तदा रोषात् सीताच्छायानुगामिनः॥ **3.52.36**॥ 1708

जलप्रपातास्रमुखाः शृङ्गैरुच्छ्रितबाहुभिः।
सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः॥ **3.52.37**॥ 1709

ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः।
प्रविध्वस्तप्रभः श्रीमानासीत् पाण्डुरमण्डलः॥ **3.52.38**॥ 1710

नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता।
यत्र रामस्य वैदेहीं सीतां हरति रावणः॥ **3.52.39**॥ 1711

इति भूतानि सर्वाणि गणशः पर्यदेवयन्।
वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः॥ **3.52.40**॥ 1712

उद्वीक्ष्योद्वीक्ष्य नयनैर्भयादिव विलक्षणैः।
सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः॥ **3.52.41**॥ 1713

विक्रोशन्तीं दृढं सीतां दृष्ट्वा दुःखं तथा गताम्।
तां तु लक्ष्मण रामेति क्रोशन्तीं मधुरस्वराम्॥ **3.52.42**॥ 1714

अवेक्षमाणां बहुशो वैदेहीं धरणीतलम्।
स तामाकुलकेशान्तां विप्रमृष्टविशेषकाम्।
जहारात्मविनाशाय दशग्रीवो मनस्विनीम्॥ **3.52.43**॥ 1715

ततस्तु सा चारुदती शुचिस्मिता
विनाकृता बन्धुजनेन मैथिली।
अपश्यती राघवलक्ष्मणावुभौ
विवर्णवक्त्रा भयभारपीडिता॥ **3.52.44**॥ 1716

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिपञ्चाशः सर्गः ॥

सीतया रावणस्य धिक्कारणम्

खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा।
दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ **3.53.1** ॥ 1717

रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम्।
रुदती करुणं सीता ह्रियमाणा तमब्रवीत् ॥ **3.53.2** ॥ 1718

न व्यपत्रपसे नीच कर्मणानेन रावण।
ज्ञात्वा विरहितां यो मां चोरयित्वा पलायसे ॥ **3.53.3** ॥ 1719

त्वयैव नूनं दुष्टात्मन् भीरुणा हर्तुमिच्छता।
ममापवाहितो भर्ता मृगरूपेण मायया ॥ **3.53.4** ॥ 1720

यो हि मामुद्यतस्त्रातुं सोऽप्ययं विनिपातितः।
गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ **3.53.5** ॥ 1721

परमं खलु ते वीर्यं दृश्यते राक्षसाधम।
विश्राव्य नामधेयं हि युद्धे नास्मि जिता त्वया ॥ **3.53.6** ॥ 1722

ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे।
स्त्रियाश्चाहरणं नीच रहिते च परस्य च ॥ **3.53.7** ॥ 1723

कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम्।
सुनृशंसमधर्मिष्ठं तव शौटीर्यमानिनः॥ **3.53.8**॥ 1724

धिक् ते शौर्यं च सत्त्वं च यत्त्वया कथितं तदा।
कुलाक्रोशकरं लोके धिक् ते चारित्रमीदृशम्॥ **3.53.9**॥ 1725

किं शक्यं कर्तुमेवं हि यज्जवेनैव धावसि।
मुहूर्तमपि तिष्ठ त्वं न जीवन् प्रतियास्यसि॥ **3.53.10**॥ 1726

नहि चक्षुःपथं प्राप्य तयोः पार्थिवपुत्रयोः।
ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम्॥ **3.53.11**॥ 1727

न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथञ्चन।
वने प्रज्वलितस्येव स्पर्शमग्नेर्विहङ्गमः॥ **3.53.12**॥ 1728

साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च रावण।
मत्प्रधर्षणसङ्क्रुद्धो भ्रात्रा सह पतिर्मम॥ **3.53.13**॥ 1729

विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि।
येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि॥ **3.53.14**॥ 1730

व्यवसायस्तु ते नीच भविष्यति निरर्थकः।
नह्यहं तमपश्यन्ती भर्तारं विबुधोपमम्॥ **3.53.15**॥ 1731

उत्सहे शत्रुवशगा प्राणान् धारयितुं चिरम्।
न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे॥ **3.53.16**॥ 1732

मृत्युकाले यथा मर्त्यो विपरीतानि सेवते।
मुमूर्षूणां तु सर्वेषां यत् पथ्यं तन्न रोचते॥ **3.53.17**॥ 1733

पश्यामीह हि कण्ठे त्वां कालपाशावपाशितम्।
यथा चास्मिन् भयस्थाने न बिभेषि निशाचर॥ **3.53.18**॥ 1734

व्यक्तं हिरण्मयांस्त्वं हि सम्पश्यसि महीरुहान्।
नदीं वैतरणीं घोरां रुधिरौघविवाहिनीम्॥ **3.53.19**॥ 1735

खड्गपत्रवनं चैव भीमं पश्यसि रावण।
तप्तकाञ्चनपुष्पां च वैदूर्यप्रवरच्छदाम्॥ **3.53.20**॥ 1736

द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कण्टकैश्चिताम्।
नहि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः॥ **3.53.21**॥ 1737

धारितुं शक्ष्यसि चिरं विषं पीत्वेव निर्घृण।
बद्धस्त्वं कालपाशेन दुर्निवारेण रावण॥ **3.53.22**॥ 1738

क्व गतो लप्स्यसे शर्म मम भर्तुर्महात्मनः।
निमेषान्तरमात्रेण विना भ्रातरमाहवे॥ **3.53.23**॥ 1739

राक्षसा निहता येन सहस्राणि चतुर्दश।
कथं स राघवो वीरः सर्वास्त्रकुशलो बली॥ **3.53.24**॥ 1740

न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम्।
एतच्चान्यच्च परुषं वैदेही रावणाङ्कगा।
भयशोकसमाविष्टा करुणं विललाप ह॥ **3.53.25**॥ 1741

तदा भृशार्तां बहु चैव भाषिणीं
विलापपूर्वं करुणं च भामिनीम्।
जहार पापस्तरुणीं विचेष्टतीं
नृपात्मजामागतगात्रवेपथुः॥ **3.53.26**॥ 1742

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःपञ्चाशः सर्गः ॥

सीतया पञ्चवानराणां मध्ये स्वाभूषणवस्त्राणां पातनं लङ्कां गत्वा रावणेन सीतायाः स्वान्तःपुरे रक्षणं जनस्थाने गुप्तचरतया निवासं कर्तुमष्टानां राक्षसानां प्रेषणं च

ह्रियमाणा तु वैदेही कञ्चिन्नाथमपश्यती।
ददर्श गिरिशृङ्गस्थान् पञ्च वानरपुङ्गवान्॥ **3.54.1**॥ 1743

तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम्।
उत्तरीयं वरारोहा शुभान्याभरणानि च॥ **3.54.2**॥ 1744

मुमोच यदि रामाय शंसेयुरिति भामिनी।
वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सहभूषणम्॥ **3.54.3**॥ 1745

सभ्भ्रमात् तु दशग्रीवस्तत्कर्म च न बुद्धवान्।
पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव॥ **3.54.4**॥ 1746

विक्रोशन्तीं तदा सीतां ददृशुर्वानरोत्तमाः।
स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम्॥ **3.54.5**॥ 1747

जगाम मैथिलीं गृह्य रुदतीं राक्षसेश्वरः।
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः॥ **3.54.6**॥ 1748

उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम्।
वनानि सरितः शैलान् सरांसि च विहायसा॥ **3.54.7**॥ 1749

स क्षिप्रं समतीयाय शरश्चापादिव च्युतः।
तिमिनक्रनिकेतं तु वरुणालयमक्षयम्॥ **3.54.8**॥ 1750

सरितां शरणं गत्वा समतीयाय सागरम्।
सभ्रमात् परिवृत्तोर्मी रुद्धमीनमहोरगः॥ **3.54.9**॥ 1751

वैदेह्यां ह्रियमाणायां बभूव वरुणालयः।
अन्तरिक्षगता वाचः ससृजुश्चारणास्तदा॥ **3.54.10**॥ 1752

एतदन्तो दशग्रीव इति सिद्धास्तथाब्रुवन्।
स तु सीतां विचेष्टन्तीमङ्केनादाय रावणः॥ **3.54.11**॥ 1753

प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः।
सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम्॥ **3.54.12**॥ 1754

संरूढकक्ष्यां बहुलां स्वमन्तःपुरमाविशत्।
तत्र तामसितापाङ्गीं शोकमोहसमन्विताम्॥ **3.54.13**॥ 1755

निदधे रावणः सीतां मयो मायामिवासुरीम्।
अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः॥ **3.54.14**॥ 1756

यथा नैनां पुमान् स्त्री वा सीतां पश्यत्यसम्मतः।
मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च॥ **3.54.15**॥ 1757

यद् यदिच्छेत् तदैवास्या देयं मच्छन्दतो यथा।
या च वक्ष्यति वैदेहीं वचनं किञ्चिदप्रियम्॥ **3.54.16**॥ 1758

अज्ञानाद् यदि वा ज्ञानान्न तस्या जीवितं प्रियम्।
तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान्॥ **3.54.17**॥ 1759

निष्क्रम्यान्तःपुरात् तस्मात् किं कृत्यमिति चिन्तयन्।
ददर्शाष्टौ महावीर्यान् राक्षसान् पिशिताशनान्॥ **3.54.18**॥ 1760

स तान् दृष्ट्वा महावीर्यो वरदानेन मोहितः।
उवाच तानिदं वाक्यं प्रशस्य बलवीर्यतः॥ **3.54.19**॥ 1761

नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः।
जनस्थानं हतस्थानं भूतं पूर्वं खरालयम्॥ **3.54.20**॥ 1762

तत्रास्यतां जनस्थाने शून्ये निहतराक्षसे।
पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः॥ **3.54.21**॥ 1763

बहुसैन्यं महावीर्यं जनस्थाने निवेशितम्।
सदूषणखरं युद्धे निहतं रामसायकैः॥ **3.54.22**॥ 1764

ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्धते।
वैरं च सुमहज्जातं रामं प्रति सुदारुणम्॥ **3.54.23**॥ 1765

निर्यातयितुमिच्छामि तच्च वैरं महारिपोः।
नहि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम्॥ **3.54.24**॥ 1766

तं त्विदानीमहं हत्वा खरदूषण घातिनम्।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः॥ **3.54.25**॥ 1767

जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता।
प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः॥ **3.54.26**॥ 1768

अप्रमादाच्च गन्तव्यं सर्वैरेव निशाचरैः।
कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति॥ **3.54.27**॥ 1769

युष्माकं तु बलं ज्ञातं बहुशो रणमूर्धनि।
अतश्चास्मिञ्जनस्थाने मया यूयं निवेशिताः॥ **3.54.28**॥ 1770

ततः प्रियं वाक्यमुपेत्य राक्षसा
महार्थमष्टावभिवाद्य रावणम्।

विहाय लङ्कां सहिताः प्रतस्थिरे
यतो जनस्थानमलक्ष्यदर्शनाः ॥ **3.54.29** ॥ 1771

ततस्तु सीतामुपलभ्य रावणः
सुसम्प्रहृष्टः परिगृह्य मैथिलीम्।
प्रसज्य रामेण च वैरमुत्तमं
बभूव मोहान्मुदितः स रावणः ॥ **3.54.30** ॥ 1772

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःपञ्चाशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चपञ्चाशः सर्गः ॥

रावणः सीतां स्वान्तःपुरं दर्शयित्वा त्वं मे भार्या भवेति प्रैरयत्

सन्दिश्य राक्षसान् घोरान् रावणोऽष्टौ महाबलान्।
आत्मानं बुद्धिवैक्लव्यात् कृतकृत्यममन्यत ॥ **3.55.1** ॥ 1773

स चिन्तयानो वैदेहीं कामबाणैः प्रपीडितः।
प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ **3.55.2** ॥ 1774

स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः।
अपश्यद् राक्षसीमध्ये सीतां दुःखपरायणाम् ॥ **3.55.3** ॥ 1775

अश्रुपूर्णमुखीं दीनां शोकभारावपीडिताम्।
वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ **3.55.4** ॥ 1776

मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम्।
अधोगतमुखीं सीतां तामभ्येत्य निशाचरः ॥ **3.55.5** ॥ 1777

तां तु शोकवशाद् दीनामवशां राक्षसाधिपः।
स बलाद् दर्शयामास गृहं देवगृहोपमम् ॥ **3.55.6** ॥ 1778

हर्म्यप्रासादसम्बाधं स्त्रीसहस्रनिषेवितम्।
नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितम् ॥ **3.55.7** ॥ 1779

दान्तकैस्तापनीयैश्च स्फाटिकै राजतैस्तथा।
वज्रवैदूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोरमैः॥ **3.55.8**॥ 1780

दिव्यदुन्दुभिनिर्घोषं तप्तकाञ्चनभूषणम्।
सोपानं काञ्चनं चित्रमारुरोह तया सह॥ **3.55.9**॥ 1781

दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः।
हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः॥ **3.55.10**॥ 1782

सुधामणिविचित्राणि भूमिभागानि सर्वशः।
दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम्॥ **3.55.11**॥ 1783

दीर्घिकाः पुष्करिण्यश्च नानापुष्पसमावृताः।
रावणो दर्शयामास सीतां शोकपरायणाम्॥ **3.55.12**॥ 1784

दर्शयित्वा तु वैदेहीं कृत्स्नं तद्भवनोत्तमम्।
उवाच वाक्यं पापात्मा सीतां लोभितुमिच्छया॥ **3.55.13**॥ 1785

दश राक्षसकोट्यश्च द्वाविंशतिरथापराः।
वर्जयित्वा जरावृद्धान् बालांश्च रजनीचरान्॥ **3.55.14**॥ 1786

तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम्।
सहस्रमेकमेकस्य मम कार्यपुरःसरम्॥ **3.55.15**॥ 1787

यदिदं राज्यतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम्।
जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी॥ **3.55.16**॥ 1788

बह्वीनामुत्तमस्त्रीणां मम योऽसौ परिग्रहः।
तासां त्वमीश्वरी सीते मम भार्या भव प्रिये॥ **3.55.17**॥ 1789

साधु किं तेऽन्यथाबुद्ध्या रोचयस्व वचो मम।
भजस्व माभितप्तस्य प्रसादं कर्तुमर्हसि॥ **3.55.18**॥ 1790

परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः॥ **3.55.19**॥ 1791

न देवेषु न यक्षेषु न गन्धर्वेषु नर्षिषु।
अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत्॥ **3.55.20**॥ 1792

राज्यभ्रष्टेन दीनेन तापसेन पदातिना।
किं करिष्यसि रामेण मानुषेणाल्पतेजसा॥ **3.55.21**॥ 1793

भजस्व सीते मामेव भर्ताहं सदृशस्तव।
यौवनं त्वध्रुवं भीरु रमस्वेह मया सह॥ **3.55.22**॥ 1794

दर्शने मा कृथा बुद्धिं राघवस्य वरानने।
कास्य शक्तिरिहागन्तुमपि सीते मनोरथैः॥ **3.55.23**॥ 1795

न शक्यो वायुराकाशे पाशैर्बद्धं महाजवः।
दीप्यमानस्य वाप्यग्नेर्ग्रहीतुं विमलाः शिखाः॥ **3.55.24**॥ 1796

त्रयाणामपि लोकानां न तं पश्यामि शोभने।
विक्रमेण नयेद् यस्त्वां मद्भाहुपरिपालिताम्॥ **3.55.25**॥ 1797

लङ्कायाः सुमहद्राज्यमिदं त्वमनुपालय।
त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचरम्॥ **3.55.26**॥ 1798

अभिषेकजलक्लिन्ना तुष्टा च रमयस्व च।
दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम्॥ **3.55.27**॥ 1799

यच्च ते सुकृतं कर्म तस्येह फलमाप्नुहि।
इह सर्वाणि माल्यानि दिव्यगन्धानि मैथिलि॥ **3.55.28**॥ 1800

भूषणानि च मुख्यानि तानि सेव मया सह।
पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे॥ **3.55.29**॥ 1801

विमानं सूर्यसङ्काशं तरसा निर्जितं रणे।
विशालं रमणीयं च तद्विमानं मनोजवम्॥ **3.55.30**॥ 1802

तत्र सीते मया सार्धं विहरस्व यथासुखम्।
वदनं पद्मसङ्काशं विमलं चारुदर्शनम्॥ **3.55.31**॥ 1803

शोकार्तं तु वरारोहे न भ्राजति वरानने।
एवं वदति तस्मिन् सा वस्त्रान्तेन वराङ्गना॥ **3.55.32**॥ 1804

पिधायेन्दुनिभं सीता मन्दमश्रूण्यवर्तयत्।
ध्यायन्तीं तामिवास्वस्थां सीतां चिन्ताहतप्रभाम्॥ **3.55.33**॥ 1805

उवाच वचनं वीरो रावणो रजनीचरः।
अलं व्रीडेन वैदेहि धर्मलोपकृतेन ते॥ **3.55.34**॥ 1806

आर्षोऽयं देवि निष्पन्दो यस्त्वामभिभविष्यति।
एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ॥ **3.55.35**॥ 1807

प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते।
इमाः शून्या मया वाचः शुष्यमाणेन भाषिताः॥ **3.55.36**॥ 1808

न चापि रावणः काञ्चिन्मूर्ध्ना स्त्रीं प्रणमेत ह।
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम्।
कृतान्तवशमापन्नो ममेयमिति मन्यते॥ **3.55.37**॥ 1809

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्पञ्चाशः सर्गः ॥

सीता श्रीरामे स्वानुरागं सन्दर्श्य रावणं भर्त्सयामास रावणस्याज्ञया राक्षस्यस्तामशोकवाटिकां नीत्वा भीषयामासुः

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता।
तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ **3.56.1** ॥ 1810

राजा दशरथो नाम धर्मसेतुरिवाचलः।
सत्यसन्धः परिज्ञातो यस्य पुत्रः स राघवः ॥ **3.56.2** ॥ 1811

रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः।
दीर्घबाहुर्विशालाक्षो दैवतं स पतिर्मम ॥ **3.56.3** ॥ 1812

इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः।
लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान् वधिष्यति ॥ **3.56.4** ॥ 1813

प्रत्यक्षं यद्यहं तस्य त्वया वै धर्षिता बलात्।
शयिता त्वं हतः सङ्ख्ये जनस्थाने यथा खरः ॥ **3.56.5** ॥ 1814

य एते राक्षसाः प्रोक्ता घोररूपा महाबलाः।
राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ **3.56.6** ॥ 1815

तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः।
शरीरं विधमिष्यन्ति गङ्गाकूलमिवोर्मयः ॥ **3.56.7** ॥ 1816

असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि रावण।
उत्पाद्य सुमहद् वैरं जीवंस्तस्य न मोक्ष्यसे॥ **3.56.8**॥ 1817

स ते जीवितशेषस्य राघवोऽन्तकरो बली।
पशोर्यूपगतस्येव जीवितं तव दुर्लभम्॥ **3.56.9**॥ 1818

यदि पश्येत् स रामस्त्वां रोषदीप्तेन चक्षुषा।
रक्षस्त्वमद्य निर्दग्धो यथा रुद्रेण मन्मथः॥ **3.56.10**॥ 1819

यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा।
सागरं शोषयेद् वापि स सीतां मोचयेदिह॥ **3.56.11**॥ 1820

गतासुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः।
लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति॥ **3.56.12**॥ 1821

न ते पापमिदं कर्म सुखोदर्कं भविष्यति।
याहं नीता विनाभावं पतिपार्श्वात् त्वया बलात्॥ **3.56.13**॥ 1822

स हि देवरसंयुक्तो मम भर्ता महाद्युतिः।
निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके॥ **3.56.14**॥ 1823

स ते वीर्यं बलं दर्पमुत्सेकं च तथाविधम्।
अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे॥ **3.56.15**॥ 1824

यदा विनाशो भूतानां दृश्यते कालचोदितः।
तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः॥ **3.56.16**॥ 1825

मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम।
आत्मनो राक्षसानां च वधायान्तःपुरस्य च॥ **3.56.17**॥ 1826

न शक्या यज्ञमध्यस्था वेदिः स्रुग्भाण्डमण्डिता।
द्विजातिमन्त्रसम्पूता चण्डालेनावमर्दितुम्॥ **3.56.18**॥ 1827

तथाहं धर्मनित्यस्य धर्मपत्नी दृढव्रता।
त्वया स्प्रष्टुं न शक्याहं राक्षसाधम पापिना॥ **3.56.19**॥ 1828

क्रीडन्ती राजहंसेन पद्मषण्डेषु नित्यशः।
हंसी सा तृणमध्यस्थं कथं द्रक्ष्येत मद्वुकम्॥ **3.56.20**॥ 1829

इदं शरीरं निःसंज्ञं बन्ध वा घातयस्व वा।
नेदं शरीरं रक्ष्यं मे जीवितं वापि राक्षस॥ **3.56.21**॥ 1830

न तु शक्यमपक्रोशं पृथिव्यां दातुमात्मनः।
एवमुक्त्वा तु वैदेही क्रोधात् सुपरुषं वचः॥ **3.56.22**॥ 1831

रावणं जानकी तत्र पुनर्नोवाच किञ्चन।
सीताया वचनं श्रुत्वा परुषं रोमहर्षणम्॥ **3.56.23**॥ 1832

प्रत्युवाच ततः सीतां भयसन्दर्शनं वचः।
शृणु मैथिलि मद्वाक्यं मासान् द्वादश भामिनि॥ **3.56.24**॥ 1833

कालेनानेन नाभ्येषि यदि मां चारुहासिनि।
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः॥ **3.56.25**॥ 1834

इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः।
राक्षसीश्च ततः क्रुद्ध इदं वचनमब्रवीत्॥ **3.56.26**॥ 1835

शीघ्रमेव हि राक्षस्यो विरूपा घोरदर्शनाः।
दर्पमस्यापनेष्यन्तु मांसशोणितभोजनाः॥ **3.56.27**॥ 1836

वचनादेव तास्तस्य सुघोरा घोरदर्शनाः।
कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन्॥ **3.56.28**॥ 1837

स ताः प्रोवाच राजासौ रावणो घोरदर्शनाः।
प्रचल्य चरणोत्कर्शैर्दारयन्निव मेदिनीम्॥ **3.56.29**॥ 1838

अशोकवनिकामध्ये मैथिली नीयतामिति।
तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता॥ **3.56.30**॥ 1839

तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम्।
आनयध्वं वशं सर्वा वन्यां गजवधूमिव॥ **3.56.31**॥ 1840

इति प्रतिसमादिष्टा राक्षस्यो रावणेन ताः।
अशोकवनिकां जग्मुर्मैथिलीं परिगृह्य तु॥ **3.56.32**॥ 1841

सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृताम्।
सर्वकालमदैश्चापि द्विजैः समुपसेविताम्॥ **3.56.33**॥ 1842

सा तु शोकपरीताङ्गी मैथिली जनकात्मजा।
राक्षसीवशमापन्ना व्याघ्रीणां हरिणी यथा॥ **3.56.34**॥ 1843

शोकेन महता ग्रस्ता मैथिली जनकात्मजा।
न शर्म लभते भीरुः पाशबद्धा मृगी यथा॥ **3.56.35**॥ 1844

न विन्दते तत्र तु शर्म मैथिली
विरूपनेत्राभिरतीव तर्जिता।
पतिं स्मरन्ती दयितं च देवरं
विचेतनाभूद् भयशोकपीडिता॥ **3.56.36**॥ 1845

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षट्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रक्षिप्तः सर्गः ॥

ब्रह्मण आदेशेनेन्द्रस्य निद्रया सह लङ्कायां प्रवेशस्तेन सीतायै दिव्यक्षीरस्य दानं तथा विसृष्टस्य तस्य ततो निवर्तनं च

प्रवेशितायां सीतायां लङ्कां प्रति पितामहः।
तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम्॥ **1**॥ 1846

त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च।
लङ्कां प्रवेशिता सीता रावणेन दुरात्मना॥ **2**॥ 1847

पतिव्रता महाभागा नित्यं चैव सुखैधिता।
अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम्॥ **3**॥ 1848

राक्षसीभिः परिवृता भर्तृदर्शनलालसा।
निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः॥ **4**॥ 1849

कथं ज्ञास्यति तां रामस्तत्रस्थां तामनिन्दिताम्।
दुःखं सञ्चिन्तयन्ती सा बहुशः परिदुर्लभा॥ **5**॥ 1850

प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम्।
स भूयः संशयो जातः सीतायाः प्राणसङ्क्षये॥ **6**॥ 1851

स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम्।
प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम्॥ **7**॥ 1852

एवमुक्तोऽथ देवेन्द्रः पुरीं रावणपालिताम्।
आगच्छन्निद्रया सार्धं भगवान् पाकशासनः॥ **8**॥ 1853

निद्रां चोवाच गच्छ त्वं राक्षसान् सम्प्रमोहय।
सा तथोक्ता मघवता देवी परमहर्षिता॥ **9**॥ 1854

देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान्।
एतस्मिन्नन्तरे देवः सहस्राक्षः शचीपतिः॥ **10**॥ 1855

आससाद वनस्थां तां वचनं चेदमब्रवीत्।
देवराजोऽस्मि भद्रं ते इह चास्मि शुचिस्मिते॥ **11**॥ 1856

अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः।
साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे॥ **12**॥ 1857

मत्प्रसादात् समुद्रं स तरिष्यति बलैः सह।
मयैवेह च राक्षस्यो मायया मोहिताः शुभे॥ **13**॥ 1858

तस्मादन्नमिदं सीते हविष्यान्नमहं स्वयम्।
स त्वां सङ्गृह्य वैदेहि आगतः सह निद्रया॥ **14**॥ 1859

एतदत्स्यसि मद्भस्तान्न त्वां बाधिष्यते शुभे।
क्षुधा तृषा च रम्भोरु वर्षाणामयुतैरपि॥ **15**॥ 1860

एवमुक्ता तु देवेन्द्रमुवाच परिशङ्किता।
कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम्॥ **16**॥ 1861

देवलिङ्गानि दृष्टानि रामलक्ष्मणसन्निधौ।
तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम्॥ **17**॥ 1862

सीताया वचनं श्रुत्वा तथा चक्रे शचीपतिः।
पृथिवीं नास्पृशत् पद्भ्यामनिमेषेक्षणानि च॥ **18**॥ 1863

अरजोऽम्बरधारी च नम्लानकुसुमस्तथा।
तं ज्ञात्वा लक्ष्मणैः सीता वासवं परिहर्षिता॥ **19**॥ 1864

उवाच वाक्यं रुदती भगवन् राघवं प्रति।
सह भ्रात्रा महाबाहुर्दिष्ट्या मे श्रुतिमागतः॥ **20**॥ 1865

यथा मे श्वशुरो राजा यथा च मिथिलाधिपः।
तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया॥ **21**॥ 1866

तवाज्ञया च देवेन्द्र पयोभूतमिदं हविः।
अशिष्यामि त्वया दत्तं रघूणां कुलवर्धनम्॥ **22**॥ 1867

इन्द्रहस्ताद् गृहीत्वा तत् पायसं सा शुचिस्मिता।
न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली॥ **23**॥ 1868

यदि जीवति मे भर्ता सह भ्रात्रा महाबलः।
इदमस्तु तयोर्भक्त्या तदाश्नात् पायसं स्वयम्॥ **24**॥ 1869

इतीव तत् प्राश्य हविर्वरानना
जहौ क्षुधादुःखसमुद्भवं च तम्।
इन्द्रात् प्रवृत्तिमुपलभ्य जानकी
काकुत्स्थयोः प्रीतमना बभूव॥ **25**॥ 1870

स चापि शक्रस्त्रिदिवालयं तदा
प्रीतो ययौ राघवकार्यसिद्धये।
आमन्त्र्य सीतां स ततो महात्मा
जगाम निद्रासहितः स्वमालयम्॥ **26**॥ 1871

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे प्रक्षिप्तः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तपञ्चाशः सर्गः ॥

श्रीरामस्य मृगं हत्वा निवर्तनं मार्गेऽपशकुनं दृष्ट्वा तस्य चिन्ता तत्र मिलितं लक्ष्मणमुपालभ्य सीताविषयकसङ्कटस्य तेनाशङ्कनम्

राक्षसं मृगरूपेण चरन्तं कामरूपिणम्।
निहत्य रामो मारीचं तूर्णं पथि न्यवर्तत॥ **3.57.1**॥ 1872

तस्य सन्त्वरमाणस्य द्रष्टुकामस्य मैथिलीम्।
क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः॥ **3.57.2**॥ 1873

स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम्।
चिन्तयामास गोमायोः स्वरेण परिशङ्कितः॥ **3.57.3**॥ 1874

अशुभं बत मन्येऽहं गोमायुर्वाश्यते यथा।
स्वस्ति स्यादपि वैदेह्या राक्षसैर्भक्षणं विना॥ **3.57.4**॥ 1875

मारीचेन तु विज्ञाय स्वरमालक्ष्य मामकम्।
विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद् यदि॥ **3.57.5**॥ 1876

स सौमित्रिः स्वरं श्रुत्वा तां च हित्वाथ मैथिलीम्।
तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति॥ **3.57.6**॥ 1877

राक्षसैः सहितैर्नूनं सीताया ईप्सितो वधः।
काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम्॥ **3.57.7**॥ 1878

दूरं नीत्वाथ मारीचो राक्षसोऽभूच्छराहतः।
हा लक्ष्मण हतोऽस्मीति यद्वाक्यं व्याजहार ह॥ **3.57.8**॥ 1879

अपि स्वस्ति भवेद् द्वाभ्यां रहिताभ्यां मया वने।
जनस्थाननिमित्तं हि कृतवैरोऽस्मि राक्षसैः॥ **3.57.9**॥ 1880

निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च।
इत्येवं चिन्तयन् रामः श्रुत्वा गोमायुनिःस्वनम्॥ **3.57.10**॥ 1881

निवर्तमानस्त्वरितो जगामाश्रममात्मवान्।
आत्मनश्चापनयनं मृगरूपेण रक्षसा॥ **3.57.11**॥ 1882

आजगाम जनस्थानं राघवः परिशङ्कितः।
तं दीनमानसं दीनमासेदुर्मृगपक्षिणः॥ **3.57.12**॥ 1883

सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान्।
तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः।
न्यवर्तताथ त्वरितो जवेनाश्रममात्मनः॥ **3.57.13**॥ 1884

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम्।
ततोऽविदूरे रामेण समीयाय स लक्ष्मणः॥ **3.57.14**॥ 1885

विषण्णः सन् विषण्णेन दुःखितो दुःखभागिना।
स जगर्हेऽथ तं भ्राता दृष्ट्वा लक्ष्मणमागतम्॥ **3.57.15**॥ 1886

विहाय सीतां विजने वने राक्षससेविते।
गृहीत्वा च करं सव्यं लक्ष्मणं रघुनन्दनः॥ **3.57.16**॥ 1887

उवाच मधुरोदर्कमिदं परुषमार्तवत्।
अहो लक्ष्मण गर्ह्यं ते कृतं यत् त्वं विहाय ताम्॥ **3.57.17**॥ 1888

सीतामिहागतः सौम्य कच्चित् स्वस्ति भवेदिति।
न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा॥ **3.57.18**॥ 1889

विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः।
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे॥ **3.57.19**॥ 1890

अपि लक्ष्मण सीतायाः सामग्र्यं प्राप्नुयामहे।
जीवन्त्याः पुरुषव्याघ्र सुताया जनकस्य वै॥ **3.57.20**॥ 1891

यथा वै मृगसङ्घाश्च गोमायुश्चैव भैरवम्।
वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम्।
अपि स्वस्ति भवेत् तस्या राजपुत्र्या महाबल॥ **3.57.21**॥ 1892

इदं हि रक्षो मृगसन्निकाशं
प्रलोभ्य मां दूरमनुप्रयातम्।
हतं कथञ्चिन्महता श्रमेण
स राक्षसोऽभून्म्रियमाण एव॥ **3.57.22**॥ 1893

मनश्च मे दीनमिहाप्रहृष्टं
चक्षुश्च सव्यं कुरुते विकारम्।
असंशयं लक्ष्मण नास्ति सीता
हृता मृता वा पथि वर्तते वा॥ **3.57.23**॥ 1894

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टपञ्चाशः सर्गः ॥

पथि विविधामाशङ्कां कुर्वतो लक्ष्मणसहितस्य श्रीरामस्य स्वाश्रमे आगमनं तत्र सीतामदृष्ट्वा व्यथायां निमज्जनम्

स दृष्ट्वा लक्ष्मणं दीनं शून्यं दशरथात्मजः।
पर्यपृच्छत धर्मात्मा वैदेहीमागतं विना ॥ **3.58.1** ॥ 1895

प्रस्थितं दण्डकारण्यं या मामनुजगाम ह।
क्व सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥ **3.58.2** ॥ 1896

राज्यभ्रष्टस्य दीनस्य दण्डकान् परिधावतः।
क्व सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ **3.58.3** ॥ 1897

यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम्।
क्व सा प्राणसहाया मे सीता सुरसुतोपमा ॥ **3.58.4** ॥ 1898

पतित्वममराणां हि पृथिव्याश्चापि लक्ष्मण।
विना तां तपनीयाभां नेच्छेयं जनकात्मजाम् ॥ **3.58.5** ॥ 1899

कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम।
कच्चित् प्रव्राजनं वीर न मे मिथ्या भविष्यति ॥ **3.58.6** ॥ 1900

सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि।
कच्चित् सकामा कैकेयी सुखिता सा भविष्यति ॥ **3.58.7** ॥ 1901

सपुत्रराज्यां सिद्धार्थां मृतपुत्रा तपस्विनी।
उपस्थास्यति कौसल्या कच्चित् सौम्येन कैकयीम्॥ **3.58.8**॥ 1902

यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः।
संवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण॥ **3.58.9**॥ 1903

यदि मामाश्रमगतं वैदेही नाभिभाषते।
पुरः प्रहसिता सीता विनशिष्यामि लक्ष्मण॥ **3.58.10**॥ 1904

ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा।
त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी॥ **3.58.11**॥ 1905

सुकुमारी च बाला च नित्यं चादुःखभागिनी।
मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः॥ **3.58.12**॥ 1906

सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना।
वदता लक्ष्मणेत्युच्चैस्तवापि जनितं भयम्॥ **3.58.13**॥ 1907

श्रुतश्च मन्ये वैदेह्या स स्वरः सदृशो मम।
त्रस्तया प्रेषितस्त्वं च द्रष्टुं मां शीघ्रमागतः॥ **3.58.14**॥ 1908

सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने।
प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम्॥ **3.58.15**॥ 1909

दुःखिताः खरघातेन राक्षसाः पिशिताशनाः।
तैः सीता निहता घोरैर्भविष्यति न संशयः॥ **3.58.16**॥ 1910

अहोऽस्मि व्यसने मग्नः सर्वथा रिपुनाशन।
किं त्विदानीं करिष्यामि शङ्के प्राप्तव्यमीदृशम्॥ **3.58.17**॥ 1911

इति सीतां वरारोहां चिन्तयन्नेव राघवः।
आजगाम जनस्थानं त्वरया सहलक्ष्मणः॥ **3.58.18**॥ 1912

विगर्हमाणोऽनुजमार्तरूपं
क्षुधाश्रमेणैव पिपासया च।
विनिःश्वसञ्शुष्कमुखो विषण्णः
प्रतिश्रयं प्राप्य समीक्ष्य शून्यम्॥ **3.58.19**॥ 1913

स्वमाश्रमं स प्रविगाह्य वीरो
विहारदेशाननुसृत्य कांश्चित्।
एतत्तदित्येव निवासभूमौ
प्रहृष्टरोमा व्यथितो बभूव॥ **3.58.20**॥ 1914

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनषष्टितमः सर्गः ॥

श्रीरामलक्ष्मणयोर्वार्तालापः

अथाश्रमादुपावृत्तमन्तरा रघुनन्दनः।
परिपप्रच्छ सौमित्रिं रामो दुःखादिदं वचः॥ **3.59.1** ॥ 1915

तमुवाच किमर्थं त्वमागतोऽपास्य मैथिलीम्।
यदा सा तव विश्वासाद् वने विरहिता मया॥ **3.59.2** ॥ 1916

दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण।
शङ्कमानं महत् पापं यत्सत्यं व्यथितं मनः॥ **3.59.3** ॥ 1917

स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे।
दृष्ट्वा लक्ष्मण दूरे त्वां सीताविरहितं पथि॥ **3.59.4** ॥ 1918

एवमुक्तस्तु सौमित्रिर्लक्ष्मणः शुभलक्षणः।
भूयो दुःखसमाविष्टो दुखितं राममब्रवीत्॥ **3.59.5** ॥ 1919

न स्वयं कामकारेण तां त्यक्त्वाहमिहागतः।
प्रचोदितस्तयैवोग्रैस्त्वत्सकाशमिहागतः॥ **3.59.6** ॥ 1920

आर्येणेव परिक्रुष्टं लक्ष्मणेति सुविस्वरम्।
परित्राहीति यद्वाक्यं मैथिल्यास्तच्छ्रुतिं गतम्॥ **3.59.7** ॥ 1921

सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली।
गच्छ गच्छेति मामाशु रुदती भयविक्लवा॥ **3.59.8**॥ 1922

प्रचोद्यमानेन मया गच्छेति बहुशस्तया।
प्रत्युक्ता मैथिली वाक्यमिदं तत् प्रत्ययान्वितम्॥ **3.59.9**॥ 1923

न तत् पश्याम्यहं रक्षो यदस्य भयमावहेत्।
निर्वृता भव नास्त्येतत् केनाप्येतदुदाहृतम्॥ **3.59.10**॥ 1924

विगर्हितं च नीचं च कथमार्योऽभिधास्यति।
त्राहीति वचनं सीते यस्त्रायेत् त्रिदशानपि॥ **3.59.11**॥ 1925

किन्निमित्तं तु केनापि भ्रातुरालम्ब्य मे स्वरम्।
विस्वरं व्याहृतं वाक्यं लक्ष्मण त्राहि मामिति॥ **3.59.12**॥ 1926

राक्षसेनेरितं वाक्यं त्रासात् त्राहीति शोभने।
न भवत्या व्यथा कार्या कुनारीजनसेविता॥ **3.59.13**॥ 1927

अलं विक्लवतां गन्तुं स्वस्था भव निरुत्सुका।
न चास्ति त्रिषु लोकेषु पुमान् यो राघवं रणे॥ **3.59.14**॥ 1928

जातो वा जायमानो वा संयुगे यः पराजयेत्।
अजेयो राघवो युद्धे देवैः शक्रपुरोगमैः॥ **3.59.15**॥ 1929

एवमुक्ता तु वैदेही परिमोहितचेतना।
उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः॥ **3.59.16**॥ 1930

भावो मयि तवात्यर्थपाप एव निवेशितः।
विनष्टे भ्रातरि प्राप्तुं न च त्वं मामवाप्स्यसे॥ **3.59.17**॥ 1931

सङ्केताद् भरतेन त्वं रामं समनुगच्छसि।
क्रोशन्तं हि यथात्यर्थं नैनमभ्यवपद्यसे॥ **3.59.18**॥ 1932

रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि।
राघवस्यान्तरं प्रेप्सुस्तथैनं नाभिपद्यसे॥ **3.59.19**॥ 1933

एवमुक्तस्तु वैदेह्या संरब्धो रक्तलोचनः।
क्रोधात् प्रस्फुरमाणोष्ठ आश्रमादभिनिर्गतः॥ **3.59.20**॥ 1934

एवं ब्रुवाणं सौमित्रिं रामः सन्तापमोहितः।
अब्रवीद् दुष्कृतं सौम्य तां विना त्वमिहागतः॥ **3.59.21**॥ 1935

जानन्नपि समर्थं मां रक्षसामपवारणे।
अनेन क्रोधवाक्येन मैथिल्या निर्गतो भवान्॥ **3.59.22**॥ 1936

नहि ते परितुष्यामि त्यक्त्वा यदसि मैथिलीम्।
क्रुद्धायाः परुषं श्रुत्वा स्त्रिया यत् त्वमिहागतः॥ **3.59.23**॥ 1937

सर्वथा त्वपनीतं ते सीतया यत् प्रचोदितः।
क्रोधस्य वशमागम्य नाकरोः शासनं मम॥ **3.59.24**॥ 1938

असौ हि राक्षसः शेते शरेणाभिहतो मया।
मृगरूपेण येनाहमाश्रमादपवाहितः॥ **3.59.25**॥ 1939

विकृष्य चापं परिधाय सायकं
सलीलबाणेन च ताडितो मया।
मार्गीं तनुं त्यज्य च विक्लवस्वरो
बभूव केयूरधरः स राक्षसः॥ **3.59.26**॥ 1940

शराहतेनैव तदार्तया गिरा
स्वरं ममालम्ब्य सुदूरसुश्रवम्।

उदाहृतं तद् वचनं सुदारुणं
त्वमागतो येन विहाय मैथिलीम् ॥ **3.59.27** ॥ 1941

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्टितमः सर्गः ॥

विलपता श्रीरामेण वृक्षान् पशूंश्च प्रति सीताविषयकवार्ताया जिज्ञासनं भ्रान्तस्य तस्य रोदनं भूयो भूयस्तेन सीताया अन्वेषणं च

भृशमाव्रजमानस्य तस्याधो वामलोचनम्।
प्रास्फुरच्चास्खलद् रामो वेपथुश्चास्य जायते ॥ **3.60.1** ॥ 1942

उपालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः।
अपि क्षेमं तु सीताया इति वै व्याजहार ह ॥ **3.60.2** ॥ 1943

त्वरमाणो जगामाथ सीतादर्शनलालसः।
शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ **3.60.3** ॥ 1944

उद्भ्रमन्निव वेगेन विक्षिपन् रघुनन्दनः।
तत्र तत्रोटजस्थानमभिवीक्ष्य समन्ततः ॥ **3.60.4** ॥ 1945

ददर्श पर्णशालां च सीतया रहितां तदा।
श्रिया विरहितां ध्वस्तां हेमन्ते पद्मिनीमिव ॥ **3.60.5** ॥ 1946

रुदन्तमिव वृक्षैश्च ग्लानपुष्पमृगद्विजम्।
श्रिया विहीनं विध्वस्तं सन्त्यक्तं वनदैवतैः ॥ **3.60.6** ॥ 1947

विप्रकीर्णाजिनकुशं विप्रविद्धबृसीकटम्।
दृष्ट्वा शून्योटजस्थानं विललाप पुनः पुनः ॥ **3.60.7** ॥ 1948

हृता मृता वा नष्टा वा भक्षिता वा भविष्यति।
निलीनाप्यथवा भीरुरथवा वनमाश्रिता॥ **3.60.8**॥ 1949

गता विचेतुं पुष्पाणि फलान्यपि च वा पुनः।
अथवा पद्मिनीं याता जलार्थं वा नदीं गता॥ **3.60.9**॥ 1950

यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम्।
शोकरक्तेक्षणः श्रीमानुन्मत्त इव लक्ष्यते॥ **3.60.10**॥ 1951

वृक्षाद् वृक्षं प्रधावन् स गिरींश्चापि नदीनदम्।
बभ्राम विलपन् रामः शोकपङ्कार्णवप्लुतः॥ **3.60.11**॥ 1952

अस्ति कच्चित्त्वया दृष्टा सा कदम्बप्रिया प्रिया।
कदम्ब यदि जानीषे शंस सीतां शुभाननाम्॥ **3.60.12**॥ 1953

स्निग्धपल्लवसङ्काशां पीतकौशेयवासिनीम्।
शंसस्व यदि सा दृष्टा बिल्व बिल्वोपमस्तनी॥ **3.60.13**॥ 1954

अथवार्जुन शंस त्वं प्रियां तामर्जुनप्रियाम्।
जनकस्य सुता तन्वी यदि जीवति वा न वा॥ **3.60.14**॥ 1955

ककुभः ककुभोरुं तां व्यक्तं जानाति मैथिलीम्।
लतापल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः॥ **3.60.15**॥ 1956

भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्यसि।
एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम्॥ **3.60.16**॥ 1957

अशोक शोकापनुद शोकोपहतचेतनम्।
त्वन्नामानं कुरु क्षिप्रं प्रियासन्दर्शनेन माम्॥ **3.60.17**॥ 1958

यदि ताल त्वया दृष्टा पक्वतालोपमस्तनी।
कथयस्व वरारोहां कारुण्यं यदि ते मयि॥ **3.60.18**॥ 1959

यदि दृष्टा त्वया जम्बो जाम्बूनदसमप्रभा।
प्रियां यदि विजानासि निःशङ्क कथयस्व मे॥ **3.60.19**॥ 1960

अहो त्वं कर्णिकाराद्य पुष्पितः शोभसे भृशम्।
कर्णिकारप्रियां साध्वीं शंस दृष्टा यदि प्रिया॥ **3.60.20**॥ 1961

चूतनीपमहासालान् पनसान् कुरवान् धवान्।
दाडिमानपि तान् गत्वा दृष्ट्वा रामो महायशाः॥ **3.60.21**॥ 1962

बकुलानथ पुन्नागांश्चन्दनान् केतकांस्तथा।
पृच्छन् रामो वने भ्रान्त उन्मत्त इव लक्ष्यते॥ **3.60.22**॥ 1963

अथवा मृगशावाक्षीं मृग जानासि मैथिलीम्।
मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत्॥ **3.60.23**॥ 1964

गज सा गजनासोरुर्यदि दृष्टा त्वया भवेत्।
तां मन्ये विदितां तुभ्यमाख्याहि वरवारण॥ **3.60.24**॥ 1965

शार्दूल यदि सा दृष्टा प्रिया चन्द्रनिभानना।
मैथिली मम विस्रब्धः कथयस्व न ते भयम्॥ **3.60.25**॥ 1966

किं धावसि प्रिये नूनं दृष्टासि कमलेक्षणे।
वृक्षैराच्छाद्य चात्मानं किं मां न प्रतिभाषसे॥ **3.60.26**॥ 1967

तिष्ठ तिष्ठ वरारोहे न तेऽस्ति करुणा मयि।
नात्यर्थं हास्यशीलासि किमर्थं मामुपेक्षसे॥ **3.60.27**॥ 1968

पीतकौशेयकेनासि सूचिता वरवर्णिनि।
धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम्॥ **3.60.28**॥ 1969

नैव सा नूनमथवा हिंसिता चारुहासिनी।
कृच्छ्रं प्राप्तं न मां नूनं यथोपेक्षितुमर्हति॥ **3.60.29**॥ 1970

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः।
विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया॥ **3.60.30**॥ 1971

नूनं तच्छुभदन्तोष्ठं सुनासं शुभकुण्डलम्।
पूर्णचन्द्रनिभं ग्रस्तं मुखं निष्प्रभतां गतम्॥ **3.60.31**॥ 1972

सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेयकोचिता।
कोमला विलपन्त्यास्तु कान्ताया भक्षिता शुभा॥ **3.60.32**॥ 1973

नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ।
भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ॥ **3.60.33**॥ 1974

मया विरहिता बाला रक्षसां भक्षणाय वै।
सार्थेनेव परित्यक्ता भक्षिता बहुबान्धवा॥ **3.60.34**॥ 1975

हा लक्ष्मण महाबाहो पश्यसे त्वं प्रियां क्वचित्।
हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः॥ **3.60.35**॥ 1976

इत्येवं विलपन् रामः परिधावन् वनाद् वनम्।
क्वचिदुद्भ्रमते वेगात् क्वचिद् विभ्रमते बलात्॥ **3.60.36**॥ 1977

क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः।
स वनानि नदीः शैलान् गिरिप्रस्रवणानि च।
काननानि च वेगेन भ्रमत्यपरिसंस्थितः॥ **3.60.37**॥ 1978

तदा स गत्वा विपुलं महद् वनं
परीत्य सर्वं त्वथ मैथिलीं प्रति।
अनिष्ठिताशः स चकार मार्गणे
पुनः प्रियायाः परमं परिश्रमम्॥ **3.60.38**॥ 1979

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकषष्टितमः सर्गः ॥

श्रीरामलक्ष्मणाभ्यां सीताया अन्वेषणं तस्या अनधिगमे श्रीरामस्य विलापश्च

दृष्ट्वाऽऽश्रमपदं शून्यं रामो दशरथात्मजः।
रहितां पर्णशालां च प्रविद्धान्यासनानि च ॥ **3.61.1** ॥ 1980

अदृष्ट्वा तत्र वैदेहीं सन्निरीक्ष्य च सर्वशः।
उवाच रामः प्राक्रुश्य प्रगृह्य रुचिरौ भुजौ ॥ **3.61.2** ॥ 1981

क्व नु लक्ष्मण वैदेही कं वा देशमितो गता।
केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया ॥ **3.61.3** ॥ 1982

वृक्षेणावार्य यदि मां सीते हसितुमिच्छसि।
अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ **3.61.4** ॥ 1983

यैः परिक्रीडसे सीते विश्वस्तैर्मृगपोतकैः।
एते हीनास्त्वया सौम्ये ध्यायन्त्यस्राविलेक्षणाः ॥ **3.61.5** ॥ 1984

सीतया रहितोऽहं वै नहि जीवामि लक्ष्मण।
वृतं शोकेन महता सीताहरणजेन माम् ॥ **3.61.6** ॥ 1985

परलोके महाराजो नूनं द्रक्ष्यति मे पिता।
कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः ॥ **3.61.7** ॥ 1986

अपूरयित्वा तं कालं मत्सकाशमिहागतः।
कामवृत्तमनार्यं वा मृषावादिनमेव च॥ **3.61.8**॥ 1987

धिक् त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता।
विवशं शोकसन्तप्तं दीनं भग्नमनोरथम्॥ **3.61.9**॥ 1988

मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम्।
क्व गच्छसि वरारोहे मा मोत्सृज सुमध्यमे॥ **3.61.10**॥ 1989

त्वया विरहितश्चाहं त्यक्ष्ये जीवितमात्मनः।
इतीव विलपन् रामः सीतादर्शनलालसः॥ **3.61.11**॥ 1990

न ददर्श सुदुःखार्तो राघवो जनकात्मजाम्।
अनासादयमानं तं सीतां शोकपरायणम्॥ **3.61.12**॥ 1991

पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम्।
लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया॥ **3.61.13**॥ 1992

मा विषादं महाबुद्धे कुरु यत्नं मया सह।
इदं गिरिवरं वीर बहुकन्दरशोभितम्॥ **3.61.14**॥ 1993

प्रियकाननसञ्चारा वनोन्मत्ता च मैथिली।
सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम्॥ **3.61.15**॥ 1994

सरितं वापि सम्प्राप्ता मीनवञ्जुलसेविताम्।
वित्रासयितुकामा वा लीना स्यात् कानने क्वचित्॥ **3.61.16**॥ 1995

जिज्ञासमाना वैदेही त्वां मां च पुरुषर्षभ।
तस्या ह्यन्वेषणे श्रीमन् क्षिप्रमेव यतावहे॥ **3.61.17**॥ 1996

वनं सर्वं विचिनुवो यत्र सा जनकात्मजा।
मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः॥ **3.61.18**॥ 1997

एवमुक्तः स सौहार्दाल्लक्ष्मणेन समाहितः।
सह सौमित्रिणा रामो विचेतुमुपचक्रमे॥ **3.61.19**॥ 1998

तौ वनानि गिरींश्चैव सरितश्च सरांसि च।
निखिलेन विचिन्वन्तौ सीतां दशरथात्मजौ॥ **3.61.20**॥ 1999

तस्य शैलस्य सानूनि शिलाश्च शिखराणि च।
निखिलेन विचिन्वन्तौ नैव तामभिजग्मतुः॥ **3.61.21**॥ 2000

विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत्।
नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभाम्॥ **3.61.22**॥ 2001

ततो दुःखाभिसन्तप्तो लक्ष्मणो वाक्यमब्रवीत्।
विचरन् दण्डकारण्यं भ्रातरं दीप्ततेजसम्॥ **3.61.23**॥ 2002

प्राप्स्यसे त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम्।
यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम्॥ **3.61.24**॥ 2003

एवमुक्तस्तु वीरेण लक्ष्मणेन स राघवः।
उवाच दीनया वाचा दुःखाभिहतचेतनः॥ **3.61.25**॥ 2004

वनं सुविचितं सर्वं पद्मिन्यः फुल्लपङ्कजाः।
गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः।
नहि पश्यामि वैदेहीं प्राणेभ्योऽपि गरीयसीम्॥ **3.61.26**॥ 2005

एवं स विलपन् रामः सीताहरणकर्षितः।
दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत्॥ **3.61.27**॥ 2006

स विह्वलितसर्वाङ्गो गतबुद्धिर्विचेतनः।
निषसादातुरो दीनो निःश्वस्याशीतमायतम्॥ **3.61.28**॥ 2007

बहुशः स तु निःश्वस्य रामो राजीवलोचनः।
हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः॥ **3.61.29**॥ 2008

तं सान्त्वयामास ततो लक्ष्मणः प्रियबान्धवम्।
बहुप्रकारं शोकार्तः प्रश्रितः प्रश्रिताञ्जलिः॥ **3.61.30**॥ 2009

अनादृत्य तु तद् वाक्यं लक्ष्मणोष्ठपुटच्युतम्।
अपश्यंस्तां प्रियां सीतां प्राक्रोशत् स पुनः पुनः॥ **3.61.31**॥ 2010

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विषष्टितमः सर्गः ॥

श्रीरामस्य विलापः

सीतामपश्यन् धर्मात्मा शोकोपहतचेतनः।
विललाप महाबाहू रामः कमललोचनः॥ **3.62.1** ॥ 2011

पश्यन्निव च तां सीतामपश्यन्मन्मथार्दितः।
उवाच राघवो वाक्यं विलापाश्रयदुर्वचम्॥ **3.62.2** ॥ 2012

त्वमशोकस्य शाखाभिः पुष्पप्रियतरा प्रिये।
आवृणोषि शरीरं ते मम शोकविवर्धनी॥ **3.62.3** ॥ 2013

कदलीकाण्डसदृशौ कदल्या संवृतावुभौ।
ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम्॥ **3.62.4** ॥ 2014

कर्णिकारवनं भद्रे हसन्ती देवि सेवसे।
अलं ते परिहासेन मम बाधावहेन वै॥ **3.62.5** ॥ 2015

विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते।
अवगच्छामि ते शीलं परिहासप्रियं प्रिये॥ **3.62.6** ॥ 2016

आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव।
सुव्यक्तं राक्षसैः सीता भक्षिता वा हृतापि वा॥ **3.62.7** ॥ 2017

न हि सा विलपन्तं मामुपसम्प्रैति लक्ष्मण।
एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण॥ **3.62.8**॥ 2018

शंसन्तीव हि मे देवीं भक्षितां रजनीचरैः।
हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनि॥ **3.62.9**॥ 2019

हा सकामाद्य कैकेयी देवि मेऽद्य भविष्यति।
सीतया सह निर्यातो विना सीतामुपागतः॥ **3.62.10**॥ 2020

कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं मम।
निर्वीर्य इति लोको मां निर्दयश्चेति वक्ष्यति॥ **3.62.11**॥ 2021

कातरत्वं प्रकाशं हि सीतापनयनेन मे।
निवृत्तवनवासश्च जनकं मिथिलाधिपम्॥ **3.62.12**॥ 2022

कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम्।
विदेहराजो नूनं मां दृष्ट्वा विरहितं तया॥ **3.62.13**॥ 2023

सुताविनाशसन्तप्तो मोहस्य वशमेष्यति।
अथवा न गमिष्यामि पुरीं भरतपालिताम्॥ **3.62.14**॥ 2024

स्वर्गोऽपि हि तया हीनः शून्य एव मतो मम।
तन्मामुत्सृज्य हि वने गच्छायोध्यापुरीं शुभाम्॥ **3.62.15**॥ 2025

न त्वहं तां विना सीतां जीवेयं हि कथञ्चन।
गाढमाश्लिष्य भरतो वाच्यो मद्वचनात् त्वया॥ **3.62.16**॥ 2026

अनुज्ञातोऽसि रामेण पालयेति वसुन्धराम्।
अम्बा च मम कैकेयी सुमित्रा च त्वया विभो॥ **3.62.17**॥ 2027

कौसल्या च यथान्यायमभिवाद्या ममाज्ञया।
रक्षणीया प्रयत्नेन भवता सूक्तचारिणा॥ **3.62.18**॥ 2028

सीतायाश्च विनाशोऽयं मम चामित्रसूदन।
विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत्॥ **3.62.19**॥ 2029

इति विलपति राघवे तु दीने
वनमुपगम्य तया विना सुकेश्या।
भयविकलमुखस्तु लक्ष्मणोऽपि
व्यथितमना भृशमातुरो बभूव॥ **3.62.20**॥ 2030

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिषष्टितमः सर्गः ॥

श्रीरामस्य विलापः

स राजपुत्रः प्रियया विहीनः
शोकेन मोहेन च पीड्यमानः।
विषादयन् भ्रातरमार्तरूपो
भूयो विषादं प्रविवेश तीव्रम् ॥ **3.63.1** ॥ 2031

स लक्ष्मणं शोकवशाभिपन्नं
शोके निमग्नो विपुले तु रामः।
उवाच वाक्यं व्यसनानुरूप -
मुष्णं विनिःश्वस्य रुदन् सशोकम् ॥ **3.63.2** ॥ 2032

न मद्विधो दुष्कृतकर्मकारी
मन्ये द्वितीयोऽस्ति वसुन्धरायाम्।
शोकानुशोको हि परम्पराया
मामेति भिन्दन् हृदयं मनश्च ॥ **3.63.3** ॥ 2033

पूर्वं मया नूनमभीप्सितानि
पापानि कर्माण्यसकृत्कृतानि।
तत्रायमद्यापतितो विपाको
दुःखेन दुःखं यदहं विशामि ॥ **3.63.4** ॥ 2034

राज्यप्रणाशः स्वजनैर्वियोगः
पितुर्विनाशो जननीवियोगः।
सर्वाणि मे लक्ष्मण शोकवेग -
मापूरयन्ति प्रविचिन्तितानि॥ **3.63.5**॥ 2035

सर्वं तु दुःखं मम लक्ष्मणेदं
शान्तं शरीरे वनमेत्य शून्यम्।
सीतावियोगात् पुनरप्युदीर्णं
काष्ठैरिवाग्निः सहसोपदीप्तः॥ **3.63.6**॥ 2036

सा नूनमार्या मम राक्षसेन
ह्यभ्याहृता खं समुपेत्य भीरुः।
अपस्वरं सुस्वरविप्रलापा
भयेन विक्रन्दितवत्यभीक्ष्णम्॥ **3.63.7**॥ 2037

तौ लोहितस्य प्रियदर्शनस्य
सदोचितावुत्तमचन्दनस्य।
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ
नूनं प्रियाया मम नाभिपातः॥ **3.63.8**॥ 2038

तच्छ्लक्ष्णसुव्यक्तमृदुप्रलापं
तस्या मुखं कुञ्चितकेशभारम्।
रक्षोवशं नूनमुपागताया
न भ्राजते राहुमुखे यथेन्दुः॥ **3.63.9**॥ 2039

तां हारपाशस्य सदोचितान्तां
ग्रीवां प्रियाया मम सुव्रतायाः।
रक्षांसि नूनं परिपीतवन्ति
शून्ये हि भित्त्वा रुधिराशनानि॥ **3.63.10**॥ 2040

मया विहीना विजने वने सा
रक्षोभिराहृत्य विकृष्यमाणा।
नूनं विनादं कुररीव दीना
सा मुक्तवत्यायतकान्तनेत्रा॥ **3.63.11**॥ 2041

अस्मिन् मया सार्धमुदारशीला
शिलातले पूर्वमुपोपविष्टा।
कान्तस्मिता लक्ष्मण जातहासा
त्वामाह सीता बहुवाक्यजातम्॥ **3.63.12**॥ 2042

गोदावरीयं सरितां वरिष्ठा
प्रिया प्रियाया मम नित्यकालम्।
अप्यत्र गच्छेदिति चिन्तयामि
नैकाकिनी याति हि सा कदाचित्॥ **3.63.13**॥ 2043

पद्मानना पद्मपलाशनेत्रा
पद्मानि वानेतुमभिप्रयाता।
तदप्ययुक्तं नहि सा कदाचि -
न्मया विना गच्छति पङ्कजानि॥ **3.63.14**॥ 2044

कामं त्विदं पुष्पितवृक्षषण्डं
नानाविधैः पक्षिगणैरुपेतम्।
वनं प्रयाता नु तदप्ययुक्त -
मेकाकिनी सातिबिभेति भीरुः॥ **3.63.15**॥ 2045

आदित्य भो लोककृताकृतज्ञ
लोकस्य सत्यानृतकर्मसाक्षिन्।
मम प्रिया सा क्व गता हृता वा
शंसस्व मे शोकहतस्य सर्वम्॥ **3.63.16**॥ 2046

लोकेषु सर्वेषु न नास्ति किञ्चिद्
यत् ते न नित्यं विदितं भवेत् तत्।
शंसस्व वायो कुलपालिनीं तां
मृता हता वा पथि वर्तते वा॥ **3.63.17**॥ 2047

इतीव तं शोकविधेयदेहं
रामं विसंज्ञं विलपन्तमेव।
उवाच सौमित्रिरदीनसत्त्वो
न्याय्ये स्थितः कालयुतं च वाक्यम्॥ **3.63.18**॥ 2048

शोकं विसृज्याद्य धृतिं भजस्व
सोत्साहता चास्तु विमार्गणेऽस्याः।
उत्साहवन्तो हि नरा न लोके
सीदन्ति कर्मस्वतिदुष्करेषु॥ **3.63.19**॥ 2049

इतीव सौमित्रिमुदग्रपौरुषं
ब्रुवन्तमार्तो रघुवंशवर्धनः।
न चिन्तयामास धृतिं विमुक्तवान्
पुनश्च दुःखं महदभ्युपागमत्॥ **3.63.20**॥ 2050

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःषष्टितमः सर्गः ॥

श्रीरामलक्ष्मणाभ्यां भूयः सीताया अन्वेषणं श्रीरामस्य शोकोद्गारो मृगेभ्यः सङ्केतं प्राप्य द्वयोर्भ्रात्रोर्दक्षिणदिशां प्रति गमनम्, पर्वताय क्रोधः, सीताया विकीर्णानि पुष्पाणि भूषणानां कणान् युद्धस्य चिह्नानि चावलोक्य श्रीरामेण देवादिसहितां त्रिलोकीं प्रति स्वस्य रोषस्य प्रकटनम्

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत्।
शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम्॥ **3.64.1** ॥ 2051

अपि गोदावरीं सीता पद्मान्यानयितुं गता।
एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि॥ **3.64.2** ॥ 2052

नदीं गोदावरीं रम्यां जगाम लघुविक्रमः।
तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत्॥ **3.64.3** ॥ 2053

नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे।
कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी॥ **3.64.4** ॥ 2054

नहि तं वेद्मि वै राम यत्र सा तनुमध्यमा।
लक्ष्मणस्य वचः श्रुत्वा दीनः सन्तापमोहितः॥ **3.64.5** ॥ 2055

रामः समभिचक्राम स्वयं गोदावरीं नदीम्।
स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत्॥ **3.64.6** ॥ 2056

भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि।
न तां शशंसू रामाय तथा गोदावरी नदी॥ **3.64.7**॥ 2057

ततः प्रचोदिता भूतैः शंस चास्मै प्रियामिति।
न च सा ह्यवदत् सीतां पृष्टा रामेण शोचता॥ **3.64.8**॥ 2058

रावणस्य च तद्रूपं कर्मापि च दुरात्मनः।
ध्यात्वा भयात् तु वैदेहीं सा नदी न शशंस ह॥ **3.64.9**॥ 2059

निराशस्तु तया नद्या सीताया दर्शने कृतः।
उवाच रामः सौमित्रिं सीतादर्शनकर्शितः॥ **3.64.10**॥ 2060

एषा गोदावरी सौम्य किञ्चिन्न प्रतिभाषते।
किं नु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः॥ **3.64.11**॥ 2061

मातरं चैव वैदेह्या विना तामहमप्रियम्।
या मे राज्यविहीनस्य वने वन्येन जीवतः॥ **3.64.12**॥ 2062

सर्वं व्यपानयच्छोकं वैदेही क्व नु सा गता।
ज्ञातिवर्गविहीनस्य वैदेहीमप्यपश्यतः॥ **3.64.13**॥ 2063

मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः।
मन्दाकिनीं जनस्थानमिमं प्रस्रवणं गिरिम्॥ **3.64.14**॥ 2064

सर्वाण्यनुचरिष्यामि यदि सीता हि लभ्यते।
एते महामृगा वीर मामीक्षन्ते पुनः पुनः॥ **3.64.15**॥ 2065

वक्तुकामा इह हि मे इङ्गितान्युपलक्षये।
तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह॥ **3.64.16**॥ 2066

क्व सीतेति निरीक्षन् वै बाष्पसंरुद्धया गिरा।
एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः॥ **3.64.17**॥ 2067

दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभःस्थलम्।
मैथिली ह्रियमाणा सा दिशं यामभ्यपद्यत॥ **3.64.18**॥ 2068

तेन मार्गेण गच्छन्तो निरीक्षन्ते नराधिपम्।
येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः॥ **3.64.19**॥ 2069

पुनर्नदन्तो गच्छन्ति लक्ष्मणेनोपलक्षिताः।
तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम्॥ **3.64.20**॥ 2070

उवाच लक्ष्मणो धीमाञ्ज्येष्ठं भ्रातरमार्तवत्।
क्व सीतेति त्वया पृष्टा यथेमे सह सोत्थिताः॥ **3.64.21**॥ 2071

दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः।
साधु गच्छावहे देव दिशमेतां च नैर्ऋतीम्॥ **3.64.22**॥ 2072

यदि तस्यागमः कश्चिदार्या वा साथ लक्ष्यते।
बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम्॥ **3.64.23**॥ 2073

लक्ष्मणानुगतः श्रीमान् वीक्षमाणो वसुन्धराम्।
एवं सम्भाषमाणौ तावन्योन्यं भ्रातरावुभौ॥ **3.64.24**॥ 2074

वसुन्धरायां पतितपुष्पमार्गमपश्यताम्।
पुष्पवृष्टिं निपतितां दृष्ट्वा रामो महीतले॥ **3.64.25**॥ 2075

उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः।
अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण॥ **3.64.26**॥ 2076

अपिनद्धानि वैदेह्या मया दत्तानि कानने।
मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी॥ **3.64.27**॥ 2077

अभिरक्षन्ति पुष्पाणि प्रकुर्वन्तो मम प्रियम्।
एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभम्॥ **3.64.28**॥ 2078

उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलम्।
कच्चित् क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी॥ **3.64.29**॥ 2079

रामा रम्ये वनोद्देशे मया विरहिता त्वया।
क्रुद्धोऽब्रवीद् गिरिं तत्र सिंहः क्षुद्रमृगं यथा॥ **3.64.30**॥ 2080

तां हेमवर्णां हेमाङ्गीं सीतां दर्शय पर्वत।
यावत् सानूनि सर्वाणि न ते विध्वंसयाम्यहम्॥ **3.64.31**॥ 2081

एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति।
दर्शयन्निव तां सीतां नादर्शयत राघवे॥ **3.64.32**॥ 2082

ततो दाशरथी राम उवाच च शिलोच्चयम्।
मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि॥ **3.64.33**॥ 2083

असेव्यः सर्वतश्चैव निस्तृणद्रुमपल्लवः।
इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण॥ **3.64.34**॥ 2084

यदि नाख्याति मे सीतामद्य चन्द्रनिभाननाम्।
एवं प्ररुषितो रामो दिधक्षन्निव चक्षुषा॥ **3.64.35**॥ 2085

ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत्।
त्रस्ताया रामकाङ्क्षिण्याः प्रधावन्त्या इतस्ततः॥ **3.64.36**॥ 2086

राक्षसेनानुसृप्ताया वैदेह्याश्च पदानि तु।
स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च॥ **3.64.37**॥ 2087

भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम्।
सभ्भ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम्॥ **3.64.38**॥ 2088

पश्य लक्ष्मण वैदेह्या कीर्णाः कनकबिन्दवः।
भूषणानां हि सौमित्रे माल्यानि विविधानि च॥ **3.64.39**॥ 2089

तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः।
आवृतं पश्य सौमित्रे सर्वतो धरणीतलम्॥ **3.64.40**॥ 2090

मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः।
भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति॥ **3.64.41**॥ 2091

तस्या निमित्तं सीताया द्वयोर्विवदमानयोः।
बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह॥ **3.64.42**॥ 2092

मुक्तामणिचितं चेदं रमणीयं विभूषितम्।
धरण्यां पतितं सौम्य कस्य भग्नं महद् धनुः॥ **3.64.43**॥ 2093

राक्षसानामिदं वत्स सुराणामथवापि वा।
तरुणादित्यसङ्काशं वैदूर्यगुलिकाचितम्॥ **3.64.44**॥ 2094

विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम्।
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम्॥ **3.64.45**॥ 2095

भग्नदण्डमिदं सौम्य भूमौ कस्य निपातितम्।
काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः॥ **3.64.46**॥ 2096

भीमरूपा महाकायाः कस्य वा निहता रणे।
दीप्तपावकसङ्काशो द्युतिमान् समरध्वजः॥ **3.64.47**॥ 2097

अपविद्धश्च भग्नश्च कस्य साङ्ग्रामिको रथः।
रथाक्षमात्रा विशिखास्तपनीयविभूषणाः॥ **3.64.48**॥ 2098

कस्येमे निहता बाणाः प्रकीर्णा घोरदर्शनाः।
शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण॥ **3.64.49**॥ 2099

प्रतोदाभीषुहस्तोऽयं कस्य वा सारथिर्हतः।
पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः॥ **3.64.50**॥ 2100

वैरं शतगुणं पश्य मम तैर्जीवितान्तकम्।
सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः॥ **3.64.51**॥ 2101

हृता मृता वा वैदेही भक्षिता वा तपस्विनी।
न धर्मस्त्रायते सीतां ह्रियमाणां महावने॥ **3.64.52**॥ 2102

भक्षितायां हि वैदेह्यां हृतायामपि लक्ष्मण।
के हि लोके प्रियं कर्तुं शक्ताः सौम्य ममेश्वराः॥ **3.64.53**॥ 2103

कर्तारमपि लोकानां शूरं करुणवेदिनम्।
अज्ञानादवमन्येरन् सर्वभूतानि लक्ष्मण॥ **3.64.54**॥ 2104

मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम्।
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः॥ **3.64.55**॥ 2105

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण।
अद्यैव सर्वभूतानां रक्षसामभवाय च॥ **3.64.56**॥ 2106

संहृत्यैव शशिज्योत्स्नां महान् सूर्य इवोदितः।
संहृत्यैव गुणान् सर्वान् मम तेजः प्रकाशते॥ **3.64.57**॥ 2107

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः।
किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण॥ **3.64.58**॥ 2108

ममास्त्रबाणसम्पूर्णमाकाशं पश्य लक्ष्मण।
असम्पातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम्॥ **3.64.59**॥ 2109

सन्निरुद्धग्रहगणमावारितनिशाकरम्।
विप्रणष्टानलमरुद्धास्करद्युतिसंवृतम्॥ **3.64.60**॥ 2110

विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम्।
ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम्॥ **3.64.61**॥ 2111

त्रैलोक्यं तु करिष्यामि संयुक्तं कालकर्मणा।
न ते कुशलिनीं सीतां प्रदास्यन्ति ममेश्वराः॥ **3.64.62**॥ 2112

अस्मिन् मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम्।
नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण॥ **3.64.63**॥ 2113

मम चापगुणोन्मुक्तैर्बाणजालैर्निरन्तरम्।
मर्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजम्॥ **3.64.64**॥ 2114

समाकुलममर्यादं जगत् पश्याद्य लक्ष्मण।
आकर्णपूर्णैरिषुभिर्जीवलोकदुरावरैः॥ **3.64.65**॥ 2115

करिष्ये मैथिलीहेतोरपिशाचमराक्षसम्।
मम रोषप्रयुक्तानां विशिखानां बलं सुराः॥ **3.64.66**॥ 2116

द्रक्ष्यन्त्यद्य विमुक्तानाममर्षाद् दूरगामिनाम्।
नैव देवा न दैतेया न पिशाचा न राक्षसाः॥ **3.64.67**॥ 2117

भविष्यन्ति मम क्रोधात् त्रैलोक्ये विप्रणाशिते।
देवदानवयक्षाणां लोका ये रक्षसामपि॥ **3.64.68**॥ 2118

बहुधा निपतिष्यन्ति बाणौघैः शकलीकृताः।
निर्मर्यादानिमान् लोकान् करिष्याम्यद्य सायकैः॥ **3.64.69**॥ 2119

हृतां मृतां वा सौमित्रे न दास्यन्ति ममेश्वराः।
तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम्॥ **3.64.70**॥ 2120

नाशयामि जगत् सर्वं त्रैलोक्यं सचराचरम्।
यावद् दर्शनमस्या वै तापयामि च सायकैः॥ **3.64.71**॥ 2121

इत्युक्त्वा क्रोधताम्राक्षः स्फुरमाणोष्ठसम्पुटः।
वल्कलाजिनमाबद्ध्य जटाभारमबन्धयत्॥ **3.64.72**॥ 2122

तस्य क्रुद्धस्य रामस्य तथाभूतस्य धीमतः।
त्रिपुरं जघ्नुषः पूर्वं रुद्रस्येव बभौ तनुः॥ **3.64.73**॥ 2123

लक्ष्मणादथ चादाय रामो निष्पीड्य कार्मुकम्।
शरमादाय सन्दीप्तं घोरमाशीविषोपमम्॥ **3.64.74**॥ 2124

सन्दधे धनुषि श्रीमान् रामः परपुरञ्जयः।
युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत्॥ **3.64.75**॥ 2125

यथा जरा यथा मृत्युर्यथा कालो यथा विधिः।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण।
तथाहं क्रोधसंयुक्तो न निवार्योऽस्म्यसंशयम्॥ **3.64.76**॥ 2126

पुरेव मे चारुदतीमनिन्दितां
दिशन्ति सीतां यदि नाद्य मैथिलीम्।
सदेवगन्धर्वमनुष्यपन्नगं
जगत् सशैलं परिवर्तयाम्यहम्॥ **3.64.77**॥ 2127

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चषष्टितमः सर्गः ॥

लक्ष्मणेन श्रीरामस्य प्रबोधनं तदीयशोकस्य प्रशमनं च

तप्यमानं तदा रामं सीताहरणकर्शितम्।
लोकानामभवे युक्तं सांवर्तकमिवानलम्॥ **3.65.1** ॥ 2128

वीक्षमाणं धनुः सज्यं निःश्वसन्तं पुनः पुनः।
दग्धुकामं जगत् सर्वं युगान्ते च यथा हरम्॥ **3.65.2** ॥ 2129

अदृष्टपूर्वं सङ्क्रुद्धं दृष्ट्वा रामं स लक्ष्मणः।
अब्रवीत् प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता॥ **3.65.3** ॥ 2130

पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः।
न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि॥ **3.65.4** ॥ 2131

चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा।
एतच्च नियतं नित्यं त्वयि चानुत्तमं यशः॥ **3.65.5** ॥ 2132

एकस्य नापराधेन लोकान् हन्तुं त्वमर्हसि।
ननु जानामि कस्यायं भग्नः साङ्ग्रामिको रथः॥ **3.65.6** ॥ 2133

केन वा कस्य वा हेतोः सयुगः सपरिच्छदः।
खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः॥ **3.65.7** ॥ 2134

देशो निर्वृत्तसङ्ग्रामः सुघोरः पार्थिवात्मज।
एकस्य तु विमर्दोऽयं न द्वयोर्वदतां वर॥ **3.65.8**॥ 2135

नहि वृत्तं हि पश्यामि बलस्य महतः पदम्।
नैकस्य तु कृते लोकान् विनाशयितुमर्हसि॥ **3.65.9**॥ 2136

युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः।
सदा त्वं सर्वभूतानां शरण्यः परमा गतिः॥ **3.65.10**॥ 2137

को नु दारप्रणाशं ते साधु मन्येत राघव।
सरितः सागराः शैला देवगन्धर्वदानवाः॥ **3.65.11**॥ 2138

नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः।
येन राजन् हृता सीता तमन्वेषितुमर्हसि॥ **3.65.12**॥ 2139

मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः।
समुद्रं वा विचेष्यामः पर्वतांश्च वनानि च॥ **3.65.13**॥ 2140

गुहाश्च विविधा घोराः पद्मिन्यो विविधास्तथा।
देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः॥ **3.65.14**॥ 2141

यावन्नाधिगमिष्यामस्तव भार्यापहारिणम्।
न चेत् साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः।
कोसलेन्द्र ततः पश्चात् प्राप्तकालं करिष्यसि॥ **3.65.15**॥ 2142

शीलेन साम्ना विनयेन सीतां
नयेन न प्राप्स्यसि चेन्नरेन्द्र।
ततः समुत्सादय हेमपुङ्खै -
र्महेन्द्रवज्रप्रतिमैः शरौघैः॥ **3.65.16**॥ 2143

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्षष्टितमः सर्गः ॥

लक्ष्मणेन श्रीरामस्य प्रबोधनम्

तं तथा शोकसन्तप्तं विलपन्तमनाथवत्।
मोहेन महता युक्तं परिद्यूनमचेतसम्॥ **3.66.1** ॥ 2144

ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः।
रामं सम्बोधयामास चरणौ चाभिपीडयन्॥ **3.66.2** ॥ 2145

महता तपसा चापि महता चापि कर्मणा।
राज्ञा दशरथेनासील्लब्धोऽमृतमिवामरैः॥ **3.66.3** ॥ 2146

तव चैव गुणैर्बद्धस्त्वद्वियोगान्महीपतिः।
राजा देवत्वमापन्नो भरतस्य यथा श्रुतम्॥ **3.66.4** ॥ 2147

यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे।
प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति॥ **3.66.5** ॥ 2148

आश्वसिहि नरश्रेष्ठ प्राणिनः कस्य नापदः।
संस्पृशन्त्यग्निवद् राजन् क्षणेन व्यपयान्ति च॥ **3.66.6** ॥ 2149

दुःखितो हि भवान् लोकांस्तेजसा यदि धक्ष्यते।
आर्ताः प्रजा नरव्याघ्र क्व नु यास्यन्ति निर्वृतिम्॥ **3.66.7** ॥ 2150

लोकस्वभाव एवैष ययातिर्नहुषात्मजः।
गतः शक्रेण सालोक्यमनयस्तं समस्पृशत्॥ **3.66.8**॥ 2151

महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः।
अह्ना पुत्रशतं जज्ञे तथैवास्य पुनर्हतम्॥ **3.66.9**॥ 2152

या चेयं जगतो माता सर्वलोकनमस्कृता।
अस्याश्च चलनं भूमेर्दृश्यते कोसलेश्वर॥ **3.66.10**॥ 2153

यौ धर्मौ जगतो नेत्रौ यत्र सर्वं प्रतिष्ठितम्।
आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ॥ **3.66.11**॥ 2154

सुमहान्त्यपि भूतानि देवाश्च पुरुषर्षभ।
न दैवस्य प्रमुञ्चन्ति सर्वभूतानि देहिनः॥ **3.66.12**॥ 2155

शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ।
श्रूयेते नरशार्दूल न त्वं शोचितुमर्हसि॥ **3.66.13**॥ 2156

मृतायामपि वैदेह्यां नष्टायामपि राघव।
शोचितुं नार्हसे वीर यथान्यः प्राकृतस्तथा॥ **3.66.14**॥ 2157

त्वद्विधा नहि शोचन्ति सततं सर्वदर्शनाः।
सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः॥ **3.66.15**॥ 2158

तत्त्वतो हि नरश्रेष्ठ बुद्ध्या समनुचिन्तय।
बुद्ध्या युक्ता महाप्राज्ञा विजानन्ति शुभाशुभे॥ **3.66.16**॥ 2159

अदृष्टगुणदोषाणामध्रुवाणां तु कर्मणाम्।
नान्तरेण क्रियां तेषां फलमिष्टं च वर्तते॥ **3.66.17**॥ 2160

मामेवं हि पुरा वीर त्वमेव बहुशोक्तवान्।
अनुशिष्याद्धि को नु त्वामपि साक्षाद् बृहस्पतिः॥ **3.66.18**॥ 2161

बुद्धिश्च ते महाप्राज्ञ देवैरपि दुरन्वया।
शोकेनाभिप्रसुप्तं ते ज्ञानं सम्बोधयाम्यहम्॥ **3.66.19**॥ 2162

दिव्यं च मानुषं चैवमात्मनश्च पराक्रमम्।
इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे॥ **3.66.20**॥ 2163

किं ते सर्वविनाशेन कृतेन पुरुषर्षभ।
तमेव तु रिपुं पापं विज्ञायोद्धर्तुमर्हसि॥ **3.66.21**॥ 2164

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षट्षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तषष्टितमः सर्गः ॥

श्रीरामलक्ष्मणकर्तृकं जटायुषो दर्शनं श्रीरामस्य तमाश्लिष्य रोदनम्

पूर्वजोऽप्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम्।
सारग्राही महासारं प्रतिजग्राह राघवः॥ **3.67.1** ॥ 2165

स निगृह्य महाबाहुः प्रवृद्धं रोषमात्मनः।
अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत्॥ **3.67.2** ॥ 2166

किं करिष्यावहे वत्स क्व वा गच्छाव लक्ष्मण।
केनोपायेन पश्यावः सीतामिह विचिन्तय॥ **3.67.3** ॥ 2167

तं तथा परितापार्तं लक्ष्मणो वाक्यमब्रवीत्।
इदमेव जनस्थानं त्वमन्वेषितुमर्हसि॥ **3.67.4** ॥ 2168

राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम्।
सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च॥ **3.67.5** ॥ 2169

गुहाश्च विविधा घोरा नानामृगगणाकुलाः।
आवासाः किन्नराणां च गन्धर्वभवनानि च॥ **3.67.6** ॥ 2170

तानि युक्तो मया सार्धं समन्वेषितुमर्हसि।
त्वद्विधा बुद्धिसम्पन्ना महात्मानो नरर्षभाः॥ **3.67.7** ॥ 2171

आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः।
इत्युक्तस्तद् वनं सर्वं विचचार सलक्ष्मणः॥ **3.67.8**॥ 2172

क्रुद्धो रामः शरं घोरं सन्धाय धनुषि क्षुरम्।
ततः पर्वतकूटाभं महाभागं द्विजोत्तमम्॥ **3.67.9**॥ 2173

ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम्।
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत्॥ **3.67.10**॥ 2174

अनेन सीता वैदेही भक्षिता नात्र संशयः।
गृध्ररूपमिदं व्यक्तं रक्षो भ्रमति काननम्॥ **3.67.11**॥ 2175

भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम्।
एनं वधिष्ये दीप्ताग्रैः शरैर्घोरैरजिह्मगैः॥ **3.67.12**॥ 2176

इत्युक्त्वाभ्यपतद् द्रष्टुं सन्धाय धनुषि क्षुरम्।
क्रुद्धो रामः समुद्रान्तां चालयन्निव मेदिनीम्॥ **3.67.13**॥ 2177

तं दीनदीनया वाचा सफेनं रुधिरं वमन्।
अभ्यभाषत पक्षी स रामं दशरथात्मजम्॥ **3.67.14**॥ 2178

यामोषधीमिवायुष्मन्नन्वेषसि महावने।
सा देवी मम च प्राणा रावणेनोभयं हृतम्॥ **3.67.15**॥ 2179

त्वया विरहिता देवी लक्ष्मणेन च राघव।
ह्रियमाणा मया दृष्टा रावणेन बलीयसा॥ **3.67.16**॥ 2180

सीतामभ्यवपन्नोऽहं रावणश्च रणे प्रभो।
विध्वंसितरथच्छत्रः पतितो धरणीतले॥ **3.67.17**॥ 2181

एतदस्य धनुर्भग्नमेते चास्य शरास्तथा।
अयमस्य रणे राम भग्नः साङ्ग्रामिको रथः॥ **3.67.18**॥ 2182

अयं तु सारथिस्तस्य मत्पक्षनिहतो भुवि।
परिश्रान्तस्य मे पक्षौ छित्त्वा खड्गेन रावणः॥ **3.67.19**॥ 2183

सीतामादाय वैदेहीमुत्पपात विहायसम्।
रक्षसा निहतं पूर्वं मां न हन्तुं त्वमर्हसि॥ **3.67.20**॥ 2184

रामस्तस्य तु विज्ञाय सीतासक्तां प्रियां कथाम्।
गृध्रराजं परिष्वज्य परित्यज्य महद् धनुः॥ **3.67.21**॥ 2185

निपपातावशो भूमौ रुरोद सहलक्ष्मणः।
द्विगुणीकृततापार्तो रामो धीरतरोऽपि सन्॥ **3.67.22**॥ 2186

एकमेकायने कृच्छ्रे निःश्वसन्तं मुहर्मुहुः।
समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत्॥ **3.67.23**॥ 2187

राज्यं भ्रष्टं वने वासः सीता नष्टा मृतो द्विजः।
ईदृशीयं ममालक्ष्मीर्दहेदपि हि पावकम्॥ **3.67.24**॥ 2188

सम्पूर्णमपि चेदद्य प्रतरेयं महोदधिम्।
सोऽपि नूनं ममालक्ष्म्या विशुष्येत् सरितां पतिः॥ **3.67.25**॥ 2189

नास्त्यभाग्यतरो लोके मत्तोऽस्मिन् स चराचरे।
येनेयं महती प्राप्ता मया व्यसनवागुरा॥ **3.67.26**॥ 2190

अयं पितुर्वयस्यो मे गृध्रराजो महाबलः।
शेते विनिहतो भूमौ मम भाग्यविपर्ययात्॥ **3.67.27**॥ 2191

इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः।
जटायुषं च पस्पर्श पितृस्नेहं निदर्शयन्॥ **3.67.28**॥ 2192

निकृत्तपक्षं रुधिरावसिक्तं
तं गृध्रराजं परिगृह्य रामः।

क्व मैथिली प्राणसमा गतेति
विमुच्य वाचं निपपात भूमौ ॥ 3.67.29 ॥ 2193

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टषष्टितमः सर्गः ॥

जटायुषा प्राणानां परित्यागः श्रीरामकर्तृकस्तस्य दाहसंस्कारश्च

रामः प्रेक्ष्य तु तं गृध्रं भुवि रौद्रेण पातितम्।
सौमित्रिं मित्रसम्पन्नमिदं वचनमब्रवीत्॥ **3.68.1**॥ 2194

ममायं नूनमर्थेषु यतमानो विहङ्गमः।
राक्षसेन हतः सङ्ख्ये प्राणांस्त्यजति मत्कृते॥ **3.68.2**॥ 2195

अतिखिन्नः शरीरेऽस्मिन् प्राणो लक्ष्मण विद्यते।
तथा स्वरविहीनोऽयं विक्लवं समुदीक्षते॥ **3.68.3**॥ 2196

जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः।
सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः॥ **3.68.4**॥ 2197

किन्निमित्तो जहारार्यां रावणस्तस्य किं मया।
अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया॥ **3.68.5**॥ 2198

कथं तच्चन्द्रसङ्काशं मुखमासीन्मनोहरम्।
सीतया कानि चोक्तानि तस्मिन् काले द्विजोत्तम॥ **3.68.6**॥ 2199

कथंवीर्यः कथंरूपः किङ्कर्मा स च राक्षसः।
क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः॥ **3.68.7**॥ 2200

तमुद्वीक्ष्य स धर्मात्मा विलपन्तमनाथवत्।
वाचा विक्लवया राममिदं वचनमब्रवीत्॥ **3.68.8**॥ 2201

सा हृता राक्षसेन्द्रेण रावणेन दुरात्मना।
मायामास्थाय विपुलां वातदुर्दिनसङ्कुलाम्॥ **3.68.9**॥ 2202

परिक्लान्तस्य मे तात पक्षौ छित्त्वा निशाचरः।
सीतामादाय वैदेहीं प्रयातो दक्षिणामुखः॥ **3.68.10**॥ 2203

उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव।
पश्यामि वृक्षान् सौवर्णानुशीरकृतमूर्धजान्॥ **3.68.11**॥ 2204

येन याति मुहूर्तेन सीतामादाय रावणः।
विप्रणष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते॥ **3.68.12**॥ 2205

विन्दो नाम मुहूर्तोऽसौ न च काकुत्स्थ सोऽबुधत्।
त्वत्प्रियां जानकीं हत्वा रावणो राक्षसेश्वरः।
झषवद् बडिशं गृह्य क्षिप्रमेव विनश्यति॥ **3.68.13**॥ 2206

न च त्वया व्यथा कार्या जनकस्य सुतां प्रति।
वैदेह्या रंस्यसे क्षिप्रं हत्वा तं रणमूर्धनि॥ **3.68.14**॥ 2207

असम्मूढस्य गृध्रस्य रामं प्रत्यनुभाषतः।
आस्यात् सुस्राव रुधिरं म्रियमाणस्य सामिषम्॥ **3.68.15**॥ 2208

पुत्रो विश्रवसः साक्षाद् भ्राता वैश्रवणस्य च।
इत्युक्त्वा दुर्लभान् प्राणान् मुमोच पतगेश्वरः॥ **3.68.16**॥ 2209

ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः।
त्यक्त्वा शरीरं गृध्रस्य प्राणा जग्मुर्विहायसम्॥ **3.68.17**॥ 2210

स निक्षिप्य शिरौ भूमौ प्रसार्य चरणौ तथा।
विक्षिप्य च शरीरं स्वं पपात धरणीतले॥ **3.68.18**॥ 2211

तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम्।
रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत्॥ **3.68.19**॥ 2212

बहूनि रक्षसां वासे वर्षाणि वसता सुखम्।
अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा॥ **3.68.20**॥ 2213

अनेकवार्षिको यस्तु चिरकालसमुत्थितः।
सोऽयमद्य हतः शेते कालो हि दुरतिक्रमः॥ **3.68.21**॥ 2214

पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे।
सीतामभ्यवपन्नो हि रावणेन बलीयसा॥ **3.68.22**॥ 2215

गृध्रराज्यं परित्यज्य पितृपैतामहं महत्।
मम हेतोरयं प्राणान् मुमोच पतगेश्वरः॥ **3.68.23**॥ 2216

सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः।
शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि॥ **3.68.24**॥ 2217

सीताहरणजं दुःखं न मे सौम्य तथागतम्।
यथा विनाशो गृध्रस्य मत्कृते च परन्तप॥ **3.68.25**॥ 2218

राजा दशरथः श्रीमान् यथा मम महायशाः।
पूजनीयश्च मान्यश्च तथायं पतगेश्वरः॥ **3.68.26**॥ 2219

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम्।
गृध्रराजं दिधक्ष्यामि मत्कृते निधनं गतम्॥ **3.68.27**॥ 2220

नाथं पतगलोकस्य चितिमारोपयाम्यहम्।
इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा॥ **3.68.28**॥ 2221

या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः।
अपरावर्तिनां या च या च भूमिप्रदायिनाम्॥ **3.68.29**॥ 2222

मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्।
गृध्रराज महासत्त्व संस्कृतश्च मया व्रज॥ **3.68.30**॥ 2223

एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम्।
ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः॥ **3.68.31**॥ 2224

रामोऽथ सहसौमित्रिर्वनं गत्वा स वीर्यवान्।
स्थूलान् हत्वा महारोहीननुतस्तार तं द्विजम्॥ **3.68.32**॥ 2225

रोहिमांसानि चोद्धृत्य पेशीकृत्वा महायशाः।
शकुनाय ददौ रामो रम्ये हरितशाद्वले॥ **3.68.33**॥ 2226

यत् तत् प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः।
तत् स्वर्गगमनं पित्र्यं तस्य रामो जजाप ह॥ **3.68.34**॥ 2227

ततो गोदावरीं गत्वा नदीं नरवरात्मजौ।
उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ॥ **3.68.35**॥ 2228

शास्त्रदृष्टेन विधिना जलं गृध्राय राघवौ।
स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा॥ **3.68.36**॥ 2229

स गृध्रराजः कृतवान् यशस्करं
सुदुष्करं कर्म रणे निपातितः।
महर्षिकल्पेन च संस्कृतस्तदा
जगाम पुण्यां गतिमात्मनः शुभाम्॥ **3.68.37**॥ 2230

कृतोदको तावपि पक्षिसत्तमे
स्थिरां च बुद्धिं प्रणिधाय जग्मतुः।

प्रवेश्य सीताधिगमे ततो मनो
वनं सुरेन्द्राविव विष्णुवासवौ ॥ **3.68.38** ॥ 2231

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनसप्ततितमः सर्गः ॥

लक्ष्मणेनायोमुख्यै दण्डदानं कबन्धस्य बाहुबन्धे प्रविष्टयोः श्रीरामलक्ष्मणयोश्चिन्ता

कृत्वैवमुदकं तस्मै प्रस्थितौ राघवौ तदा।
अवेक्षन्तौ वने सीतां जग्मतुः पश्चिमां दिशम्॥ **3.69.1** ॥ 2232

तां दिशं दक्षिणां गत्वा शरचापासिधारिणौ।
अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः॥ **3.69.2** ॥ 2233

गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितम्।
आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम्॥ **3.69.3** ॥ 2234

व्यतिक्रम्य तु वेगेन गृहीत्वा दक्षिणां दिशम्।
सुभीमं तन्महारण्यं व्यतियातौ महाबलौ॥ **3.69.4** ॥ 2235

ततः परं जनस्थानात् त्रिकोशं गम्य राघवौ।
क्रौञ्चारण्यं विविशतुर्गहनं तौ महौजसौ॥ **3.69.5** ॥ 2236

नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः।
नानावर्णैः शुभैः पुष्पैर्मृगपक्षिगणैर्युतम्॥ **3.69.6** ॥ 2237

दिदृक्षमाणौ वैदेहीं तद् वनं तौ विचिक्यतुः।
तत्र तत्रावतिष्ठन्तौ सीताहरणदुःखितौ॥ **3.69.7** ॥ 2238

ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा।
क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रममन्तरे॥ **3.69.8**॥ 2239

दृष्ट्वा तु तद् वनं घोरं बहुभीममृगद्विजम्।
नानावृक्षसमाकीर्णं सर्वं गहनपादपम्॥ **3.69.9**॥ 2240

ददृशाते गिरौ तत्र दरीं दशरथात्मजौ।
पातालसमगम्भीरां तमसा नित्यसंवृताम्॥ **3.69.10**॥ 2241

आसाद्य च नरव्याघ्रौ दर्यास्तस्याविदूरतः।
ददर्शतुर्महारूपां राक्षसीं विकृताननाम्॥ **3.69.11**॥ 2242

भयदामल्पसत्त्वानां बीभत्सां रौद्रदर्शनाम्।
लम्बोदरीं तीक्ष्णदंष्ट्रां करालीं परुषत्वचम्॥ **3.69.12**॥ 2243

भक्षयन्तीं मृगान् भीमान् विकटां मुक्तमूर्धजाम्।
अवैक्षतां तु तौ तत्र भ्रातरौ रामलक्ष्मणौ॥ **3.69.13**॥ 2244

सा समासाद्य तौ वीरौ व्रजन्तं भ्रातुरग्रतः।
एहि रंस्यावहेत्युक्त्वा समालम्भत लक्ष्मणम्॥ **3.69.14**॥ 2245

उवाच चैनं वचनं सौमित्रिमुपगुह्य च।
अहं त्वयोमुखी नाम लाभस्ते त्वमसि प्रियः॥ **3.69.15**॥ 2246

नाथ पर्वतदुर्गेषु नदीनां पुलिनेषु च।
आयुश्चिरमिदं वीर त्वं मया सह रंस्यसे॥ **3.69.16**॥ 2247

एवमुक्तस्तु कुपितः खड्गमुद्धृत्य लक्ष्मणः।
कर्णनासस्तनं तस्या निचकर्तारिसूदनः॥ **3.69.17**॥ 2248

कर्णनासे निकृत्ते तु विस्वरं विननाद सा।
यथागतं प्रदुद्राव राक्षसी घोरदर्शना॥ **3.69.18**॥ 2249

तस्यां गतायां गहनं व्रजन्तौ वनमोजसा।
आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ॥ **3.69.19**॥ 2250

लक्ष्मणस्तु महातेजाः सत्त्ववाञ्छीलवाञ्छुचिः।
अब्रवीत् प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम्॥ **3.69.20**॥ 2251

स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः।
प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये॥ **3.69.21**॥ 2252

तस्मात् सज्जीभवार्य त्वं कुरुष्व वचनं मम।
ममैव हि निमित्तानि सद्यः शंसन्ति सभ्रमम्॥ **3.69.22**॥ 2253

एष वञ्जुलको नाम पक्षी परमदारुणः।
आवयोर्विजयं युद्धे शंसन्निव विनर्दति॥ **3.69.23**॥ 2254

तयोरन्वेषतोरेवं सर्वं तद् वनमोजसा।
सञ्जज्ञे विपुलः शब्दः प्रभञ्जन्निव तद् वनम्॥ **3.69.24**॥ 2255

संवेष्टितमिवात्यर्थं गहनं मातरिश्वना।
वनस्य तस्य शब्दोऽभूद् वनमापूरयन्निव॥ **3.69.25**॥ 2256

तं शब्दं काङ्क्षमाणस्तु रामः खड्गी सहानुजः।
ददर्श सुमहाकायं राक्षसं विपुलोरसम्॥ **3.69.26**॥ 2257

आसेदतुश्च तद्रक्षस्तावुभौ प्रमुखे स्थितम्।
विवृद्धमशिरोग्रीवं कबन्धमुदरेमुखम्॥ **3.69.27**॥ 2258

रोमभिर्निशितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितम्।
नीलमेघनिभं रौद्रं मेघस्तनितनिःस्वनम्॥ **3.69.28**॥ 2259

अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता।
महापक्षेण पिङ्गेन विपुलेनायतेन च॥ **3.69.29**॥ 2260

एकेनोरसि घोरेण नयनेन सुदर्शिना।
महादंष्ट्रोपपन्नं तं लेलिहानं महामुखम्॥ **3.69.30**॥ 2261

भक्षयन्तं महाघोरानृक्षसिंहमृगद्विजान्।
घोरौ भुजौ विकुर्वाणमुभौ योजनमायतौ॥ **3.69.31**॥ 2262

कराभ्यां विविधान् गृह्य ऋक्षान् पक्षिगणान् मृगान्।
आकर्षन्तं विकर्षन्तमनेकान् मृगयूथपान्॥ **3.69.32**॥ 2263

स्थितमावृत्य पन्थानं तयोर्भ्रात्रोः प्रपन्नयोः।
अथ तं समतिक्रम्य क्रोशमात्रं ददर्शतुः॥ **3.69.33**॥ 2264

महान्तं दारुणं भीमं कबन्धं भुजसंवृतम्।
कबन्धमिव संस्थानादतिघोरप्रदर्शनम्॥ **3.69.34**॥ 2265

स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ।
जग्राह सहितावेव राघवौ पीडयन् बलात्॥ **3.69.35**॥ 2266

खड्गिनौ दृढधन्वानौ तिग्मतेजौ महाभुजौ।
भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ॥ **3.69.36**॥ 2267

तत्र धैर्याच्च शूरस्तु राघवौ नैव विव्यथे।
बाल्यादनाश्रयाच्चैव लक्ष्मणस्त्वभिविव्यथे॥ **3.69.37**॥ 2268

उवाच च विषण्णः सन् राघवं राघवानुजः।
पश्य मां विवशं वीर राक्षसस्य वशङ्गतम्॥ **3.69.38**॥ 2269

मयैकेन तु निर्युक्तः परिमुच्यस्व राघव।
मां हि भूतबलिं दत्त्वा पलायस्व यथासुखम्॥ **3.69.39**॥ 2270

अधिगन्तासि वैदेहीमचिरेणेति मे मतिः।
प्रतिलभ्य च काकुत्स्थ पितृपैतामहीं महीम्॥ **3.69.40**॥ 2271

तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा।
लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत्॥ **3.69.41**॥ 2272

मा स्म त्रासं वृथा वीर नहि त्वादृग् विषीदति।
एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ॥ **3.69.42**॥ 2273

तावुवाच महाबाहुः कबन्धो दानवोत्तमः।
कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ॥ **3.69.43**॥ 2274

घोरं देशमिमं प्राप्तौ दैवेन मम चाक्षुषौ।
वदतं कार्यमिह वां किमर्थं चागतौ युवाम्॥ **3.69.44**॥ 2275

इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः।
सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ॥ **3.69.45**॥ 2276

मां तूर्णमनुसम्प्राप्तौ दुर्लभं जीवितं हि वाम्।
तस्य तद् वचनं श्रुत्वा कबन्धस्य दुरात्मनः॥ **3.69.46**॥ 2277

उवाच लक्ष्मणं रामो मुखेन परिशुष्यता।
कृच्छ्रात् कृच्छ्रतरं प्राप्य दारुणं सत्यविक्रम॥ **3.69.47**॥ 2278

व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम्।
कालस्य सुमहद् वीर्यं सर्वभूतेषु लक्ष्मण॥ **3.69.48**॥ 2279

त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ।
नहि भारोऽस्ति दैवस्य सर्वभूतेषु लक्ष्मण॥ **3.69.49**॥ 2280

शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे।
कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः॥ **3.69.50**॥ 2281

इति ब्रुवाणो दृढसत्यविक्रमो
महायशा दाशरथिः प्रतापवान्।

अवेक्ष्य सौमित्रिमुदग्रविक्रमः
स्थिरां तदा स्वां मतिमात्मनाकरोत्॥ 3.69.51॥ 2282

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकोनसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ततितमः सर्गः ॥

मिथो विचार्य श्रीरामलक्ष्मणाभ्यां कबन्धभुजयोश्छेदनं कबन्धेन तयोः सत्कारश्च

तौ तु तत्र स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ।
बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत्॥ **3.70.1** ॥ 2283

तिष्ठतः किं नु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ।
आहारार्थं तु सन्दिष्टौ दैवेन हतचेतनौ॥ **3.70.2** ॥ 2284

तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा।
उवाचार्तिसमापन्नो विक्रमे कृतनिश्चयः॥ **3.70.3** ॥ 2285

त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः।
तस्मादसिभ्यामस्याशु बाहू छिन्दावहे गुरू॥ **3.70.4** ॥ 2286

भीषणोऽयं महाकायो राक्षसो भुजविक्रमः।
लोकं ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति॥ **3.70.5** ॥ 2287

निश्चेष्टानां वधो राजन् कुत्सितो जगतीपतेः।
क्रतुमध्योपनीतानां पशूनामिव राघव॥ **3.70.6** ॥ 2288

एतत् सञ्जल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः।
विदार्यास्यं ततो रौद्रं तौ भक्षयितुमारभत्॥ **3.70.7** ॥ 2289

ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ।
अच्छिन्दन्तां सुसंहृष्टौ बाहू तस्यांसदेशतः॥ **3.70.8**॥ 2290

दक्षिणो दक्षिणं बाहुमसक्तमसिना ततः।
चिच्छेद रामो वेगेन सव्यं वीरस्तु लक्ष्मणः॥ **3.70.9**॥ 2291

स पपात महाबाहुश्छिन्नबाहुर्महास्वनः।
खं च गां च दिशश्चैव नादयञ्जलदो यथा॥ **3.70.10**॥ 2292

स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः।
दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः॥ **3.70.11**॥ 2293

इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः।
शशंस तस्य काकुस्स्थं कबन्धस्य महाबलः॥ **3.70.12**॥ 2294

अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः।
तस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणम्॥ **3.70.13**॥ 2295

मात्रा प्रतिहते राज्ये रामः प्रव्राजितो वनम्।
मया सह चरत्येष भार्यया च महद् वनम्॥ **3.70.14**॥ 2296

अस्य देवप्रभावस्य वसतो विजने वने।
रक्षसापहृता भार्या यामिच्छन्ताविहागतौ॥ **3.70.15**॥ 2297

त्वं तु को वा किमर्थं वा कबन्धसदृशो वने।
आस्येनोरसि दीप्तेन भग्नजङ्घो विचेष्टसे॥ **3.70.16**॥ 2298

एवमुक्तः कबन्धस्तु लक्ष्मणेनोत्तरं वचः।
उवाच वचनं प्रीतस्तदिन्द्रवचनं स्मरन्॥ **3.70.17**॥ 2299

स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि वामहम्।
दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां बाहुबन्धनौ॥ **3.70.18**॥ 2300

विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद् यथा।
तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव॥ 3.70.19॥ 2301

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकसप्ततितमः सर्गः ॥

कबन्धस्यात्मकथा स्वशरीरस्य दाहानन्तरं तेन सीतान्वेषणे श्रीरामाय साहाय्यं दातुमाश्वासनम्

पुरा राम महाबाहो महाबलपराक्रमम्।
रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम्॥ **3.71.1** ॥ 2302

यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः।
सोऽहं रूपमिदं कृत्वा लोकवित्रासनं महत्॥ **3.71.2** ॥ 2303

ऋषीन् वनगतान् राम त्रासयामि ततस्ततः।
ततः स्थूलशिरा नाम महर्षिः कोपितो मया॥ **3.71.3** ॥ 2304

स चिन्वन् विविधं वन्यं रूपेणानेन धर्षितः।
तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना॥ **3.71.4** ॥ 2305

एतदेवं नृशंसं ते रूपमस्तु विगर्हितम्।
स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति॥ **3.71.5** ॥ 2306

अभिशापकृतस्येति तेनेदं भाषितं वचः।
यदा छित्त्वा भुजौ रामस्त्वां दहेद् विजने वने॥ **3.71.6** ॥ 2307

तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम्।
श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण॥ **3.71.7** ॥ 2308

इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे।
अहं हि तपसोग्रेण पितामहमतोषयम्॥ **3.71.8**॥ 2309

दीर्घमायुः स मे प्रादात् ततो मां विभ्रमोऽस्पृशत्।
दीर्घमायुर्मया प्राप्तं किं मां शक्रः करिष्यति॥ **3.71.9**॥ 2310

इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम्।
तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा॥ **3.71.10**॥ 2311

सक्थिनी च शिरश्चैव शरीरे सम्प्रवेशितम्।
स मया याच्यमानः सन् नानयद् यमसादनम्॥ **3.71.11**॥ 2312

पितामहवचः सत्यं तदस्त्विति ममाब्रवीत्।
अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः॥ **3.71.12**॥ 2313

वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम्।
स एवमुक्तः शक्रो मे बाहू योजनमायतौ॥ **3.71.13**॥ 2314

तदा चास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत्।
सोऽहं भुजाभ्यां दीर्घाभ्यां सङ्क्षिप्यास्मिन् वनेचरान्॥ **3.71.14**॥ 2315

सिंहद्वीपिमृगव्याघ्रान् भक्षयामि समन्ततः।
स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः॥ **3.71.15**॥ 2316

छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि।
अनेन वपुषा तात वनेऽस्मिन् राजसत्तम॥ **3.71.16**॥ 2317

यद् यत् पश्यामि सर्वस्य ग्रहणं साधु रोचये।
अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति॥ **3.71.17**॥ 2318

इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः।
स त्वं रामोऽसि भद्रं ते नाहमन्येन राघव॥ **3.71.18**॥ 2319

शक्यो हन्तुं यथा तत्त्वमेवमुक्तं महर्षिणा।
अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ॥ **3.71.19**॥ 2320

मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना।
एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः॥ **3.71.20**॥ 2321

इदं जगाद वचनं लक्ष्मणस्य च पश्यतः।
रावणेन हृता भार्या सीता मम यशस्विनी॥ **3.71.21**॥ 2322

निष्क्रान्तस्य जनस्थानात् सह भ्रात्रा यथासुखम्।
नाममात्रं तु जानामि न रूपं तस्य रक्षसः॥ **3.71.22**॥ 2323

निवासं वा प्रभावं वा वयं तस्य न विद्महे।
शोकार्तानामनाथानामेवं विपरिधावताम्॥ **3.71.23**॥ 2324

कारुण्यं सदृशं कर्तुमुपकारेण वर्तताम्।
काष्ठान्यानीय भग्नानि काले शुष्काणि कुञ्जरैः॥ **3.71.24**॥ 2325

धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते।
स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता॥ **3.71.25**॥ 2326

कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः।
एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम्॥ **3.71.26**॥ 2327

प्रोवाच कुशलो वक्ता वक्तारमपि राघवम्।
दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम्॥ **3.71.27**॥ 2328

यस्तां वक्ष्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः।
योऽभिजानाति तद्रक्षस्तद् वक्ष्ये राम तत्परम्॥ **3.71.28**॥ 2329

अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो।
राक्षसं तु महावीर्यं सीता येन हृता तव॥ **3.71.29**॥ 2330

विज्ञानं हि महद् भ्रष्टं शापदोषेण राघव।
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम्॥ **3.71.30**॥ 2331

किं तु यावन्न यात्यस्तं सविता श्रान्तवाहनः।
तावन्मामवटे क्षिप्त्वा दह राम यथाविधि॥ **3.71.31**॥ 2332

दग्धस्त्वयाहमवटे न्यायेन रघुनन्दन।
वक्ष्यामि तं महावीर यस्तं वेत्स्यति राक्षसम्॥ **3.71.32**॥ 2333

तेन सख्यं च कर्तव्यं न्याय्यवृत्तेन राघव।
कल्पयिष्यति ते वीर साहाय्यं लघुविक्रम॥ **3.71.33**॥ 2334

नहि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव।
सर्वान् परिवृतो लोकान् पुरा वै कारणान्तरे॥ **3.71.34**॥ 2335

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विसप्ततितमः सर्गः ॥

श्रीरामलक्ष्मणाभ्यां चिताग्निना कबन्धस्य दाहो दिव्यरूपं धृत्वा तेन श्रीरामाय सुग्रीवेण सह मैत्रीं कर्तुं संमतिदानम्

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ।
गिरिप्रदरमासाद्य पावकं विससर्जतुः॥ **3.72.1** ॥ 2336

लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः।
चितामादीपयामास सा प्रजज्वाल सर्वतः॥ **3.72.2** ॥ 2337

तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत्।
मेदसा पच्यमानस्य मन्दं दहत पावकः॥ **3.72.3** ॥ 2338

सविधूय चितामाशु विधूमोऽग्निरिवोत्थितः।
अरजे वाससी बिभ्रन्माल्यं दिव्यं महाबलः॥ **3.72.4** ॥ 2339

ततश्चिताया वेगेन भास्वरो विरजाम्बरः।
उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः॥ **3.72.5** ॥ 2340

विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे।
प्रभया च महातेजा दिशो दश विराजयन्॥ **3.72.6** ॥ 2341

सोऽन्तरिक्षगतो वाक्यं कबन्धो राममब्रवीत्।
शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि॥ **3.72.7** ॥ 2342

राम षड् युक्तयो लोके याभिः सर्वं विमृश्यते।
परिमृष्टो दशान्तेन दशाभागेन सेव्यते॥ **3.72.8**॥ 2343

दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः।
यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम्॥ **3.72.9**॥ 2344

तदवश्यं त्वया कार्यः स सुहृत् सुहृदां वर।
अकृत्वा नहि ते सिद्धिमहं पश्यामि चिन्तयन्॥ **3.72.10**॥ 2345

श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः।
भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना॥ **3.72.11**॥ 2346

ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते।
निवसत्यात्मवान् वीरश्चतुर्भिः सह वानरैः॥ **3.72.12**॥ 2347

वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः।
सत्यसन्धो विनीतश्च धृतिमान् मतिमान् महान्॥ **3.72.13**॥ 2348

दक्षः प्रगल्भो द्युतिमान् महाबलपराक्रमः।
भ्रात्रा विवासितो वीर राज्यहेतोर्महात्मना॥ **3.72.14**॥ 2349

स ते सहायो मित्रं च सीतायाः परिमार्गणे।
भविष्यति हि ते राम मा च शोके मनः कृथाः॥ **3.72.15**॥ 2350

भवितव्यं हि तच्चापि न तच्छक्यमिहान्यथा।
कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः॥ **3.72.16**॥ 2351

गच्छ शीघ्रमितो वीर सुग्रीवं तं महाबलम्।
वयस्यं तं कुरु क्षिप्रमितो गत्वाद्य राघव॥ **3.72.17**॥ 2352

अद्रोहाय समागम्य दीप्यमाने विभावसौ।
न च ते सोऽवमन्तव्यः सुग्रीवो वानराधिपः॥ **3.72.18**॥ 2353

कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान्।
शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम्॥ **3.72.19**॥ 2354

कृतार्थो वाकृतार्थो वा तव कृत्यं करिष्यति।
स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः॥ **3.72.20**॥ 2355

भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः।
सन्निधायायुधं क्षिप्रमृष्यमूकालयं कपिम्॥ **3.72.21**॥ 2356

कुरु राघव सत्येन वयस्यं वनचारिणम्।
स हि स्थानानि कात्स्न्र्येन सर्वाणि कपिकुञ्जरः॥ **3.72.22**॥ 2357

नरमांसाशिनां लोके नैपुण्यादधिगच्छति।
न तस्याविदितं लोके किञ्चिदस्ति हि राघव॥ **3.72.23**॥ 2358

यावत् सूर्यः प्रतपति सहस्रांशुः परन्तप।
स नदीर्विपुलान् शैलान् गिरिदुर्गाणि कन्दरान्॥ **3.72.24**॥ 2359

अन्विष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति।
वानरांश्च महाकायान् प्रेषयिष्यति राघव॥ **3.72.25**॥ 2360

दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम्।
अन्वेष्यति वरारोहां मैथिलीं रावणालये॥ **3.72.26**॥ 2361

स मेरुशृङ्गाग्रगतामनिन्दितां
प्रविश्य पातालतलेऽपि वाश्रिताम्।
प्लवङ्गमानामृषभस्तव प्रियां
निहत्य रक्षांसि पुनः प्रदास्यति॥ **3.72.27**॥ 2362

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिसप्ततितमः सर्गः ॥

श्रीरामलक्ष्मणौ प्रति ऋष्यमूकपम्पासरोवरयोर्मार्गं वर्णयित्वा मतङ्गमुनेर्वनस्याश्रमस्य परिचयं दत्त्वा दिव्यरूपस्य कबन्धस्य ततः प्रस्थानम्

दर्शयित्वा तु रामाय सीतायाः परिमार्गणे।
वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत्॥ **3.73.1** ॥ 2363

एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः।
प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः॥ **3.73.2** ॥ 2364

जम्बूप्रियालपनसा न्यग्रोधप्लक्षतिन्दुकाः।
अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः॥ **3.73.3** ॥ 2365

धन्वना नागवृक्षाश्च तिलका नक्तमालकाः।
नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः॥ **3.73.4** ॥ 2366

अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः।
तानारुह्याथवा भूमौ पातयित्वा च तान् बलात्॥ **3.73.5** ॥ 2367

फलान्यमृतकल्पानि भक्षयित्वा गमिष्यथः।
तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम्॥ **3.73.6** ॥ 2368

नन्दनप्रतिमं त्वान्यत् कुरवस्तूत्तरा इव।
सर्वकालफला यत्र पादपा मधुरस्रवाः॥ **3.73.7** ॥ 2369

सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा।
फलभारनतास्तत्र महाविटपधारिणः॥ **3.73.8**॥ 2370

शोभन्ते सर्वतस्तत्र मेघपर्वतसन्निभाः।
तानारुह्याथवा भूमौ पातयित्वाथवा सुखम्॥ **3.73.9**॥ 2371

फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति।
चङ्क्रमन्तौ वराञ्शैलाञ्शैलाच्छैलं वनाद् वनम्॥ **3.73.10**॥ 2372

ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः।
अशर्करामविभ्रंशां समतीर्थामशैवलाम्॥ **3.73.11**॥ 2373

राम सञ्जातवालूकां कमलोत्पलशोभिताम्।
तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव॥ **3.73.12**॥ 2374

वल्गुस्वरा निकूजन्ति पम्पासलिलगोचराः।
नोद्विजन्ते नरान् दृष्ट्वा वधस्याकोविदाः शुभाः॥ **3.73.13**॥ 2375

घृतपिण्डोपमान् स्थूलांस्तान् द्विजान् भक्षयिष्यथः।
रोहितान् वक्रतुण्डांश्च नलमीनांश्च राघव॥ **3.73.14**॥ 2376

पम्पायामिषुभिर्मत्स्यांस्तत्र राम वरान् हतान्।
निस्त्वक्पक्षानयस्तप्तानकृशानैककण्टकान्॥ **3.73.15**॥ 2377

तव भक्त्या समायुक्तो लक्ष्मणः सम्प्रदास्यति।
भृशं तान् खादतो मत्स्यान् पम्पायाः पुष्पसञ्चये॥ **3.73.16**॥ 2378

पद्मगन्धि शिवं वारि सुखशीतमनामयम्।
उद्धृत्य स तदाक्लिष्टं रूप्यस्फटिकसन्निभम्॥ **3.73.17**॥ 2379

अथ पुष्करपर्णेन लक्ष्मणः पाययिष्यति।
स्थूलान् गिरिगुहाशय्यान् वानरान् वनचारिणः॥ **3.73.18**॥ 2380

सायाह्ने विचरन् राम दर्शयिष्यति लक्ष्मणः।
अपां लोभादुपावृत्तान् वृषभानिव नर्दतः॥ **3.73.19**॥ 2381

स्थूलान् पीतांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम।
सायाह्ने विचरन् राम विटपी माल्यधारिणः॥ **3.73.20**॥ 2382

शिवोदकं च पम्पायां दृष्ट्वा शोकं विहास्यसि।
सुमनोभिश्चितास्तत्र तिलका नक्तमालकाः॥ **3.73.21**॥ 2383

उत्पलानि च फुल्लानि पङ्कजानि च राघव।
न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः॥ **3.73.22**॥ 2384

न च वै म्लानतां यान्ति न च शीर्यन्ति राघव।
मतङ्गशिष्यास्तत्रासन्नृषयः सुसमाहिताः॥ **3.73.23**॥ 2385

तेषां भाराभितप्तानां वन्यमाहरतां गुरोः।
ये प्रपेतुर्महीं तूर्णं शरीरात् स्वेदबिन्दवः॥ **3.73.24**॥ 2386

तानि माल्यानि जातानि मुनीनां तपसा तदा।
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव॥ **3.73.25**॥ 2387

तेषां गतानामद्यापि दृश्यते परिचारिणी।
श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी॥ **3.73.26**॥ 2388

त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम्।
दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति॥ **3.73.27**॥ 2389

ततस्तद्राम पम्पायास्तीरमाश्रित्य पश्चिमम्।
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि॥ **3.73.28**॥ 2390

न तत्राक्रमितुं नागाः शक्नुवन्ति तदाश्रमे।
ऋषेस्तस्य मतङ्गस्य विधानात् तच्च काननम्॥ **3.73.29**॥ 2391

मतङ्गवनमित्येव विश्रुतं रघुनन्दन।
तस्मिन् नन्दनसङ्काशे देवारण्योपमे वने॥ **3.73.30**॥ 2392

नानाविहगसङ्कीर्णे रंस्यसे राम निर्वृतः।
ऋष्यमूकस्तु पम्पायाः पुरस्तात् पुष्पितद्रुमः॥ **3.73.31**॥ 2393

सुदुःखारोहणश्चैव शिशुनागाभिरक्षितः।
उदारो ब्रह्मणा चैव पूर्वकालेऽभिनिर्मितः॥ **3.73.32**॥ 2394

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि।
यत् स्वप्नं लभते वित्तं तत् प्रबुद्धोऽधिगच्छति॥ **3.73.33**॥ 2395

यस्त्वेनं विषमाचारः पापकर्माधिरोहति।
तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः॥ **3.73.34**॥ 2396

तत्रापि शिशुनागानामाक्रन्दः श्रूयते महान्।
क्रीडतां राम पम्पायां मतङ्गाश्रमवासिनाम्॥ **3.73.35**॥ 2397

सक्ता रुधिरधाराभिः संहत्य परमद्विपाः।
प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः॥ **3.73.36**॥ 2398

ते तत्र पीत्वा पानीयं विमलं चारु शोभनम्।
अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम्॥ **3.73.37**॥ 2399

निर्वृत्ताः संविगाहन्ते वनानि वनगोचराः।
ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान्॥ **3.73.38**॥ 2400

रुरूनपेतानजयान् दृष्ट्वा शोकं प्रहास्यसि।
राम तस्य तु शैलस्य महती शोभते गुहा॥ **3.73.39**॥ 2401

शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम्।
तस्या गुहायाः प्राग्द्वारे महाञ्शीतोदको ह्रदः॥ **3.73.40**॥ 2402

बहुमूलफलो रम्यो नानानगसमाकुलः।
तस्यां वसति धर्मात्मा सुग्रीवः सह वानरैः॥ **3.73.41**॥ 2403

कदाचिच्छिखरे तस्य पर्वतस्यापि तिष्ठति।
कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ॥ **3.73.42**॥ 2404

स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान्।
तं तु खस्थं महाभागं तावुभौ रामलक्ष्मणौ॥ **3.73.43**॥ 2405

प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके।
गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत् स च॥ **3.73.44**॥ 2406

सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा॥ **3.73.45**॥ 2407

स तत् कबन्धः प्रतिपद्य रूपं
वृतः श्रिया भास्वरसर्वदेहः।
निदर्शयन् राममवेक्ष्य खस्थः
सख्यं कुरुष्वेति तदाभ्युवाच॥ **3.73.46**॥ 2408

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःसप्ततितमः सर्गः ॥

श्रीरामलक्ष्मणाभ्यां पम्पातटे मतङ्गवने शबर्या आश्रमं गत्वा तस्याः सत्कारस्य ग्रहणं तया सह मतङ्गवनस्य निरीक्षणं शबर्या स्वशरीरस्याहुतिं दत्त्वा ततो दिव्यधाम्नि गमनम्

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने।
आतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ **3.74.1** ॥ 2409

तौ शैलेष्वाचितानेकान् क्षौद्रपुष्पफलद्रुमान्।
वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ **3.74.2** ॥ 2410

कृत्वा तु शैलपृष्ठे तु तौ वासं रघुनन्दनौ।
पम्पायाः पश्चिमं तीरं राघवावुपतस्थतुः ॥ **3.74.3** ॥ 2411

तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम्।
अपश्यतां ततस्तत्र शबर्या रम्यमाश्रमम् ॥ **3.74.4** ॥ 2412

तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम्।
सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ **3.74.5** ॥ 2413

तौ दृष्ट्वा तु तदा सिद्धा समुत्थाय कृताञ्जलिः।
पादौ जग्राह रामस्य लक्ष्मणस्य च धीमतः ॥ **3.74.6** ॥ 2414

पाद्यमाचमनीयं च सर्वं प्रादाद् यथाविधि।
तामुवाच ततो रामः श्रमणीं धर्मसंस्थिताम् ॥ **3.74.7** ॥ 2415

कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः।
कच्चित्ते नियतः कोप आहारश्च तपोधने॥ **3.74.8**॥ 2416

कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम्।
कचित्ते गुरुशुश्रूषा सफला चारुभाषिणि॥ **3.74.9**॥ 2417

रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता।
शशंस शबरी वृद्धा रामाय प्रत्यवस्थिता॥ **3.74.10**॥ 2418

अद्य प्राप्ता तपःसिद्धिस्तव सन्दर्शनान्मया।
अद्य मे सफलं जन्म गुरवश्च सुपूजिताः॥ **3.74.11**॥ 2419

अद्य मे सफलं तप्तं स्वर्गश्चैव भविष्यति।
त्वयि देववरे राम पूजिते पुरुषर्षभ॥ **3.74.12**॥ 2420

तवाहं चक्षुषा सौम्य पूता सौम्येन मानद।
गमिष्याम्यक्षयांल्लोकांस्त्वत्प्रसादादरिन्दम॥ **3.74.13**॥ 2421

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः।
इतस्ते दिवमारूढा यानहं पर्यचारिषम्॥ **3.74.14**॥ 2422

तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः।
आगमिष्यति ते रामः सुपुण्यमिममाश्रमम्॥ **3.74.15**॥ 2423

स ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः।
तं च दृष्ट्वा वरांल्लोकानक्षयांस्त्वं गमिष्यसि॥ **3.74.16**॥ 2424

एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ।
मया तु सञ्चितं वन्यं विविधं पुरुषर्षभ॥ **3.74.17**॥ 2425

तवार्थे पुरुषव्याघ्र पम्पायास्तीरसम्भवम्।
एवमुक्तः स धर्मात्मा शबर्या शबरीमिदम्॥ **3.74.18**॥ 2426

राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताम्।
दनोः सकाशात् तत्त्वेन प्रभावं ते महात्मनाम्॥ **3.74.19**॥ 2427

श्रुतं प्रत्यक्षमिच्छामि सन्द्रष्टुं यदि मन्यसे।
एतत्तु वचनं श्रुत्वा रामवक्त्रविनिःसृतम्॥ **3.74.20**॥ 2428

शबरी दर्शयामास तावुभौ तद्वनं महत्।
पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम्॥ **3.74.21**॥ 2429

मतङ्गवनमित्येव विश्रुतं रघुनन्दन।
इह ते भावितात्मानो गुरवो मे महाद्युते।
जुहवाञ्चक्रिरे नीडं मन्त्रवन्मन्त्रपूजितम्॥ **3.74.22**॥ 2430

इयं प्रत्यक्स्थली वेदी यत्र ते मे सुसत्कृताः।
पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः॥ **3.74.23**॥ 2431

तेषां तपःप्रभावेण पश्याद्यापि रघूत्तम।
द्योतयन्ती दिशः सर्वाः श्रिया वेद्यतुलप्रभा॥ **3.74.24**॥ 2432

अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः।
चिन्तितेनागतान् पश्य समेतान् सप्त सागरान्॥ **3.74.25**॥ 2433

कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह।
अद्यापि न विशुष्यन्ति प्रदेशे रघुनन्दन॥ **3.74.26**॥ 2434

देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै।
पुष्पैः कुवलयैः सार्धं म्लानत्वं न तु यान्ति वै॥ **3.74.27**॥ 2435

कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया।
तदिच्छाम्यभ्यनुज्ञाता त्यक्ष्याम्येतत् कलेवरम्॥ **3.74.28**॥ 2436

तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम्।
मुनीनामाश्रमो येषामहं च परिचारिणी॥ **3.74.29**॥ 2437

धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः।
प्रहर्षमतुलं लेभे आश्चर्यमिति चाब्रवीत्॥ **3.74.30**॥ 2438

तामुवाच ततो रामः शबरीं संशितव्रताम्।
अर्चितोऽहं त्वया भद्रे गच्छ कामं यथासुखम्॥ **3.74.31**॥ 2439

इत्येवमुक्ता जटिला चीरकृष्णाजिनाम्बरा।
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने॥ **3.74.32**॥ 2440

ज्वलत्पावकसङ्काशा स्वर्गमेव जगाम ह।
दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना॥ **3.74.33**॥ 2441

दिव्याम्बरधरा तत्र बभूव प्रियदर्शना।
विराजयन्ती तं देशं विद्युत्सौदामनी यथा॥ **3.74.34**॥ 2442

यत्र ते सुकृतात्मानो विहरन्ति महर्षयः।
तत् पुण्यं शबरी स्थानं जगामात्मसमाधिना॥ **3.74.35**॥ 2443

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चसप्ततितमः सर्गः ॥

श्रीरामलक्ष्मणयोर्वार्तालापस्तयोः पम्पातटे गमनम्

दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा।
लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः॥ **3.75.1** ॥ 2444

चिन्तयित्वा तु धर्मात्मा प्रभावं तं महात्मनाम्।
हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत्॥ **3.75.2** ॥ 2445

दृष्टो मयाऽऽश्रमः सौम्य बह्वाश्चर्यः कृतात्मनाम्।
विश्वस्तमृगशार्दूलो नानाविहगसेवितः॥ **3.75.3** ॥ 2446

सप्तानां च समुद्राणां तेषां तीर्थेषु लक्ष्मण।
उपस्पृष्टं च विधिवत् पितरश्चापि तर्पिताः॥ **3.75.4** ॥ 2447

प्रणष्टमशुभं यन्नः कल्याणं समुपस्थितम्।
तेन त्वेतत् प्रहृष्टं मे मनो लक्ष्मण सम्प्रति॥ **3.75.5** ॥ 2448

हृदये मे नरव्याघ्र शुभमाविर्भविष्यति।
तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम्॥ **3.75.6** ॥ 2449

ऋष्यमूको गिरिर्यत्र नातिदूरे प्रकाशते।
यस्मिन् वसति धर्मात्मा सुग्रीवोऽंशुमतः सुतः॥ **3.75.7** ॥ 2450

नित्यं वालिभयात् त्रस्तश्चतुर्भिः सह वानरैः।
अहं त्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम्॥ **3.75.8**॥ 2451

तदधीनं हि मे कार्यं सीतायाः परिमार्गणम्।
इति ब्रुवाणं तं वीरं सौमित्रिरिदमब्रवीत्॥ **3.75.9**॥ 2452

गच्छावस्त्वरितं तत्र ममापि त्वरते मनः।
आश्रमात्तु ततस्तस्मान्निष्क्रम्य स विशाम्पतिः॥ **3.75.10**॥ 2453

आजगाम ततः पम्पां लक्ष्मणेन सह प्रभुः।
समीक्षमाणः पुष्पाढ्यं सर्वतो विपुलद्रुमम्॥ **3.75.11**॥ 2454

कोयष्टिभिश्चार्जुनकैः शतपत्रैश्च कीरकैः।
एतैश्चान्यैश्च बहुभिर्नादितं तद् वनं महत्॥ **3.75.12**॥ 2455

स रामो विविधान् वृक्षान् सरांसि विविधानि च।
पश्यन् कामाभिसन्तप्तो जगाम परमं ह्रदम्॥ **3.75.13**॥ 2456

स तामासाद्य वै रामो दूरात् पानीयवाहिनीम्।
मतङ्गसरसं नाम ह्रदं समवगाहत॥ **3.75.14**॥ 2457

तत्र जग्मतुरव्यग्रौ राघवौ हि समाहितौ।
स तु शोकसमाविष्टो रामो दशरथात्मजः॥ **3.75.15**॥ 2458

विवेश नलिनीं रम्यां पङ्कजैश्च समावृताम्।
तिलकाशोकपुन्नागबकुलोद्दालकाशिनीम्॥ **3.75.16**॥ 2459

रम्योपवनसम्बाधां पद्मसम्पीडितोदकाम्।
स्फटिकोपमतोयां तां श्लक्ष्णवालुकसन्ततताम्॥ **3.75.17**॥ 2460

मत्स्यकच्छपसम्बाधां तीरस्थद्रुमशोभिताम्।
सखीभिरिव संयुक्तां लताभिरनुवेष्टिताम्॥ **3.75.18**॥ 2461

किन्नरोरगगन्धर्वयक्षराक्षससेविताम्।
नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम्॥ **3.75.19**॥ 2462

पद्मसौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः।
नीलां कुवलयोद्घाटैर्बहुवर्णां कुथामिव॥ **3.75.20**॥ 2463

अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम्।
पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम्॥ **3.75.21**॥ 2464

स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह।
विललाप च तेजस्वी रामो दशरथात्मजः॥ **3.75.22**॥ 2465

तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा।
पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः॥ **3.75.23**॥ 2466

मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः॥ **3.75.24**॥ 2467

अन्यैश्च विविधैर्वृक्षैः प्रमदामिव शोभिताम्।
अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः॥ **3.75.25**॥ 2468

ऋष्यमूक इति ख्यातश्चित्रपुष्पितपादपः।
हरिर्ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः॥ **3.75.26**॥ 2469

अध्यास्ते तु महावीर्यः सुग्रीव इति विश्रुतः।
सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ॥ **3.75.27**॥ 2470

इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमः।
कथं मया विना सीतां शक्यं लक्ष्मण जीवितुम्॥ **3.75.28**॥ 2471

इत्येवमुक्त्वा मदनाभिपीडितः
स लक्ष्मणं वाक्यमनन्यचेतसम्।

विवेश पम्पां नलिनीं मनोहरां
रघूत्तमः शोकविषादयन्त्रितः ॥ **3.75.29** ॥ 2472

ततो महद्वर्त्म सुदूरसङ्क्रमः
क्रमेण गत्वा प्रविलोकयन् वनम्।
ददर्श पम्पां शुभदर्शकाननाम्
अनेकनानाविधपक्षिसङ्कुलाम् ॥ **3.75.30** ॥ 2473

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥